
का[illegible] हे [illegible] च्छन्न मधुरे । कृष्णानन्द [illegible] ।

इति । अवधूतस्यानन्दभरितत्वदर्शनेन विस्मितः सैराट् स्वैनं स्वप्नेऽप्यलब्धस्य तदनुभूयमानस्यानन्दस्य कारणं पप्रच्छ । केन रसेन सर्वसङ्गपरित्यागिनोऽस्य तपस्विनो हृदयं व्याप्तं, येनासावानन्दभरितो वर्तते । किमयं चिन्तयति । 'मच्चित्ताः' इति भगवदेकचित्तोऽयम् । 'मद्गतप्राणाः' इति भगवच्चिन्तयैव प्राणिति । तत्स्मृत्यपहारे गतप्राणः स्यात् । रसभूमानं सर्वान्तरमानन्दमयमेवायमावृत्तचक्षुषा पश्यति, तमेव शृणोति, विजानाति; नान्यत्पश्यति, शृणोति, विजानाति। अन्वयव्यतिरेकाभ्यां कार्यकारणभावो व्यवस्थाप्येत। अन्वयव्यतिरेकाभ्यामर्थापत्त्या चास्य रसान्तरविरक्तस्यानन्दपीनत्वं ब्रह्मसंस्पर्शहेतुकमिति निश्चीयते । एवंरीत्या सहे-


करणं तदवतरणैर्निर्वर्त्यते । मन्दभाग्या वयं पुरावृत्तानवतारा
न्नाध्यक्षयितुं पारयामः । न वयं तत्कृतपरावरनिखिलजनमनो
नयनहारिनवनीतनटनादिदिव्यचेष्टितान्यनुभवामः, तेषाम
तिक्रान्तत्वात्, अतिक्रान्तदर्शनदक्षसूक्ष्मदृष्टेरस्माकमभावात्
यदि वयं भावुकत्वं रसिकत्वं च संपादयेम, शुकपराङ्कुशप
कालादिवद्वयं भिन्नकालानपि तानवतारानध्यक्षयेम । ‘अध्य
क्षितो भावुकैः’ इत्याचार्यैरस्ति चेद्भावुकत्वमतिक्रान्तमप्यध
क्ष्येनेति व्यज्यते । ‘मिल ... ंसमालयं पद्मर



रसः, मध्वपूपो यथा मधुकरैः। सुवीति निवृत्ततर्षा नित्यमुक्ता व्यावर्त्यन्ते। इयश्च विगलितवेद्यान्तरमनुभाव्यरसतन्मयतापत्तिः। 'तन्मयत्वं रसेषु' इति नटस्याभिनेयभावतन्मयतायां भावुकसभ्येषु तद्भावसंक्रान्तिः सुलभा। रामायणादिषु सीतारामशोकवर्णनप्रकरणेषु वयं रुदिमः स्थूलस्थूलान्नयनमुकुलैर्बाष्पबिन्दून्प्रतिकलं मुञ्चामः। ध्रुवं वयं तदानीं करुणापराधीनास्तद्रसमयतां प्राप्नुमः। तत्र श्रव्यकाव्ये 'हे नः पृच्छत्र मधुरे। कृष्णता—नन्दनायक्यौ रुदितः। इति। अवधूतस्यानन्दभरितत्वदर्शनेन विस्मितः संराट् स्वैनं स्वयमप्यलब्धस्य तदनुभूयमानस्यानन्दस्य कारणं पप्रच्छ। केन रसेन सर्वसङ्गपरित्यागिनोऽस्य तपस्विनो हृदयं व्याप्तम्, येनासावानन्दभरितो वर्तते। किमयं चिन्तयति। 'मच्चित्ताः' इति भगवदेकचित्तोऽयम्। 'मद्गतप्राणाः' इति भगवच्चिन्तयैव प्राणिति। तत्स्मृत्यपहारे गतप्राणः स्यात्। रसभूमानं सर्वान्तरमानन्दमयमेवायमावृत्तचक्षुषा पश्यति, तमेव शृणोति, विजानाति; नान्यत्पश्यति, शृणोति, विजानाति। अन्वयव्यतिरेकाभ्यां कार्यकारणभावो व्यवस्थाप्येत। अन्वयव्यतिरेकाभ्यामर्थापत्त्या चास्य रसान्तरविरक्तस्यानन्दपीनत्वं ब्रह्मसंस्पर्शहेतुकमिति निश्चीयते। एवंरीत्या सहे-

पाद्यरसतन्मयतापादने । दृश्यकाव्येषु नाटकेषु नाट्यमानेषु नृत्ते चाभिनेयस्य स्थायीभावस्य सभ्यानुभवगोचरतापत्तिः सुलभतरा । तत एव तत्काव्यानां दृश्यत्वविशेषणम् । यदि रस एव नायको नटश्च भवेत्तच्चेष्टितं कृत्स्नं रसमयं स्यात् । आनन्दमयस्य भगवतो मुख्यं रसत्वम्, तत्संबन्धेनेतरसुखानां रसत्वमिति च श्रावयन्ति श्रुतयः । 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति

इति तैत्तिरीयश्रुतिः [illegible] ज्ञौविमालयं [illegible]



मात्रं कुर्याद्वीथीषु। यदि यदृच्छया कारुणिकैर्जनैः शिक्ये किमप्यन्नं प्रक्षिप्येत तच्चरेद्भक्षयेत्। चरणमात्रलब्धं चरेदिति श्रुत्यर्थः। न केवलं सुखसाधनानि परित्यक्तानि, इष्टविधया क्लेशभूताः सर्वेऽपि पारमैकान्त्यधर्मास्तीव्रमविच्छिन्नमनुष्ठीयन्ते। सर्वसुखपरित्यागी वहुक्लेशपरिगृहीत्यानन्दसागरमग्नः सततहृष्टो दृश्यते। अत्रावधूतयदुसंवादः स्मर्तव्यः। 'अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम्। यदुर्निरीक्ष्य पप्रच्छ' 'कस्त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानन्दकारणम्' 'ब्रूहि' इति। अवधूतस्यानन्दभरितत्वदर्शनेन विस्मितः संराट् स्वेन स्वप्नेऽप्यलब्धस्य तदनुभूयमानस्यानन्दस्य कारणं पप्रच्छ। केनरसेन सर्वसङ्गपरित्यागिनोऽस्य तपस्विनो हृदयं व्याप्तम्, येनासावानन्दभरितो वर्तते। किमयं चिन्तयति। 'मच्चित्ताः' इति भगवदेकचित्तोऽयम्। 'मद्गतप्राणाः' इति भगवच्चिन्तयैव प्राणिति। तत्स्मृत्यपहारे गतप्राणः स्यात्। रसभूमानं सर्वान्तरमानन्दमयमेवायमावृत्तचक्षुषा पश्यति, तमेव शृणोति, विजानाति; नान्यत्पश्यति, शृणोति, विजानाति। अन्वयव्यतिरेकाभ्यां कार्यकारणभावो व्यवस्थाप्येत। अन्वयव्यतिरेकाभ्यामर्थापत्त्या चास्य रसान्तरविरक्तस्यानन्दपीनत्वं ब्रह्मसंस्पर्शहेतुकमिति निश्चीयते। एवंरीत्या सहे-

तुकं प्रदर्श्यते आनन्दमयस्य ब्रह्मणोऽस्तित्वं मातापितृसहस्रेभ्यो वत्सलतरया श्रुत्या । 'अस्ति ब्रह्मेति चेद्वेद' इत्यादिश्लोकः पुच्छवदानन्दमयविषये पठितः । ब्रह्मण आनन्दमयत्वेनास्तित्वं सर्वलोकहृदयारूढं यथा स्यात्तथा निरूपयति 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतिः सर्वाः प्रजाः सत्तां लभेरन्नित्याशया । प्रजानामसत्कल्पत्वं मातृदुःखाय भवेत् । श्रोत्रियस्य चाकामहतस्येत्यकामहतत्वं हेतूक्रियते निरतिशयानन्दप्राप्तौ । कथं सर्वतो विरक्तस्य रतिरिति चेदात्मकामोऽयम् , आत्मरतिः । 'अयम' शब्देन त्यक्तसर्वपरिग्रहोऽभ्युपगतसमस्तक्लेशरूपधर्मसमस्वी विवक्षितः । एवं च ब्रह्मणः स्वान्तरानन्दमयत्वेनास्तित्वं ब्रह्मविदनुभूयमानानिरतिशयानन्दनिदर्शनेन लोकायतिकानामपि हृदयारूढतया सुविशदं प्रदर्श्यतेऽनया श्रुत्या । प्रसन्नं मुखं ब्रह्मवित्त्वे स्पष्टं लिङ्गमिति 'ब्रह्मविद इव ते सोम्य मुखं भाति ।' इत्युपकोसलं प्रत्याचार्यवचनं बोधयति । श्रुतिस्थमुखशब्दो ब्रह्मविदवयवान्तराणामप्युपलक्षणमिति दर्शयन्त्याचार्याः 'अङ्गान्यस्य मुहुर्मुहुः पुलकितान्यन्तर्मुखं मानसं चिन्ता च द्रुतशर्कराप्रतिनिधिः शीताश्रुणी लोचने ।' इति संकल्पसूर्योदये 'आह्लादशीतनेत्राम्बुः पुलकी-

कृतगात्रवान् । सदा परगुणाविष्टो द्रष्टव्यः सर्वदेहिभिः ॥' इत्युपबृंहणानुसारेण । परमात्मनो द्रष्टव्यतां विदधाति श्रुतिः । विश्वदेहिप्रभृतिसर्वदेहिभिर्नेह्मरसमग्नस्यात्मज्ञस्य द्रष्टव्यत्वं विधीयते उपबृंहणेन । नेत्रमुकुलगलदानन्दशीताश्रुभिरानन्दपुलकोद्गमादिभिश्च प्रत्यक्षलिङ्गैरान्तरा निश्चला रतिः प्रत्यक्षीक्रियते । पुलकीकृतगात्रवानिति मतुपा गात्रस्य सदास्फुरन्नवनवपुलकवत्त्वं व्यज्यते । प्रतिक्षणं नवनवाः पुलका उद्गच्छन्ति । तदेव 'मुहुर्मुहुः पुलकितानि' इत्याचार्यैरुच्यते । कण्ठकवराह इति प्रख्यातः श्वापदो हर्षक्रोधभयादिनिमित्तेषु कृत्स्नगात्रेऽपि कण्टकोद्गमं बिभर्ति । तत्र च कण्ठकवरत्वमन्वर्थम् । तत एव पुलकस्य कण्टकसंज्ञा कृता स्यात् । रसेन भगवता नटीभूय नायिकया सह निर्वर्तितलोकोत्तरभूमिकानामध्यक्षणेन भावुकचित्तं नियतं रज्येत । रसस्वरूपनटभावितरसेन तद्भावयितृचित्तं ध्रुवं व्याप्येत । तत्तदवताराणां यथावृत्तं विचित्रवर्णनेन दृश्यकाव्यादपि चारुतया श्रोतृचित्तरञ्जनं क्रियते आचार्यैः । तत्तदवतारविषयवर्णने महर्षिभिर्बहुग्रन्थैः कृतमेकेन श्लोकेनातिविचित्रं संगृह्यत इति दर्शयिष्यते ॥

चित ईश्वरश्च सर्वे नटाः । यद्यपि शुद्धं चैतन्यं तेषाम-

नुगतस्वरूपम् , ते विविधभूमिकाः परिगृह्य नटन्त एवासते। वयं नाट्येन भगवतो लीलारसमुत्पादयामः । सोऽत्रावतीर्य भूमिकां परिगृह्णन्नटन्नस्मानुद्दिधीर्षति । अस्मदार्तिस्तमध आनयति । अस्मदुन्निनीषया सोऽवतरति । कूपादिषु पतितान् शिशूंस्तत्रावतीर्णः पित्रादिरुद्दिधीर्षति । 'कान्तां प्राप्य विचित्रकर्मरचितां पर्यायतो भूमिकां केनाप्यद्भुतनाटकेन कमपि श्रीमन्तमानन्दयन् । कृत्वा शास्त्रमुखे मनः प्रतिमुखं गर्भावमर्शात्परं विद्यानिर्वहणेन लब्धनिर्भररसो ह्येष विद्योतते ॥' इत्याचार्या जीवपरिच्छेदान्ते न्यायसिद्धाञ्जने । शैलूषवद्विविधवेषपरिग्रहवन्तं भगवन्तं विविधभूमिकापरिग्रहैर्वयं लीलारसोत्पादनेन सन्तोषयामः । यदि कदाचिद्वयमहृदयमपि प्रपन्नरूपप्रणतवेषं परिगृह्णीमस्तन्मात्रेण संतोषितः श्रियःपतिरस्मान्हृदि भूषणत्वेन निधायात्मानं विद्योतयति । 'एष ह्येवानन्दयाति' 'तद्धेतुव्यपदेशाच्च' इति श्रुतिसूत्राभ्यां सर्वेतरानन्दहेतुभूतो भगवानपि अनयापूर्वया प्रणतभूमिकयानन्दितो भवति । अद्भुतनवनाटकेषु विशेषप्रीतिं कुर्वन्तो जनास्तद्द्रष्टुं प्रवेशदक्षिणां दत्वा नाटकशालामण्टपं गच्छन्ति, प्रजागरं च कुर्वते । तद्दिदृक्षायास्तीव्रत्वेऽद्भुतत्वं नूतनत्वं च निमित्तम् । प्रणतवेषश्चेतनस्य नूतनः, भगवतोऽद्भुतो नूत-

नश्च। सुदुर्लभः खल्वस्य प्रपत्तृजनः। 'न नमेयं हि कंचन' 'ईश्वरोऽहम' 'कोऽन्योस्ति सदृशो मया' इत्यहंभावमदमत्तेषु स्तब्धजनेषु सुदुर्लभाः प्रणन्तारः। अपूर्वाद्भुततद्भूमिकापरिग्रहक्षण एव श्रिया सहितो भगवान्संतुष्यति। विस्मयते, आश्चर्यमाश्चर्यमिति वक्ति। अञ्जलिभरवहनमात्रमधिकं मातरं संतोषयितुम्; गात्रप्रणामोऽपि तया नापेक्ष्यते। तस्यां प्रीणितायां तदिङ्गितपराधीनस्तत्पतिः सद्यः प्रीयेत। नटस्य विचित्रभूमिकया संतोषितो लौकिकः प्रभुः श्रीमांस्तस्मै पारितोषिकत्वेनाभरणादिकं दद्यात्तद्वक्षसि धर्तुम्, प्रभोर्वहुमतिप्रसादं जनानां प्रख्यापयितुं च। अयं तु विलक्षणो जगदीश्वरो नटमेवाभरणीकृत्य स्वहृदयेऽत्यन्तहृद्यत्वेन सततं धरति। तेन चात्मानं विद्योतितं मन्यते। 'कर्ता वा नाटकानामियमनुभवति क्लेशमस्मद्विधो वा' इति नाटकप्रणेता तत्क्लेशज्ञाता कविः। वयमेव नाटकवस्तु निर्माय नायका नटाश्च भूत्वा नटाम इत्याचार्याः। 'प्रपञ्चः कृत्स्नोऽपि रङ्गम। तत्र सर्वेऽपि नटाः' इत्याश्लेयकविसार्वभौमः। नटो भगवान्नटैरस्माभिर्नटनेनाराध्येत। सगन्धेषु प्रीतिः सहजा। नटनक्लेशं नटो जानीयात्। एतदुच्यते आचार्यैः 'स्वाधीनसंसरणनाट्यनिरूढवृत्तेः संतोषितः प्रणत-

भूमिकयास्य पुंसः । स्थाने विधास्यति विभुः स्थिरचिन्हभेदं क्रीडानटः स भगवान्कृपया स्वसाम्यम् ॥' इति । क्रीडानट इति प्रथमान्तपाठ आचार्यसंमतः स्यात् ॥

यज्ञादिभगवदुत्सवान्तेषु वयं भगवन्तं यात्रायातान्सुजननिवहांश्च नाटकनाटनेन नृत्तगीतादिना चाराधयामः । 'देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्' इति नाट्योपाध्यायः । मुनयो भरतादयः । तच्च नाट्यं बहुधा भिन्नरुचेरपि जनस्यैकं समाराधनम् । अस्माभिर्विचित्रविविधनाटकैराराधितः कृतज्ञसार्वभौमो देवः श्रिया सह विविधभूमिकाः परिगृह्य नाटकानि निर्वर्तयति । 'देवानाम्' इति श्लोकपठितषष्ठ्यन्तदेवशब्दस्थाने एतत्स्तोत्रारम्भे प्रथमान्तदेवशब्द इत्यवधेयम् । तत्र नाट्यजनितप्रीत्युद्देश्या देवाः । देवोऽत्र स्वयं नटन्मनुष्याणां सभ्यानां प्रीतिविधाता । 'देवानाम्' इत्यस्य स्थानेऽत्र 'नः' इति । 'देवो नः' इति शब्दौ कालिदासश्लोकोक्तक्रमविपर्ययेण नटसभ्यान् प्रदर्शयत इव ॥

'नटवद्भूमिकाभेदैर्नाथ दीव्यन्पृथग्विधैः । पुंसामनन्यभावानां पुष्णासि रसमद्भुतम् ॥' इति यादवाभ्युदये । स च श्लोक एतत्स्तोत्राद्यश्लोकस्यात्यन्तसदृशः । निर्भरत्वरूपप्र-

पत्तिरसाविष्टानस्मान्निर्भरं संपूर्णं रसं लम्भयितुं भगवान्राम-कृष्णादिभूमिकाः परिगृह्णाति। निर्भरस्य निर्भरो रसो देयः। निर्भरैः प्रपन्नैर्निर्भरो रसः प्राप्यत इति चारु व्यज्यते आचार्यैर्लब्धनिर्भररसैरिति प्रथमश्लोके। भगवतो दशभूमिकानां भूमिकाभूतः प्रथमश्लोकः। 'प्रपञ्चं निष्प्रपञ्चोऽपि विडम्बयसि भूतले। प्रपन्नजनतानन्दसंदोहं प्रथितुं प्रभो॥' इति ब्रह्मा ब्रह्म कृष्णं प्रति। तेनावतारप्रयोजनं दर्शितं भवति। तदेव प्रपन्नजनतानन्दसंदोहप्रथनमत्र प्रथमश्लोके प्रयोजनत्वेन कीर्त्यते 'नः शुभमातनोतु' इति। आतनोत्विति विस्तारणरूपप्रथनप्रार्थना। शुभमित्यानन्दसंदोहः। अद्भुतप्रपञ्चवेषपरिगृहीतिनोऽस्मांस्तन्मात्रप्रीतो देवः स्वाद्भुतभूमिकाभिरस्माकमद्भुतरसं पुष्णाति। 'धर्मसंस्थापनार्थाय' 'परित्राणाय साधूनाम्' इति सामान्येनोक्तमवतारप्रयोजनमत्र पर्यवस्यतीति चारु प्रत्यपादि गीताभाष्यारम्भे भूमिकापरिग्रहविषयभूमिकायामवतारविषयावतारिकायाम्। तदेव विशदतरमवाच्यवताररहस्यभाष्ये, तत्तात्पर्यचन्द्रिकायां च। गीताशास्त्रतात्पर्यभूतभक्तियोगमवतारयितुं भगवतावतारः कृत इत्युक्तं गीतावतारिकायाम्। अवतारावतारितो भक्तियोगोऽवतीर्णभगवतोऽपि मुख्यतर इति चारु व्यज्यते। लावण्यधाम्नः स्वाद्भुतदिव्य-

विग्रहस्य सकलमनुजनयनविषयीकरणं विना कथं विश्वमभृतप्लावनेनाप्यायितं भवेत् । कथं चाक्रूरमालाकारादिपरमभागवतानां दृष्टिचित्तापहरणेन तद्भक्तिरूपधर्मवर्धनम् । अवतारितभक्तियोगरूपगीताया गीतेत्यसाधारणो व्यपदेशः । निरुपपदगीताशब्दो भगवद्गीतामभिदध्यात् । 'गीताः सुगीताः कर्तव्याः' इति ऋषिवचनम् । गीतान्तराणामनुगीता, शिवगीता, श्रुतिगीता, भ्रमरगीता, गोपिकागीतेति सविशेषनामान्येव भवन्ति ॥

अवतारप्रशंसायां ब्रह्मणोच्यते 'को वेत्ति भूमन्भगवन्परात्मन्योगेश्वरोतीर्भवतस्त्रिलोक्याम्' इति । तत्रावतरद्ब्रह्म भूमन्निति संबोध्यते । अल्पप्रत्यर्थिनो विभुभूतभूम्नोऽल्पभूमिकाभूतावतारवेषपरिग्रहः सर्वशक्तिं विना दुर्घट इति तेन संबोधनेन व्यज्यत इव । तदेव निपुणं प्रदर्श्यते आचार्यैः 'यस्यासौ भजते कदाचिदजहद्भूमा स्वयं भूमिकाम्' इति स्वज्ञानप्रदात्रीं हयवदनभूमिकारूपाचार्यभूमिकापरिग्रहीत्रीमादिमां देवतामुद्दिश्य । तेजोमयस्य देवस्य विभोर्भूमिकापरिग्रहः श्रमसाध्य इति प्रथमश्लोकपठितेन भूमिकाशब्देनाचार्या व्यञ्जयन्तीव । 'अजहद्भूमा स्वयं भूमिकाम्' इत्यवतारेषु सकलमनुजदृश्यत्वाय भूमिकापरिग्रहेऽपि निरतिशयबृहत्व-

रूपस्वभूमा न त्यक्ष्यत इति बोध्यते । विभुर्विष्णुः खल्ववतरति स्वं स्वभावमविहाय । भूमा च स्वस्वभावः । विष्णववतारे तद्वैभवमप्यवतरति । अन्यथावतीर्णो न विष्णुः स्यात् । 'वरये वैष्णववैभवावतारम्' इत्यतिमानुषस्तवप्रथमश्लोके श्रीवत्साङ्कमिश्रैर्भगवद्वैभवस्यावतारो व्यज्यत इव । 'अनासीद्दोषो जहदवधिषाड्गुण्यमहिमा विहारस्वाच्छन्द्याद्विभुरिह दधानो विभवताम् । तिरश्चामप्येतैः कमठकिटिपाठीनपतगप्रकारैराकारैः परिवृढतमत्वं द्रढयति ॥' इत्याचार्याः सङ्कल्पसूर्योदये । सर्वैरुपसत्तुं योग्यं भगवन्तं दोष एक एव नासीदेदिति व्यज्यते 'अनासीद्दोषः' इति । अशेषशरण्योऽपि न दोषशरण्यः । न दोषास्तस्मिन्शरणं लभेरन् । आसन्नेषु दोषं मृष्येत् 'दोषो यद्यपि तस्य स्यात्' इति । आसीदन्तं दोषं तु न मर्षयेत् । न तस्य किमप्यननुकूलवेदनीयं हेयं भवति । लोके हेयभूता रोषादयोऽपि तस्य निःसीमशक्तेः सुनिरसविषये प्रीतये स्युः । विभोर्विष्णोर्विभवरूपावतारो युक्त इति व्यज्यते 'विभुरिह दधानो विभवताम्' इति । 'ब्रह्म परिवृढं सर्वतः' इति यास्कनिर्वचनं ब्रह्मशब्दस्य । 'ब्रह्म ततमम्' इति श्रुतिः । तल्लक्षणसमन्वयार्थं स्वस्य परिवृढतमत्वं द्रढयितुं तिर्यग्भूतसर्वप्राणिप्रकाराकारप-

रिग्रहं करोति विभुः । सर्वत्वाभावे कथं ब्रह्मत्वसंभवः । सर्वत्वनिर्वाहार्थं ब्रह्मणो दाशदासकितवत्वादिकीर्तनं श्रुत्या । तच्च सामानाधिकरण्यमंशांशिभावेनेति स्पष्टमुच्यते बादरायणेनांशाधिकरणप्रथमसूत्रेण । तावता तादात्म्यरूपसामानाधिकरण्यं नोपपाद्येत । तादृशं च सामानाधिकरण्यं समर्थ्यते मीनकूर्मवराहाद्यात्मतयावतीर्णत्वेन । अवतारभूतमीनादिदेहेषु न भगवता जीवेनात्मनानुप्रवेशः । न स्वांशभूतजीवद्वारा, किं तु साक्षात्पूर्णेन स्वेनैव । विहारस्वाच्छन्द्यादिति यदुक्तं तद्द्योत्यते 'देवो नः' इति देवशब्देन । तिर्यग्भवनस्यातिनिहीनत्वाद्दुर्घटत्वाच्च तद्धृष्यते प्राथमिकैस्त्रिभिरवतारैः । 'ब्रह्म दाशा' इति श्रुतिर्विस्मयते भगवतो दाशसामानाधिकरण्यं वीक्ष्य । तिष्ठतु दाशैः शरीरशरीरिभावादिना तान्त्रिकं सामानाधिकरण्यं मुख्यममुख्यं वेति वितर्कितं वादिभिः । तैर्दाशैर्जालैर्गृह्यमाणस्ततोऽपि निहीनो मत्स्य एव भवानि, तद्योनिना मुख्यमविगीतं सामानाधिकरण्यं लभेयेति प्रथमं मत्स्यो भवतीव भगवान् । दाशानां मत्स्यमांससततसंसर्गेण दुर्गन्धवत्त्वं तन्निहीनत्वे हेतुः । संसर्गेण तन्निहीनतापादकमत्स्य एव भविताहमिति भगवदिच्छा प्रादुर्भवति । 'ब्रह्म कितवाः' इति श्रुतिः स्वयं मुख्यकितवोऽपि भवतीति 'गोपस्त्रीणां

जयति कितवः कोऽपि कौमारहारी' इत्याचार्यैर्व्यज्यते । 'ब्रह्म दासाः।' दास्यं सर्वप्रकारेण भगवान्सर्वप्राणिनां करोतीति बहुधा विचित्रं प्रदर्श्यते भगवतैव गीतासु । अन्तरवयवेष्ववस्थायास्मासु स्वपत्सु वैश्वानररूपो भगवान्भुक्तमन्नं पाचयति । बाह्यपाचका लोके भृत्यतया संपाद्यन्तेऽधिकमधिकं वेतनं प्रदाय । अयमन्तःपाचकः सर्वेषां प्राणिनाम् । ईदृशं स्वयं दास्यमाश्रितं भगवन्तं वीक्ष्य तद्विषये स्वयं दासा भवन्ति तपस्विन इत्युच्यते 'स्वयं दासास्तपस्विनः' इति । एषोऽप्यर्थो वर्णयितुं शक्यः : सूक्ष्मदृष्टीनां तपस्विनां भगवत्कृतान्तर्दास्यादिव्यापारो दृष्टिगोचरो भवति । तद्दृष्ट्वा ते तस्य स्वयं दासा भवन्ति । समुद्रशायिना भगवता स्ववासस्थानरूपसन्निकर्षवन्तं जलधिमधिकरणीकृत्य तत्र प्रथमं त्रयोऽवताराः परिजगृहिरे । अतिनिहीनयोनिष्ववतार अधोगमनरूपावतारस्य काष्ठां निर्वहेत् । अगाधजलधाववतीर्णोऽतिदुःखाधमवतरणं निर्वर्तयेदित्युच्येत । प्रत्यवतारमजहद्ब्रूमत्वं निरतिशयवैभवं च प्रदर्श्यतेऽस्मिन्स्तोत्रे ॥

मेघभूतेन भगवता निरवधिकरुणाभारखिन्नत्वेनावतीर्येत इति चारु व्यज्यते श्रीमच्छङ्कराचार्यैर्भगवदवताराविषयश्लोके । 'मत्स्यः कूर्मो वराहो नरहरिणपतिर्वामनो जामदग्न्यः का-

कुत्स्थः कंसघाती मनसिजविजयी यश्च कल्कीभविष्यन् । विष्णोरंशावतारा भुवनहितकरा धर्मसंस्थापनार्थाः पायासुर्मां त एते गुरुतरकरुणाभारखिन्नाशयास्ते ॥' इति श्लोके । 'यश्च कल्कीभविष्यन्' इत्येतत् 'भाविन्या दशया भवन्' 'कल्कवाहनदशाकल्किन्' इति च तदवतरणवर्णनस्य सुसदृशमिव । 'किं पात्रमन्नदाने क्षुधितं कोऽर्च्यो भगवदवतारः । को भगवान्महेशः शंकरनारायणात्मैकः ।' इति शंकराचार्याः प्रश्नोत्तरमालिकायाम् । 'अन्नस्य क्षुधितं पात्रम् ।' आर्तार्तिपरिहरणेनैव करुणैकजीवितो भगवानात्मानं धारयेत् । आर्तिपरिहरणेनैव तत्करुणाया लब्धावकाशता । सदा क्षुधिता बुभुक्षिता भगवद्दया । घस्मरत्वमपि तस्या भवति । जगद्दुरितघस्मरा दयाशिशीरिता भगवदाशयाः । प्रणमदपराधास्तद्दयायाः प्रियमन्नपानम् । आर्तिपरिहरणं च तस्याः प्राणनम् । एतद्व्यज्यत इव श्रीशंकराचार्यैः क्षुधितस्यान्नपात्रत्ववर्णनानन्तरं भगवदवतारस्यार्च्यत्वं निर्धारयद्भिः । यथा क्षुधिता अन्नं याचन्ते तथार्तजनेभ्योऽर्चां याचते भगवानस्मल्लोकमागत्य । अञ्जलिं याचमानः कश्चित्खलु सः । 'अहमन्नमहमन्नम्' इति सततगीयमानमुक्तगीतया सङ्कीर्तनमात्रं क्रियते परमपदे । शाब्दस्यान्नस्यैव लाभस्तत्र । न को-

ऽप्यपराधी तत्र। नाप्यार्तः। आर्त्यपराधात्यन्ताभावे क्षमादयादिजीवितेन भगवता कथमात्मधारणं लभ्येत। तदलाभेन क्षुधार्तो भगवानार्तिभूयिष्ठामपराधभूयिष्ठां बह्वन्नवतीं भुवमवतराति। ताभ्यां संपन्नानाढ्यानस्मांश्च याचते तदन्नं क्षुन्निवृत्तये। तं चाभ्यागतं वयं सम्यगाराधयितुमर्हामस्तन्निकटेऽस्मदार्तिनिवेदनेन 'क्षमस्व' इत्युक्तिपूर्वकमस्मदपराधसहस्रोपहरणेन च ॥

अवतरन्तं च देवं देवी छायेवानुगच्छति। यथा सूर्यस्य देवी छाया, तथा 'सूर्यस्यापि भवेत्सूर्यः' इत्युक्तसूर्यसूर्यस्य श्रीः छाया। यथा स नटो भवति तथा सा नटी भवति। यथा सर्वगतो विष्णुस्तथा चेयम्। यथा स सर्वयोनिषु गच्छति तथेयमपि। तदपि व्यज्यत इव सर्वगतशब्देन। विभोर्विष्णोर्विभवपरिग्रहस्तया सहैव। 'यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं क्रीडेयं खलु नान्यथास्य रसदा स्यादैकरस्यात्तथा।' ब्रह्मचर्याश्रमस्थस्यापरिग्रहत्वनिर्बन्धोऽपरिहार्यः। तथापि तां न जहाति। यत्तदाश्रमलिङ्गं कृष्णाजिनं तेनैव विद्युद्द्योतवतीं वक्षःस्थलगतां तां संवृणोति। सर्वलोकस्य पश्यतो वामनेनाणीयसा त्रिविक्रमभवनं नाद्भुतम्। ब्रह्मचारिणः सपत्नीकत्वम्, निरतिशयदीप्तिमत्यास्त्वे-

जोराशेर्भगवत्प्रभाया वक्षःस्थलविद्योतमानाया अजिनमात्रेण वैरोचनसदसि संवरणं चात्यन्तदुर्घटम् । दम्पती दिदृक्ष्ये- यातां भक्तजनैः । तद्दृष्टिगोचरीभवनं मुख्यं प्रयोजनम् । इतरदसुरनिरसनादिकं तदानुपङ्गिकं चशब्दसंगृहीतम् । 'श्रियं लोके देवजुष्टामुदाराम्' इति श्रुतिश्चान्वर्थनीया । यथा वैकुण्ठे परे लोके श्रिया सार्धममेयात्मास्ते, तथास्मिन्नवरे मानुषे लोके देव्या सह मेयात्मामेयात्मा चावतरति । करुणा खल्ववतारे निमित्तम् । अवतारकार्यं कृत्स्नं करुणाकार्यम् । तच्च करुणामिव रूपिणीं तां विना न घटेत ॥

अस्मिंस्तोत्रे आचार्यैर्मुख्यतया प्रतिपिपादयिषितं किमिति चेदवतारभूमिकानामपि ब्रह्मवद्बृहत्त्वम् । सशैलवनकाननार्णवस्य जगतो ब्रह्मशरीरत्वेन तच्छरीरैकदेशत्वेन च प्रदर्शनं ब्रह्मणो बृहत्त्वमुपपादयेत् । यदि ब्रह्मणो भूमिकानामेव वाङ्मनसातीतं बृहत्त्वमध्यक्ष्येत किमु वाच्यं भूम्नस्तस्य निरतिशयबृहत्त्वे । ब्रह्मलक्षणवर्णनशब्दैर्निरतिशयबृहत्त्वमुपलक्ष्यमिति भाषितम् । यदा लक्ष्यं ब्रह्मैवावतरति तेनापि निरतिशयबृहत्त्वोपलक्षणं न्याय्यम् । कृत्स्नस्य जगतस्तदाधेयत्वतच्छेषत्वतन्नियाम्यत्वानां सकलमनुजनयनविषयतया प्रदर्शनेन विश्वस्य शास्त्रादवगतं ब्रह्मशरीरत्वम-

परोक्षितं स्यात् । कारणत्वविशिष्टं तदुपलक्षितं वा ब्रह्म जिज्ञास्यत्वेन विहितम् 'तद्विजिज्ञासस्व' इति । तादृशस्य ब्रह्मणो ध्येयत्वं विहितम् 'कारणं तु ध्येयः' इति । उभयविभूतिविशिष्टं ब्रह्मैव फलदशायामनुभाव्यम् । 'सर्वं खल्विदं ब्रह्म तज्जलान्' इति शाण्डिल्यश्रुतिः कृत्स्नस्य जगतो ब्रह्मात्मकतयानुसन्धानमुपदिशति तज्जलानिति हेतूपन्यासपूर्वकम् । दहरविद्या यद्यप्यन्तःकलेवरं सुसूक्ष्मं दहराकाशमन्वेष्टव्यत्वेन विदधाति, 'उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते' 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः' इत्यादिना तस्य निरतिशयबृहत्त्वमपि कथयति । श्रीशंकराचार्याश्च तदधिकरणभाष्ये 'अस्मिन्कामाः समाहिताः, एष आत्मापहतपाप्मा' इति हि प्रकृतं द्यावापृथिव्यादिसमाधानाधारमाकाशमाकृष्य 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्' इति समुच्चयार्थेन चशब्देनात्मानं कामाधारमाश्रितांश्च कामान्विज्ञेयान्वाक्यशेषो दर्शयति । तस्माद्वाक्योपक्रमेऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः सहैवान्तस्थैः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय उक्त इति गम्यत इत्यभाषिषत । कृत्स्नविशिष्टब्रह्मण उपासनं तेषां संमतम् । विशेषणत्वञ्चाधेयत्वादि-

नेति स्पष्टमुक्तम् । भूमविद्या सर्वस्य जगतस्तदुत्पन्नत्वं श्रावयति । सद्विद्या चास्य जगतः सन्मूलत्वसदायतनत्वसत्प्रतिष्ठत्वप्रदर्शनेन सदात्मकत्वं निगमयति । तदेव जन्मादिहेतुत्वं तज्जलानिति सङ्ग्रहेण सूच्यते शाण्डिल्यश्रुत्या । आत्मनः सर्वसुखहेतुतयान्वेष्टव्यतां पत्नया उपदिशन्याज्ञवल्क्यः 'इदं सर्वं यदयमात्मा' इत्यात्मनः सर्वात्मकतां बोधयति । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति लक्षितस्य ब्रह्मण आनन्त्यरूपनिरतिशयवृहत्त्वोपादनाय सर्वस्य तत्संभूतत्वं दर्शयति 'आत्मन आकाशः संभूतः' इत्यादिना । य आकाशस्तार्किकैर्नित्यत्वेन निर्णीतः सोऽप्याकाश एतस्मादात्मनः संभूत इति प्रथमं प्रदर्श्यते । यद्यपि तार्किका ईश्वरम्, तस्य निमित्तकारणत्वं च मन्वते, न ते ब्रह्म निरतिशयवृहत्त्वेन मन्वते, जगतस्तदुपादेयत्वानभ्युपगमात्, उपादानत्वानभ्युपगमे वस्तुपरिच्छेदस्यापरिहार्यत्वात्, तत्परिच्छेदे सत्यानन्त्यरूपानिरातिशयवृहत्त्वस्यासिद्धेः ॥

इदमेव चारु व्यनक्ति श्रुतिः 'नावेदविन्मनुते तं बृहन्तम्' इति । अवेदवित्तार्किकादिर्यद्यपि ब्रह्म मनुते, तद्बृहन्न मनुत इति तदर्थः । वैश्वानरविद्या स्पष्टमेव स्वर्लोकवाताम्बरादेर्भगवदवयवत्वं ब्रवीति । मुण्डके च द्युभ्वाद्यायतनत्वं वर्ण्यते

'जगत्सर्वं शरीरं ते' इति प्राचेतसगुरोर्ब्रह्मणो वचनं वर्ण्यते प्राचेतसेन रामाभिधानं हरिं प्रति। 'तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा। अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा॥' इति भगवतो विश्वरूपे कृत्स्नं विश्वमर्जुनो ददर्श। शिशोः कृष्णस्य वक्त्रे विश्वं ददर्श यशोदा। सार्वात्म्यविशिष्टभगवदैकात्म्यप्रत्ययसारैर्मुमुक्षुभिर्भवितव्यम्। तथैव तैः सदा अनुसन्धानं कार्यम्। 'ऐकात्म्यप्रत्ययसारं शान्तिसमृद्धममृतानन्दम्' इति माण्डूक्योपनिषद्विशिष्टैकात्म्यानुभवेनैकरस्यं बोधयति। इदमेव विशिष्टाद्वैतदर्शनं भवति। 'अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम्' इति वदन्त आचार्या एतदेव तत्त्वदर्शनं विदधति। 'पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान्। वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥' इति पृथक्त्वज्ञानं भगवता राजसत्वेन जगर्हे। 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते। अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥' इति सात्त्विकज्ञानं लक्ष्यते भगवता। तदेव सम्यग्दर्शनं स्यादिति भगवन्मतम्। तच्च जगद्विशिष्टब्रह्मण एकत्वेन ऐकात्म्यप्रत्ययसारतयानुभवः स्यात्। एतस्य श्लोकस्यैवमर्थवर्णनं शक्यम्। 'ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते। एकत्वेन पृथक्त्वेन बहुधा विश्वतो मुखम्॥'

इति गीताश्लोकभाष्ये 'बहुधा पृथक्त्वेन जगदाकारेण विश्वप्रकारमवस्थितं मामेकत्वेनोपासते । एतदुक्तं भवति— भगवान्वासुदेव एव नामरूपविभागानर्हातिसूक्ष्मचिदचिद्वस्तुशरीरः सन् सत्यसंकल्पो विविधविभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरः स्यामिति संकल्प्य स एक एव देवतिर्यङ्मनुष्यस्थावरान्तविचित्रजगच्छरीरोऽवतिष्ठत इत्यनुसन्दधानाश्च मामुपासते' इति भाषितम् । तादृशसर्वप्रकारविशिष्टैकब्रह्मणोऽनुसन्धाने वासुदेवमन्त्रस्य तात्पर्यमिति तात्पर्यचन्द्रिकायां प्रदर्शितम् । अत एव भगवता 'वासुदेवः सर्वमिति प्रपद्यते' इत्युक्तमिव । सर्वविशिष्टैकविशेष्यब्रह्मज्ञानं सम्यग्दर्शनम् । तादृशज्ञानेनैकरसता, शान्तिश्च सम्यक्सिद्ध्येतामिति शाण्डिल्यश्रुतिः स्पष्टं ब्रवीति । सर्वभूतानां ब्रह्मात्मकत्वेनानुसन्धानं सर्वत्र समदर्शनमावहति, मित्रामित्रकथां कथाशेषतां नयतीत्यशेषसाधूपमानभूतप्रह्लादस्यानुभवः । जगतो ब्रह्मशरीरत्वं श्रुतिः श्रावयतीति न केऽपि विप्रतिपद्यन्ते । शरीरत्वं चान्तः स्थितेन ब्रह्मणा नियाम्यत्वरूपमिति 'यः पृथिव्यां तिष्ठन् पृथिवीमन्तरो यमयति यस्य पृथिवी शरीरम्' इत्याद्यन्तर्यामिब्राह्मणे स्पष्टं श्राव्यते । परमात्मनियाम्यं कृत्स्नं जगदिति सर्वेऽभ्युपगच्छन्ति । शरीरप्रतिसंबन्धी

आत्मशब्दो नियन्तृचेतनवाची । शरीरशरीरिभावेन तयोः सामानाधिकरण्यं समर्थ्यते न्यायामृततरङ्गिण्याम् । कृत्स्नस्य जगतोऽस्माकं च स्वात्मकत्वं निरस्य भगवदात्मकत्वेन तदपृथक्त्वेन तदद्वैततया अद्वैतानुभवोऽस्माभिः सततमभ्यसनीयः । आरम्भणाधिकरणोक्तानन्यत्वं ब्रह्मव्यतिरेकेणाभाव इति श्रीशाङ्करभाष्ये । 'अनन्यत्वमिति नाभेदं ब्रूमः, किं तु भेदं व्यासेधामः' इति तदधिकरणभामत्यभेदेऽरुचिं कण्ठरवेण ब्रवीति । 'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते' इति श्लोकभाष्ये 'पर्युपासते सर्वकल्याणगुणान्वितं सर्वविभूतियुक्तं मां परित उपासते अन्यूनमुपासते' इति भाषितम् । 'अन्यूनमित्यखण्डितगुणविभूतिकमित्यर्थः' इति चन्द्रिका । इममखण्डार्थमखण्डानुभवं च वयं रोचामहे । विशिष्टस्याद्वैतेनानुभवमभ्यसिषिषामो न विशेष्यमात्रस्य निर्विशेषाद्वैतम् । 'एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति' इति कठवल्ली धर्माणां विशेषणानां ब्रह्मणः पृथग्दर्शनमनर्थहेतुतया निन्दति । विश्वस्य भगवच्छरीरत्वं तदन्तस्थत्वं च प्रत्यक्षं निदर्शितमर्जुनस्य निजैश्वररूपदर्शनेन भगवता । यद्यपि न तावन्मात्रमैश्वररूपप्रदर्शनमवताररूपेषु सर्वेषु, यथा विश्वरूपे, अस्त्येव तत्रापि ब्रह्मत्वप्रदर्शनं नियाम्यजगाद्विशि-

ष्टब्रह्मानुभावनं चेत्यस्मिंस्तोत्रे आचार्यैः सम्यक्प्रदर्श्यत इति प्रदर्शयिष्यते । तत्त्वप्रदर्शनमवतारकृत्यम् । जगन्नियन्तृ जगद्विशिष्टं निरतिशयबृहद्ब्रह्मैकमेव तत्त्वमित्यवतारैः सकललोकसाक्षिकं प्रदर्श्यते ॥

यत्किंचिद्विशेषमात्रविशिष्टानुभवः खण्डानुभवः स्यात् । सर्वविशिष्टस्य कथं खण्डत्वम् । सर्वविशेषविशिष्टं कथमनुभवपथं गच्छेदिति चेत्— सर्वविशेषाणां ब्रह्मकार्यत्वशेषत्वाद्यनुगतैकाकारेणेति ब्रूमः । एवमेवैकब्रह्मज्ञानेन सर्वविज्ञानसमर्थनं श्रुत्या । सद्विद्याप्रतिपाद्यस्य कारणस्य यथाकथंचिद्विशिष्टत्वमेव सर्वैरभ्युपगम्यत इति चारु प्रदर्श्यते आचार्यैः 'मायोपाधिस्वशक्तिव्यतिकरितपरब्रह्ममूलः प्रपञ्चो येषां तेऽप्यद्वितीयश्रुतिमवितथयन्त्यत्र तत्तद्विशिष्टे । अप्राधान्यात्तथा नः प्रकृतिपुरुषयोरन्तरात्मप्रधाने वाक्येऽस्मिन्स्थूलसूक्ष्मान्वय इति जगतोऽनन्यभावोपपत्तिः ॥' इति श्लोके । विशिष्टानुभव आवर्तनीयो निरन्तरमन्यूनपूर्णोपासनलाभाय । प्राप्यानुभवो विशिष्टः । 'यदेवेह तदमुत्र यदमुत्र तदन्विह' इति श्रौतप्रदर्शनमनुसृत्य प्राप्यानुभवो यथाशक्त्यत्रैवाभ्यसितुमुचितः । द्वितीयादर्शनं वदन्ती श्रुतिः 'न ततोऽन्यद्विभक्तमस्ति यत्पश्येत्' इति द्वितीयविभक्तपदार्थस्याभावं नि-

षेधगम्यत्वेन बोधयति ॥

सूत्रकारश्च कार्यस्य कारणानन्यत्वं सूत्रयति, नैक्यम् । फलदशायां चाविभागमेव प्रतिजानीते 'अविभागेन दृष्टत्वात्' इति, नैक्यम् । 'तन्निष्ठस्य मोक्षोपदेशात्' इति सान्निष्ठां मोक्षोपायतया सूत्रयति । स्वमात्रविश्रान्तिरूपस्वनिष्ठता न मोक्षप्रापिका । कृत्स्नस्य चिदचित्प्रपञ्चस्य तदन्तर्गतस्य स्वस्यापि ब्रह्ममयता भावनीया अभ्यसनीया सात्मीकार्या च । तादृशानुभवः प्रमा । पृथक्त्वानुभवो भ्रमः । प्रपन्नश्च ब्रह्ममयतां प्रपन्नः स्यात् । 'त्वां चिन्तयंस्त्वन्मयतां प्रपन्नः' इति वदन्त आचार्या एतत्सूचयन्तीव । शास्त्रेणैतदात्म्यमिदं सर्वमित्युक्ते स्वव्यतिरिक्तस्य सर्वस्य ब्रह्मापृथक्त्वं झटित्यभ्युपगच्छामः तदपृथक्त्वस्यास्मत्प्रत्यक्षानुभवाविरुद्धत्वात् । अस्माकं तदपृथक्त्वे न तूर्णं विश्वसिमः, पृथक्त्वाभिमानस्यास्माकमत्यन्तदृढत्वात् । शास्त्रवासनया सुदृढश्रद्धया दृढाभ्यासेन च स्वपृथक्त्वबुद्धिर्व्यपोह्येत । अत एव श्रुतिः प्रथमं सर्वस्येदम ऐतदात्म्यरूपं सदात्मकत्वमुपदिश्यान्ते 'तत्त्वमसि' इति संबोध्यशिष्यस्यापि सदात्मकत्वं बोधयति । स्वपर्यन्तमैतदात्म्यानुभवे कृत्स्नप्रपञ्चस्य तदात्मकता अनुभवारूढा भवेत् । एतत्क्रमेणैव भगवान् धर्मराजः 'सकलमिदं

वासुदेवः' इत्युक्त्वानन्तरम् 'अहं च वासुदेवः' इत्याशङ्का-निरासकचशब्दपूर्वकमात्मनो वासुदेवात्मकत्वं वदति । नाहं मत्प्रकारो मन्निष्ठो मदात्मकः । अहमित्युक्ते मत्प्रकारं ब्रह्मेत्येव शास्त्रीयो बोधोऽनुभवश्च न्याय्यः । चिन्तितनिमिषितसर्वचेष्टितानि तेनैव निर्वर्त्यन्त इति सदा भाव्यम् । 'यस्य नाहंकृतो भावः' इति गीतावचनमनुसृत्याहंकृतत्वबुद्धिं निरस्य ब्रह्मकृतत्वबुद्धिः परिचेया । यथानेककोट्यवयवविशिष्टैकदेहिन एकत्वेनानुभवः सुलभः सहजश्च तथा विश्वदेहिन एकत्वानुभवं परिचिनुयाम । 'दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् । सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ।' इति श्रीशंकराचार्याः ॥

'ब्रह्मस्वभावो हि प्रपञ्चः, न प्रपञ्चस्वभावं ब्रह्म ।' प्रपञ्चगतजाड्यपरिमितत्वदुःखरूपत्वादीनि न ब्रह्मणि । ब्रह्मस्वभावभूतानुकूल्यानन्दत्वे प्रपञ्चस्य निजं वास्तवं रूपम् । तद्व्यक्तीकरणे सर्वस्याप्यानन्दमयत्वेनैकरस्यं भवेत् । तदयं सर्वदास्माभिर्विशिष्टैकब्रह्मानुभवोऽभ्यसनीयः । 'सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य व्यक्तिं तन्मुक्तिकाले भजति' इत्याचार्याः । अवताराणां भूमिकात्वेन रूपणे रङ्गे तत्परिग्रह उचितः । श्रीरङ्गे दशावतारमूर्तीः पश्यामः ।

तदुच्यते 'निर्वर्तयन्भूमिकां रङ्गे धामनि' इति। नटस्य रङ्गं कुलधनं यथा तस्य नाट्यविद्या कुलविद्येति गणदासः। नटस्य रामस्य कुलधनं स्याद्रङ्गम्। अत एव 'रामादीनां कुलधनमिदं रङ्गतां याति रङ्गम्' इति ॥

'हा हन्त हन्त भवतश्चरणारविन्दद्वन्द्वं कदा नु भविता विषयो ममाक्ष्णोः। योऽहं निरर्गलविनिर्गलदन्धकारैर्वृक्षैस्तृणैश्च सुलभं समयं व्यतीतः ॥' इति श्रीवत्साङ्कमिश्राः कोसलजनपदस्य कृत्स्नतृणवृक्षपशुपक्षिमनुष्यादिप्राणिसामान्यमोक्षेण समयातीतत्वं शोचन्ति। कृष्णावतारे राससमये यमुनापुलिनसिकतभावालाभं च शोचन्ति। 'हा जन्म तासु सिकतासु मया न लब्धं रासे त्वया विरहिताः किल गोपकन्याः। यास्तावकीनपदपङ्क्तिजुषोऽजुषन्त निक्षिप्य तत्र निजमङ्गमनङ्गतप्तम् ॥' इति। इन्दोः शीतरश्मित्वं विरहिजनेष्वयथार्थम्, यस्मादिन्दुस्तेषु हिमगर्भैर्मयूखैरग्निं विसृजतीत्युक्त्वानुपदमेव 'शक्यमरविन्दसुरभिः कणवाही मालिनीतरङ्गाणाम्। अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः ॥' इति शैत्यसौरभ्यादियुक्तपवनस्यानङ्गतापशमनत्वमवर्णयन्महाकविः। 'पद्मसौगन्धिकवहं शिवं शोकविनाशनम्। धन्या लक्ष्मण सेवन्ते पम्पोपवनमारुतम् ॥' इति श्लोकस्य शिवशोकविना-

शनशब्दयोः पञ्चतापादनेन दुःखनिवृत्तिः खल्वर्थः । वज्र-सारीकृतकुसुमशरविद्धानां कामाग्नितप्तानां पञ्चता सुखाय भवेत् । मूर्च्छावस्थाया उपकारकत्वं वर्ण्यते शोकव्यथितानाम् 'मोहेन संस्तम्भयतेन्द्रियाणाम् । अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ।' इति । मलयपवनादेः कामाग्निसंधुक्षकत्वं कविसमयसिद्धम् । मदनतापः शीतवातेन न शाम्येत् । अनेनैवाभिप्रायेण 'अङ्गमनङ्गतप्तम्' इति तुल्यं शब्दं प्रयुञ्जानाः 'न यमुनासलिलकणवाहिशीतलपवनेन गोपिका मदनतापशान्तिमीयुः । किं तु यमुनासिकतस्थासु कृष्णपदपङ्क्तिषु निजमङ्गं विन्यस्य तापशान्तिमापुः' इत्यूचुः । यदुक्तं कविना 'द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ।' इति तस्मिन्प्रकरणे, तदपि स्वीकृतं श्रीवत्साङ्कमिश्रैः । यावान्बहुमानो दुष्यन्तस्य शकुन्तलापदपङ्क्तौ, तावांस्तदधिको व्यामोहो गोपिकानां कृष्णपदपङ्क्तिषु । इत्थं भिन्नकालत्वं शोचन्ति ते । श्रीवकुलभूषणा अतीतानवताराननुभवितुं तीव्रोत्कण्ठां प्रदर्शयन्ति वटतलशयितशिशुः सप्तलोकीं निगीर्येत्याद्यासु गाथासु । शिशुत्वादिविशिष्टं भगवन्तमनुबुभूषोर्वकुलभूषणस्य इन्दुं करस्थं काङ्क्षद्भिः शिशुभिस्तौल्यं संपद्यत इवेति चारु व्यञ्जयन्ति श्री-

मद्वरवरमुनयो वकुलभूषणान्तादिगाथाशतके । 'ब्रह्मन्कालान्तरकृतं तत्कालीनं कथं भवेत् । यत्कौमारे हरिकृतं जगुः पौगण्डकेऽर्भकाः ।' इति परीक्षिता पृष्टः श्रीशुकोऽनन्तस्य भगवतः कालोपाध्यतीतत्वं सदा वर्तमानस्वभावत्वं साक्षादपरोक्षत्वं च स्मरंस्तदनुभवे मग्नो विसस्मार श्रोतारं परीक्षितं कथकमात्मानं च । कृच्छ्राच्छनैर्लब्धबाह्यदृग्भिः प्रत्याह । 'सतां ह्ययं सारभृतां निसर्गो यदर्थवाणीश्रुतिचेतसामपि । प्रतिक्षणं नव्यवदच्युतस्य स्त्रिया विटानामिव साधुवार्ता ॥' इति । स्त्रीचित्तानां स्त्रीमयानां विटानां प्रियस्त्रीविषयस्मरणवार्तादिना वृत्तानुभवोऽपि वर्तमान इव प्रतीयेत । तथा ब्रह्मचित्तानां ब्रह्ममयानां ब्रह्मविदां वृत्तान्यपि तदवताररूपाणि वर्तमानवदनुभूयेरन् । दूरस्थितकामिनीविषयपुरावृत्तस्य वर्तमानत्वानुभवो नियतं भ्रमात्मकः, तद्वृत्तान्तस्य वर्तमानत्वाभावात् । भगवतस्तु सदा वर्तमानत्वात्तदनुभवो नावश्यं भ्रान्तिः स्यात् । अवताररूपाणां भावनाजन्यसंस्काररूपेण शिल्पिना चिन्तनारूपचित्रभित्तौ आलेखनीयावतारप्रसादेन सम्यग्लेखनं सुशकमित्याचार्याः प्रदर्शयन्ति सङ्कल्पसूर्योदयसप्तमाङ्के । 'विदुषश्चिन्तनां शक्त्या चित्रभित्तिं वितन्वता । शुद्धाशुद्धविभागार्हं विश्वं विलिखितं मया ॥'

इति संस्कारः । 'परिचयमहिमानं प्राप्य सञ्जातभूमा दिवि-षदनुविधेयो दिव्यसंस्कारशिल्पी । व्यलिखदनघरूपं विश्वमेतद्यथावच्चिरगतमपि दृश्यं चिन्तनाचित्रभित्तौ ॥' इति व्यवसायः संस्कारस्यालेखनकौशलमभिष्टौति । चिरगतस्याप्यवतारस्य वर्तमानत्वप्रतीतिप्रकारो वर्ण्यतेऽनन्तरश्लोके तेन 'प्रमाणप्रत्ययादत्र कल्पितान्यविकल्पतः । अपि भूतानि भावीनि भवन्तीव भवन्ति नः ॥' इति । भावनयैव चित्तभित्तौ लिख्यन्तेऽवताररूपाणि । अतीतान्यवताररूपाण्यतीतविषयिण्या भावनया लिख्यन्ते । भविष्यत्कल्किरूपं त्वागामिविषयिण्या भावनयेति विशेषः । भगवदनुग्रहेण सन्तोषेण आन्तरभावनामात्रेण विरच्यते इदमवताररूपशिल्पम् । यथाह विवेकः— 'नैतद्वाह्यैस्तूलिकावर्णकाद्यैः क्लृप्तं चित्रं किं तु सन्तोषलिप्तम् । नानाकारां भावनामेव शिल्पी शिल्पव्याजान्नूनमस्तोज्जगार ॥' इति । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्' इति श्रुतिमनुसृत्य भगवदवतारतनुर्भगवदनुग्रहेणैव चिन्तायां लिख्येत । 'हृदि मुग्धशिखण्डमण्डनो लिखितः केन ममैष शिल्पिना ॥' इति प्रश्नस्योत्तरं दीयते आचार्यैः सङ्कल्पसूर्योदये 'अखण्डब्रह्माण्ड प्रथमतरशिल्पी स भगवान्स्वयं पद्माजानिर्व्यलिखदिह चित्रं

स्वविषयम्' इति । एतत्स्तोत्रश्लोकाः प्रायेण तत्सप्तमाङ्के दृश्यन्ते । चेतःस्थितिमण्टपे संस्कारशिल्पिना लिखितानि भावनामयावतारशिल्पानि विवेकः सुमतिश्च पश्यतो व्यवसायेन सह । भावनया अस्माकं चित्तभित्तौ पुरावृत्तावतारूपान् लेखयितुं यथानुभवमुल्लेखनं क्रियते आचार्यैः । निर्वर्त्यमाना भूमिका भावनाभूमिकाः । 'भजसि मनसि नित्यं भूमिकां भावनाख्याम्' इत्याचार्याः पादुकां प्रत्यन्तिमपद्धतौ । किंचिदूनसहस्रश्लोकैर्मुहूर्तकालं निबिडं निपुणं भाविता पादुका भावुकाचार्यमनसि स्वभूमिकामातनोतीत्याचार्यानुभवः । तादृशोऽनुभवोऽस्माभिरपि संपाद्येत, यदि वयमाचार्यश्लोकान्प्रत्यहं जल्पन्तस्तदर्थं च भावयेम । स्वभावितानवतारानस्माननुभावयितुमेवाचार्यप्रयत्नः । 'शुभमातनोतु' इति प्रार्थना 'शुभविग्रहमस्माकमाविष्कारयतु' इत्यप्यभिप्रैति । कथमध्यक्षणमात्रेण ब्रह्मानन्दोऽस्मदानन्दो भवेत्? एकेनानुभूयमानस्य दर्शनेन कथं द्रष्टुस्तदानन्दः? ब्रह्मानन्दोऽन्यूनातिरिक्तं नित्यमुक्तैर्लभ्यत इति वयमभ्युपगच्छामः । जीवब्रह्मणोरानन्दस्य साम्ये तयोरप्यैक्यं नियतमित्याक्षिप्येत । शारीरकशास्त्रार्थदीपिकायां श्रीमद्रङ्गरामानुजमुनिर्निभरानन्दस्य स्वकीयत्वमनपेक्षितमिति वर्णयन्ति । रसस्य

स्वभावोऽयम्, यद्भावुकानामपि तुल्यरसतेति । रसरूपस्य भगवतो रसस्यापरोक्षणे तत्तुल्यो रसोऽनुभूयेत तदनुग्रहेण तत्प्रियतमैर्नित्यमुक्तैः ॥

यद्यत्पश्यामस्तत्र तत्र परमविशेष्यभूतं परमप्राणभूतं सत्-सत्यात्मादिशब्दैरुपनिषद्भिरुद्घोषितं ब्रह्म प्राधान्येन वयमध्यक्षयितुमर्हास्तत्तज्जडाजडं चाप्राधान्येन । बोधे विशेष्यत्वं ब्रह्मणः । जडसरं समाप्यान्ते 'वायुर्दोधूयते यद्यदयमुडुगणो बम्भ्रमीति द्रुतं खे तेजो जाज्वल्यते यद्यदपि जलनिधिर्माधर्वी दोधवीति । भूर्येद्वा बोभवीति स्थिरचरमखिलं तच्च तादृक्च सर्वं स्वायत्ताशेषसत्तास्थितियमनपरब्रह्मलीलोर्मिचक्रम् ॥' इत्यद्भुतमुल्लिखितो जगद्विशिष्टब्रह्मानुभवो आचार्यैः । वेदान्ताचार्यो वृथा जडपदार्थस्वरूपं शोधयामास; नेदमध्यात्मशास्त्रमिति मा मथाः । अस्मद्दर्शनरीत्यानुभवे सर्वं जडम्, भगवतः सर्वाश्चर्यमयत्वमुपपाद्य तस्मिन्भक्तिं वर्धयेत् । तदर्थमेव भगवता भक्तियोगषट्के भूयो विभूतयः प्रादर्शिषत । 'गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् । वीक्ष्यमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम् ॥' इति सद्विद्यायाः प्रयोजनं परिदृश्यमानसर्वजडाजडपदार्थस्य ब्रह्मप्रतीतिजनकत्वमिति सुन्दरं प्रदर्शयन्ति श्रीशंकराचार्याः । 'यथा एकेन

मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्' इत्युपक्रम्य 'ऐतदात्म्यमिदं सर्वम्' इत्युपसंहरतः पितुरेषोऽभिप्रायः। 'यथा मृन्मयपदार्थेषु मृदमेव पश्यसि, लोहमयपदार्थेषु लोहमेव पश्यसि, कार्ष्णायसपदार्थेषु कृष्णाय एव पश्यसि, तस्य तस्योपादानत्वात्। तथा सर्वस्मिन्मृन्मये लोहमये कार्ष्णायसे इतरत्र च ब्रह्म पश्य, तस्य सर्वोपादानत्वात्तदात्मकत्वात्सर्वस्य। स्वस्मिन्नपि ब्रह्म पश्य, तवापि तदात्मकत्वात्। यावत्स्वस्मिन्विशेषे नैतदात्म्यस्योपसंहारस्तावन्न तस्यानुभवारूढता। 'अखिलजगत्स्वामिन्नस्मत्स्वामिन्' इति गद्ये अखिलजगत्स्वामी स्यान्न स्वस्वामी, स्वस्वातन्त्र्यस्यानादिदृढवासनामूलत्वात्। उपादानभूतब्रह्मप्रतीतिः सर्वैः कार्यपदार्थैरुत्पाद्या। विशेष्यमात्रस्य विवर्ततयोपादानत्वमद्वैते। विशिष्टस्य विशेषणगतपरिणामद्वारोपादानत्वमस्मन्मते। यद्यपि विशिष्टदर्शनं वयं सर्वत्राभ्यस्यामः, तथापि न ब्रह्ममयत्वप्रतीतिहानिः, तस्यैव प्राधान्येन प्रचुरत्वात्। अप्रतीकदर्शनं चेदम्। प्रपञ्चस्य निष्प्रपञ्चीकरणमद्वैते। तस्यापि ब्रह्मप्रचुरतानुभवो विशिष्टाद्वैते। सर्वस्य ब्रह्मात्मकत्वरूपसत्येन शेपे प्रह्लादः 'यथा सर्वेषु भूतेषु सर्वव्यापी जगद्गुरुः। विष्णुरेव तथा सर्वे जीवन्त्वेते पुरोहिताः॥' इति मृतपुरो-

हितान् जीवयिष्यन् । विशिष्टानुभवेऽपि विशेषणभूतस्य स्वस्य प्रपञ्चस्य च विस्मरणमपि प्रकाश्यते श्रीपराशरेण प्रह्लादानुभववर्णने । 'एवं संचिन्तयन्विष्णुमभेदेनात्मनो द्विज । तन्मयत्वमवाप्याग्र्यं मेने चात्मानमच्युतम् ॥ विसस्मार तदात्मानं नान्यत्किंचिदजानत । अहमेवाव्ययो नित्यः परमात्मेत्यचिन्तयत् ॥' इति । समाधेर्व्युत्थितश्च 'दृष्ट्वापि स जगद्भूयो गगनाद्युपलक्षितम् । प्रह्लादोऽस्मीति सस्मार पुनरात्मानमात्मना ॥' इति प्रथमं प्रपञ्चमनन्तरमात्मानं च विशेषणतया सस्मार । पूर्णानुभवमग्नदशायां विशेषणस्य विस्मरणं गुणायैव भवेत् । ब्रह्माधीनसत्ताकस्य स्वस्य विस्मरणमात्रं नात्यन्तमसत्त्वेति वयम् । अनुभूयमानानन्तब्रह्मेतरस्यात्यन्तं बाधितत्वमित्यद्वैते । विशेषणानि न पृथक् सन्ति, न स्वातन्त्र्येण सन्ति । 'परमार्थस्त्वमेवैको नान्योऽस्ति जगतीतले ' इति वयमप्यनुभवामः। 'प्रत्यक्षं चिदचिन्मयं जगदिदं यस्येत्यनुश्रूयते यश्चानन्यधियामनन्तविभवः प्रत्यक्षताम-श्नुते। यश्चैको युगपत्सदा स्वत इदं विश्वं दरीदृश्यते प्राज्ञं तं प्रतिपन्नमोक्षणविधौ दक्षं दिदृक्षेमहि ॥' इति प्रत्यक्षपरिच्छेदान्ते आचार्या न्यायपरिशुद्धौ। सर्वत्र ब्रह्मापरोक्षणं प्रत्यक्षस्य परिशुद्धिरित्याचार्याणामाशयः । जडवस्तुमात्रदर्शनं भ्रमात्म-

कम् । 'ज्योतींषि विष्णुर्भुवनानि विष्णुः' इत्यादिना सर्वत्र ब्रह्मदर्शनमुपदिश्यते श्रीपराशरेण । 'यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् । तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥' इति गीताश्लोकभाष्ये 'सर्वाणि भूतानि तैरदृष्टे मयि स्थितानि मयैव धृतानीत्युपधारय। यथाहुर्वेदविदः 'मेघोदयः सागरसन्निवृत्तिरिन्दोर्विभागः स्फुरितानि वायोः ॥ विद्युद्विभङ्गो गतिरुष्णरश्मेर्विष्णोर्विचित्राः प्रभवन्ति मायाः ।' इति विष्णोरनन्यसाधारणानि महाश्चर्याणीत्यर्थः । श्रुतिरपि 'एतस्य वा अक्षरस्य प्रशासनं गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' 'भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पञ्चमः ।' इत्यादिका इति भाषितम् । मेघोदयेत्यादिश्लोकः एवं व्याख्यातस्तात्पर्यचन्द्रिकायाम्— 'अस्मदाद्यगोचरोपादानोपकरणसंप्रदानादिकानां तत्क्षणादेव सकलदिङ्मुखव्यापिनां धाराधराणामुत्पत्तिः । सकलभुवनाप्लवनलम्पटस्यैव जलनिधेरम्बरालम्बिनां तरङ्गाणां वेलातले निवृत्तिः । प्रतिनियतकलावृद्धिक्षयशृङ्गोन्नमनादिरूपश्चन्द्रमसो विभागः । अशङ्कितागमानामनियतदिग्विशेषाणां तृणगिरितरुषण्डलुण्टाकानां चण्डमारुतादीनां विस्फूर्तयः, प्रशान्तदहनमिहिरमकरादिमह-

सि प्रावृषि निशीथेऽप्यविदितपूर्वोत्तरक्षणानां क्षणरुचीनां वि-भङ्गः। निरालम्बने विहायसि महीयसो मिहिरमण्डलस्य प्रतिनियतरजनिमासायनसंवत्सरादिदेशिकः सञ्चारः। एवं-विधान्यन्यानि च परिवेषोपरागेन्द्रचापकरकास्तानिताशनिभू-कम्पप्रभञ्जनभ्रमणादयोऽप्यद्भुतप्रकाराः सर्वे सर्वव्यापिनः सर्वशक्तेर्विष्णोरेव विचित्रसृष्टिशक्तिमूला भवितुमर्हन्तीति श्लोकार्थः' इति। सर्वाश्चर्यमयस्य भगवतोऽद्भुतमयत्वस्येदृशम-द्भुतप्रदर्शनं कुत्र वा पश्येम। आर्षो योऽनुभवः स भाष्यका-रैरन्वभावि। तदेवाचार्याः स्वयमनुभूयास्माननुभावयन्ति। शास्त्रेषु श्रुतं जगच्छरीरत्वमद्भुतमयत्वं च प्रत्यवतारं भगवता दृश्यं कृतं तदनुग्रहेण। वृत्तानामपि भावनाबलाद्भगवदनुग्र-हेण चेदीनामप्यपरोक्षता भवेदित्यत्र प्रदर्श्यते आचार्यैरिति दर्शयिष्यते॥

देवो नः शुभमातनोतु दशधा निर्वर्तयन्भूमिकां
रङ्गे धामनि लब्धनिर्भररसैरध्यासितो भावुकैः।
यद्भावेषु पृथग्विधेष्वनुगुणान्भावान्स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायिका॥

श्रव्यस्य दृश्यत्वापादनं नाटककृत्यम्। श्रवणविषयभूतौ दम्पती तदवतरणनाटकैर्दृश्यतामापाद्येते। अदृश्यावपि स्वा-

वतारैर्द्वेश्यौ भवतः। अतीतास्वप्यवतारदशासु तदनुपद्दसहकृतयास्मद्भावनयाध्यक्ष्येते ॥

देवः। १. रङ्गस्य मध्येऽत्यूर्जिततेजोवद्दीपोऽवश्यं निवेशनीयो नटान् शोभयितुम्, रङ्गशालां च दीपयितुम्। निशि नाटकं नाट्येत। संसारनिशीमानि नाटकानि प्रवर्त्यन्ते। दीपापेक्षायां देवं विहाय कोऽन्यो दीपः प्रकाशेत तत्संनिधौ। सहस्ररश्मेरपि सन्तमसपर्व खलु भवति तन्निकटे। स्वयंप्रकाशः सो नान्यतः प्रकाश्यतामर्हति। 'न तद्भासयते सूर्यो न शशाङ्को न पावकः।' तिष्ठतु भासकत्वम्। स्वयमेव न भासेरंस्तत्र। 'न तत्र सूर्यो भाति न चन्द्रतारकम्' तद्दूरे आत्मानं यदि भासयेयुस्तदपि तद्भासैव। 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' निरतिशयदीप्तियुक्तो द्योतमानोऽनन्याधीनस्वप्रकाशो देवः स्वयं दीपो भवत्यात्मानं सभ्यान् रङ्गं च भासयितुम्। २. निष्कलस्य निष्क्रियस्य शान्तस्यास्य कथं नटनसंभवः। क्रीडनशीलत्वादयं नटो भवति। यद्यपि सर्वेश्वरोऽयं देवनलोलत्वान्नानाकारभूमिकाः परिगृह्य नटति। ३. अयं विश्वस्य सूत्रम्। अस्मिन्सर्वमिदं प्रोतं सूत्रे मणिगणा इव। लोकत्रयसूत्रधारोऽप्ययम्। सर्वानप्ययं सततं यन्त्रारूढानिव भ्राम-

यति, नर्तयति । सूत्रत्वेऽपि सूत्रधारत्वेऽप्ययं सततनटः । सर्गस्थितिप्रलयविभ्रमनाटिकासु शैलूषवद्विविधवेषपरिग्रहो-यम् । ४. नायं सभ्येभ्यो ग्रहीता नटः । अयं तु दाता देवो नटः । ये स्वनाटकं पश्यन्ति तेषां सर्वस्वमात्मानमपि यच्छति । ५. अन्यः प्राकृतो नट आत्मानं प्रद्योतयेद्वर्ण-धारणादिना । अयं तु तेजसां राशिरूर्जितः । आत्मज्योति-षमावृणोति योगमायया ॥

नः शुभमातनोतु । १. शुभमिति शुभाश्रयविग्रहो गृह्येत, नामैकदेशे नामग्रहणम् । तेनैव खलु तद्विग्रहो लेखनीयोऽस्म-द्धृदि । शुभविग्रहमस्मच्चक्षुर्गोचरतया विस्तारयतु । 'विस्तार-यन् क्रीडसि योगमायाम्' इत्यवतारक्रीडावर्णनं ब्रह्मणा । योग-माया चाश्चर्यभूतशुभविग्रहः । 'तां देवमायामिव दिव्यरू-पिणीम्' इति श्रीरुक्मिणीदिव्यमङ्गलविग्रहविषये । २. शुभ-मिति भगवद्विग्रहापरोक्ष्यजनितानन्दसन्दोहोऽपि सङ्गृहीतः स्यात् । अस्माकमानन्दं तनोतु, 'लक्ष्मीं तनोतु' इतिवत् । ३. उपक्रमस्थंशुभमुपसंहारस्थश्शुभं स्यात् । एतत्स्तोत्रविच-क्षणे 'दिशासु दशसु ख्यातिः शुभा जृम्भते' इति फलमु-क्तम् । दशदिशासु जृम्भमाणा शुभा ख्यातिः शुभशब्देना-भिप्रेता स्यात् । यथावतारस्य ख्यातिः 'यशः कलिमलाप-

हम्' इति गीयते तथा तद्भावुकानां ख्यातिर्भूयात् । भावुकख्यातिरवतारख्यातौ पर्यवस्येत् । फलश्लोकोक्तं सर्वमत्र शुभत्वेन गृह्येत । ४. भूमिकां निर्वर्तयन्नः शुभमातनोतु इत्यन्वयः ॥

दशधा । मध्यमणिन्यायेनोभयत्रान्वेति । दशधा शुभमातनोतु, 'कृतं दशगुणं मया' इतिवत् । शुभगुणनमस्य सहजम् । तदर्थमेवायमवतीर्णः । शुभविग्रहं दशधा विस्तारयतु । एकस्यास्मत्प्रपन्नवेषस्य फलत्वेन दश वेषान्प्रदर्शयति रूपकं नाटकेषु दीर्घतमम् । तच्च दशाङ्कम् । अवतारसंख्यापि रूपाकाङ्कसंख्यासमाना । ब्रह्मावतारसंख्या न न्यूनाङ्कसंख्यया भवेत् । एकमिदं नाटकं दशाङ्कम । दशधा भूमिकां निर्वर्तयन्नः शुभमातनोतु ॥

निर्वर्तयन्भूमिकाम् । भूम्नोऽल्पभूमिकापरिग्रहस्य श्रमसाध्यत्वं पूर्वमुक्तम् । देहपरिमाणत्वमात्मनोऽभ्युपगच्छन्तो जैना अस्माभिः पर्यनुयुज्यन्ते हस्तिशरीरपरिमाणो जीवः पिपीलिकाजन्म प्राप्नुवन्न पिपीलिकाशरीरे संमीयेतेति ॥

रङ्गे धामनि । रङ्गं धाम गृहम् । अन्येषां सूत्रधारा नटानां च रङ्गमन्यद्गृहमन्यत्स्यात् । अयं तु सदा नटन्नशी

लत्वाद्रङ्ग एव वसति । रङ्गं विना वेषपरिग्रहं विना न क्षणमपीमाववस्थातुं शक्नुयाताम् ॥ भक्तार्तिपरिजिहीर्षया भक्तमनोरथानुरोधेन सदा भूमिकापरिजिघृक्षुः सज्जस्तिष्ठ-ति रङ्गे ॥

लब्धनिर्भररसैर्भावुकैः । १. रसस्य लब्धत्वमाश्चर्या-वहम् 'आश्चर्योऽस्य लब्धा' इति कठश्रुतिर्ब्रह्मरसलाभस्या-त्यन्तदुर्लभत्वं वदति । तच्छ्रुतिः प्रत्यभिज्ञाप्यते लब्धशब्देन । 'रसं ह्येवायं लब्ध्वानन्दी भवति' इति श्रुतिरपि सङ्गृह्यत इति पूर्वमुक्तम् । श्रवणयेव न लभ्येत बहुभिः । श्रवणेऽपि वेदनं दुर्लभम् । वेदनेऽपि प्राप्तिर्दुर्लभा । प्राप्तिश्च लाभश-ब्देनोच्यते । सा चानुभवगोचरतापत्तिः । तदेवोच्यते महाक-विना 'सङ्क्रान्तिरन्यस्य विशेषयुक्ता' इति । सङ्क्रान्तिरुच्यते श्रुत्या 'एतमानन्दमयमात्मानमुपसङ्क्रम्य' इति । आनन्द-वल्ल्युक्तवाङ्मनसागोचरानन्दो निर्भररस इत्युच्यते । निर्भर-रसः पूर्णरसः । पूर्णं ब्रह्म । रसो ब्रह्म । तद्विषयः पूर्णरस उचितः । स च नास्मत्प्रयत्नेन संपादयितुं शक्यः । नैर्भ-र्यरूपप्रपन्नत्वसंपादने संपूर्णो रसोऽनायासेन लभ्येत । नैर्भ-र्यलभ्यरसो निर्भरः पूर्णः स्यादिति चारु व्यज्यते निर्भर-शब्दग्रहणेन । २. 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति

इति भूमविद्या अल्पे रसजनकत्वं निषेधति । इयं भूम्नो भूमिका यद्यपि भूमापेक्षयाल्पा, अस्यां पूर्णसुखमित्यघटितघटकत्वं व्यज्यते । ३. 'नटवद्भूमिकाभेदैर्नाथ दीव्यन् पृथग्विधैः । पुंसामनन्यभावानां पुष्णासि रसमद्भुतम् ॥' इति श्लोकः पूर्वमेवोदाहृतः ॥

अध्यक्षितः । १. अधोक्षजोऽदृश्योऽध्यक्ष्यते भूमिकापरिग्रहेण । २. भगवान्नटश्चेत्कः सभाध्यक्षः । सभ्याः परकालादयस्तद्भक्तास्तं विना कमन्यं सभाध्यक्षं कुर्युः । अयं नट एव सभ्यैर्भावुकैरध्यक्षत्वेन स्थाप्यत इत्यपि चारु व्यज्यते । ३. सभ्यानेवायमध्यक्षान्मनुते । भावुकैरध्यक्षवदाचर्यते भगवद्बुद्धयेत्यपि व्यज्यते । अध्यक्षणीयावतारसंख्या दश, अध्यक्षकाभिनवदशावतारभूतभावुकसंख्यापि दश । ४. ब्रह्मरसस्य साक्षात्करणेनैव तद्रसोऽस्मान्सङ्क्रामति । एकस्य रसः कथमन्यस्याध्यक्षयितुः स्यादिति चेद्रसस्य स्वभावोऽयम्, यदेकत्रोत्पन्नमन्यान्द्रष्टॄन् सङ्क्रमेदित्येतदपि व्यज्यतेऽध्यक्षितो भावुकैरिति ॥

यद्भावेषु पृथग्विधेष्वनुगुणान्भावान्स्वयं बिभ्रती । पुमान् देवः शैलूषो भवेत् । स्त्रीवेषः प्रायेण पुंनटैः परिगृ-

ह्यते । न नटस्य पत्नी नटीवेषं परिगृह्णाति । असूर्यंपश्या शुद्धान्तस्त्री देव्यपि शैलूषी भवति । तस्या विभुत्वेऽप्यस्ति जगन्मोहिनी माया यवनिका, येन सा तिरोधीयत इति व्यञ्जयन्ति श्रीयामुनाचार्याः । वेषं परिगृह्य बहिरागमने सा दृश्येत सर्वैरपि जनैः । न केवलमुत्कृष्टदेवमनुष्यादियोनिष्ववतरति । पृथग्विधेषु निहीनयोनिष्वप्यवतरति नायकेन सह तच्छायाभूता । 'यस्तेन सह स स्वर्गो निरयो यश्च तं विना' इति खलु स्वर्गनरकव्यवस्था तस्याः । पृथक्छन्दो नानार्थको निहीनार्थकश्च । भावशब्दो जन्मपरोऽभिनेयहार्दभावपरश्च । नटनप्रकरणे भावशब्दस्य तदर्थं आवश्यकः । स्वयमिति छायावद्भर्त्रनुगमनाय नियोगनिर्बन्धाभावो द्योत्यते । न छाया अनुगमने नियुज्येत । नापि ततो निवार्येत । विधिनिषेधानर्हा तदतीतेयं छाया । सजीवेयं छाया । 'छायाः सजीवा इव धर्मदाराः' इत्याचार्याः ॥

यद्धर्मैरिह धर्मिणी । 'यथा सर्वगतो विष्णुस्तथा चेयं द्विजोत्तम' इति पराशरवचनं स्मार्यते ॥

विहरते । स्वसन्तोषार्थमेव भूमिकाः परिगृह्णातीत्यात्मनेपदेन व्यज्यते ॥

नानाकृतिर्नायिका । १. नानाकारवती । २. नानाविधकृतिमती । कृतिषु नायकमप्यतिशेते नायिका । 'लघुतरा रामस्य गोष्ठी कृता' इत्यादिकमत्र भाव्यम् । पृथग्विधेष्वनुगुणान्भावान्बिभ्रतीत्येव नानाकारपरिग्रह उपपादितः । अत्र नानाकृतित्वेन नायकादपि विविधाधिककृतिमत्त्ववर्णनं स्वरसं स्यादिति रसिकैर्भाव्यम् ॥

निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणै-
रन्तस्तन्वदिवारविन्दगहनान्यौदन्वतीनामपाम् ।
निष्प्रत्यूहतरङ्गरिङ्खणमिथः प्रत्यूढपाथश्छटा-
डोलारोहसदोहलं भगवतो मात्स्यं वपुः पातु नः ॥

अतिवृहद्भगवतो मात्स्यं वपुर्मकरालयं कृत्स्नं क्षोभयति । तिमिङ्गिलः, तिमिङ्गिलगिलः, तद्गिलस्तद्गिल इति गिलपरंपरा पठ्यते । विश्वनिगरणशीलोऽयं महागिलः । भगवदर्चाप्रतिमाया डोलोत्सवं वयं चिकीर्षामः । तदर्थं वयं डोलां निर्मिमीमहे । अतिवृहतो मात्स्यवपुषः के वा डोलां रचयितुं प्रभवेयुः । कुतो वा तदर्थदार्वायसशृङ्खलादीनि संपादयेरन् । डोलोत्सवं च दिदृक्षन्ति भक्ताः । 'किंस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः' इति पृच्छती श्रुतिः

'ब्रह्म वनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षत्' इत्युत्तरयति । भक्तच्छन्दानुवर्ती भगवान् स्वयं डोलारोहोत्सवं निर्वर्तयति । अस्मद्दोहदमनु तस्य दोहदो जायते । का डोला भवेदस्य महतो भूतस्य । मात्स्यं वपुर्द्वीप इव भवति । स्ववपुषा मकरालयं संक्षोभ्यात्युच्चदीर्घांस्तरङ्गानुत्पादयति । ते च तरङ्गा यद्यप्यन्यतो निष्प्रत्यूहा मिथः प्रत्यूढा भवन्ति डोलासंपादनाय । उत्सवडोला पद्मैरलंकृता स्यात् । कुतोऽस्याः समुद्रतरङ्गडोलायाः पद्मानि संपाद्येरन् । अन्तःसमुद्रे कथं तेषां संभवसंभवः । का गतिः । तत्कटाक्षा एव गतिः । तान्यपि विरच्यन्ते भगवत्कटाक्षैः । पुण्डरीकाक्षस्य वीक्षणैः पद्मवनानि सृज्यन्तेऽन्तःसमुद्रे लवणमयीष्वप्सु । भगवद्वपुरेव डोलोत्सवसामग्रीं कृत्स्नां स्वयं संपादयति । मीनस्याक्षीण्युपमानत्वेन प्रसिद्धानि । यदि पुण्डरीकाक्षो मीनो भवेत्तद्वीक्षणैर्विचित्रपद्मवनसृष्टौ कः संशयीत । मत्स्यावतारस्यातिबृहत्त्वं प्रपन्नजनानन्दसन्दोहप्रथनं च चारु वर्ण्यतेऽत्र रसिकमनोहारितया । मत्स्यावतारो श्रीमद्धयवदनावताराभिन्नः । 'मत्स्याश्वकच्छपवराह—' इति श्रीभागवते मत्स्याश्वयोरेकीकृत्य सहपठनम् । श्रीहयग्रीवं नमश्चक्रे सङ्कल्पसूर्योदयप्रथमाङ्के नाटकमारिप्समानः 'तदहम-

शेषविद्यासंपदुपलम्भिनीमभूतपूर्वबहुविधभूमिकापरिग्रहेऽप्य -
तिरस्कृतपारम्यामनवबोधजलधिकुक्षिंभरीमनन्यभक्त्युन्मीलि-
तामादिमां देवतामभ्युपगच्छामि' इति । अत्र भगवदनेक-
नाटकवर्णनप्रकरणे तन्नमस्क्रिययावतारवर्णनोपक्रमः स्वादुत-
मः कवीनाम् । 'एतस्मिन्नन्तरे राजन् देवो हयशिरोधरः ।
जग्राह वेदानखिलान् रसातलगतान् हरिः । प्रादाच्च ब्रह्मणे
राजन् ततः स्वां प्रकृतिं ययौ ॥' इति स्तोत्रभाष्योदाहृत-
भगवच्छास्त्रवचनान्यत्र भाव्यानि । मधुकैटभाविति मूर्त-
रजस्तमसी ज्ञानमयान्वेदानपजह्रतुः । रजस्तमसी निरस्य
सत्त्वमयवेदसंप्रदायप्रवर्तको मधुसूदनः । ज्ञानसंप्रदायप्रवर्त-
कत्वाद्गीताचार्यस्तन्नाम्ना भूयो निर्दिश्यते संबोध्यते गीता-
शास्त्र इति भाव्यम् । नष्टं योगं पुनः प्रवर्तयति गीतया ।
तथा चोक्तं स्वेनैव 'स कालेनेह महता योगो नष्टः परं-
तप । स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ॥'
शास्त्रारम्भे 'उवाच मधुसूदनः' इति । 'योऽयं योगस्त्वया
प्रोक्तः साम्येन मधुसूदन' इत्याचार्यसंबोधनं शिष्येण । मधु-
सूदनश्च विद्यामूर्तिः श्रीहयवदनः । लक्ष्मीहयग्रीवपरब्रह्मणे
नम इति प्रथममङ्गलपाठः सर्वेषु द्वैतग्रन्थेषु ॥

निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणैः । १. म-

त्स्यं वर्णयंस्तद्वीक्षणैर्जितो भवत्याचार्यः । अन्तर्जले मत्स्याक्षीणामेव प्रसरसंभवः । २. क्षणशब्दोऽवधानार्थकः, उत्सवार्थकश्च । मार्गणावधानव्याजेनास्माकमुत्सवप्रदैः मार्गणदशायां दत्तोत्सवैः । ३. श्रुतयः सर्वा अपि निःशेषं मग्नाः । श्रुतयः पुत्रस्य ब्रह्मणः, प्रजानां सर्वलोकानां च चक्षूंषि । 'वेदा मे परमं चक्षुः' इति रुरोद ब्रह्म । प्रजाचक्षूंषि वेदाः भगवद्वीक्षणैरन्विष्यन्ते । ४. ननु कथमयं सर्वज्ञमत्स्यः जालमन्विष्यतीत्युच्यते । भ्रान्ता मूढा मत्स्या बडिशभक्षणाय जालसमीपं गच्छन्ति, बद्ध्यन्ते म्रियन्ते चेति चेत्— अयं परमकारुणिको मत्स्यः श्रुतिजालं मार्गते, तेन बद्धो भूत्वा जनश्रवणेषु प्रविश्य तद्द्वारा तानुज्जीवयितुं च । एतद्व्यञ्जयति श्रुतिजालमार्गणेत्युक्तिः । ५. श्रवणस्य जले मग्नतायां निःशब्दतानुभवः सहजः । लोकश्रवणभूतश्रुतौ जले निर्भग्ने सशब्दता निवृत्ता भवति । ६. शब्दराशेरन्तर्जले मज्जने तस्यात्यन्तं मृग्यता स्यात् । तद्द्योत्यत इव निर्मग्नशब्देन । ७. 'मत्कुणाविव पुरा परिप्लवौ सिन्धुनाथशयने निषेदुषः । गच्छतः स्म मधुकैटभौ विभोर्यस्य नैद्रसुखविघ्नतां क्षणम् ॥' इति माघे क्षणशब्दप्रयोगो मात्स्यवपुर्वर्णने । तस्य क्षणशब्दस्यात्र विचित्रः प्रयोगः प्रदर्श्यते ॥

अन्तस्तन्वदिवारविन्दगहनान्यौदन्वतीनामपाम्। अन्तर्जले पद्मवनानि सृज्यन्ते डोलामलंकर्तुम्। लवणाम्भसि पद्मान्यन्तः सृज्यन्ते। तन्वच्छब्देन 'शुभमातनोतु' इति पूर्वश्लोकप्रार्थितं तत्क्षणमेव करुणामयेनान्वर्थीक्रियत इति व्यज्यते। शुभं डोलोत्सवं पद्मैस्तदलंकरणादिकं च तन्वदिव। काङ्क्षितशुभं तन्यते ॥

निष्प्रत्यूहतरङ्गरिङ्खणमिथः प्रत्यूढपाथश्छटाडोलारोहसदोहलम्। तरङ्गाः सहजाः समुद्रस्य भगवद्रूपमहामत्स्यविहारजनितहर्षेण भूयानानन्दक्षोभो भवति। निरतिशयबृहन्मत्स्यशरीरक्षोभजनिता यद्यपि तरङ्गा नेतरेण प्रत्यूह्येरंस्ते इतरेतरं मिथः प्रत्यूढा डोलां निर्वर्तयन्ति। समुद्रे वेगं यान्तो बृहन्तो धूमनावः सततं डोलायन्त इत्यनुभवसिद्धम्। तच्च डोलायितत्वं तरङ्गरिङ्खणमिथःप्रत्यूढपाथश्छटाभिः। एष एवानुभवः आचार्यैः सम्यक्प्रदर्श्यत इति रसिकैर्विभाव्यम् ॥

मात्स्यं वपुः पातु नः। डोलारोहोत्सवे वयमिमं मङ्गलश्लोकं गायामः। विभववपुःप्रदर्शनं विचित्रडोलारोहोत्सवप्रदर्शनं चास्मत्परित्राणम्। तद्विवक्ष्यते 'पातु' इति।

वीक्षणैः पातु नः । वीक्षणैः स्वप्रजाः संवर्धयन्ति मत्स्या इति प्रसिद्धम् । 'ईक्षणध्यानसंस्पर्शप्रमुखैः पोषयन्प्रजाः । मत्स्यकूर्मविहङ्गादिविग्रहः प्रेक्ष्यते प्रभुः ।' इति सङ्कल्पसूर्योदये । मात्स्यं वपुरिदानीमपि मनुराराधयतीति भागवते ॥

अन्यासुर्भुवनत्रयीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्मवपुषो निश्वासवातोर्मयः ।
यद्विक्षेपणसंस्कृतोदधिपयः प्रेङ्खोलपर्यङ्किका-
नित्यारोहणनिर्वृतो विहरते देवः सहैव श्रिया ॥३॥

कूर्मवपुषो बृहत्त्वाधारत्वामृतहेतुत्वादिवर्णनम् । स्वपृष्ठे मन्थाचल आरोपितः । स चातिवेगं बम्भ्रम्यते त्रयस्त्रिंशत्कोटिदेवैरसंख्यैरसुरैश्च इतस्तत आकृष्टोऽब्धिमथनाय । सहजशत्रवः सुरासुराः स्पर्धमाना अधिकमधिकं बलमुपयुञ्जते कर्षणे । मथनेनातिक्षुब्धः सिन्धुः । तुमुलः शब्दः । 'दधार पृष्ठेन स लक्षयोजनप्रसारिणा द्वीप इवापरो महान्' इति कमठपृष्ठस्यातिबृहत्त्वम् । मन्थभूतस्याद्रेः स्वपृष्ठे भ्रमणं पामकण्डूयनरूपसुखाय भवन्नस्याप्रमेयस्य । अनन्तरं तज्जनितसुखेनानघां निद्रामावहति । एतद्विचित्रं प्रदर्श्यते सङ्कल्पसूर्योदये 'कचिद्वाहाधीशः कचिदमरदन्तावलपतिः कचि-

त्प्रालेयांशुः कचिदमृतविष्फूर्जितमिति । अतिक्षोभे सिन्धो-रयमनघनिद्रो धृतगिरिर्विषादं देवानां विघटयति वैकुण्ठक-मठः ॥' इति । नष्टद्रव्यरूपोच्चैःश्रवसैरावतकल्पवृक्षादिलाभे तुमुलः शब्दो देवगणानां भवेत् । अब्धिरत्यन्तं क्षुभितः । धृतगिरिरयं वैकुण्ठकमठोऽनघं निद्राति । अयं कमठो सर्व-प्रकारैरकुण्ठो वैकुण्ठो ब्रह्मकमठ इति को वा विप्रतिपद्येत । यद्यप्ययमसुरान्वञ्चयति मोहनावतारेण, न तेषां हननमस्मिन्न-वतारे । ईदृशविचित्राघटितघटको भगवानेकमेव विघटयति । किं तदिति चेत् 'विषादं देवानां विघटयति ।'

अव्यासुः । पूर्वं मात्स्यवपुषः प्रार्थनम् । अत्र निद्राण-कूर्मदीर्घनिश्वासाः प्रार्थ्यन्ते । निश्वासैरस्मत्प्राणनं सुलभं खलु । प्राणनैः प्राणनं सुकरम् । प्राणभूतः परमात्मा प्राणान् जीवान् जीवयति । 'प्राणा वै सत्यं तेषामेष सत्यम् ॥'

भुवनत्रयीम् । पूर्वावतारेण वेदरूपत्रयी रक्षिता । अने-नापरा त्रयी त्रिभुवनरूपा रक्ष्यत इति व्यज्यते । 'वेदः' 'लोकः' इति भेदो व्यवहारसिद्धः ॥

अनिभृतं कण्डूयनैरद्रिणा । 'बिभ्रत्तदावर्तनमादिक-च्छपो मेनेऽङ्गकण्डूयनमप्रमेयः' इति शुकानुभवः प्रत्यभि-

ज्ञाप्यते । अनेनाप्रमेयत्वरूपबृहत्त्वं व्यज्यते ॥

निद्राणस्य परस्य कूर्मवपुषः । न केवलं कण्डूत्यपनायकत्वमत्रावर्तनस्य । निद्राहेतुत्वमपि ॥

निश्वासवातोर्मयः । १. पूर्वमपहृतवेदोद्धारः । इदानीं स्वनिश्वसितैर्वेदनिश्वारणम् । २. अस्य महतो भूतस्य निश्वसितमित्यादिश्रुतिः कूर्मविषयिणीव । महान् भूतः कूर्मः स्यात् । विष्णुरिदं महद्भूतम् । ३. महान्क्षोभः समुद्रस्यैतन्निश्वासवातजनिततरङ्गैः । न तथा क्षोभोऽद्रिणा मथनेन । ४. कूर्मनिश्वासितभूता वेदा भुवनत्रयमवन्ति धर्मोपदेशेन । धर्मेण लोको ध्रियेत ॥

यद्विक्षेपणसंस्कृतोदधिपयः प्रेङ्खोलपर्यङ्किकानित्यारोहणनिर्वृतः । १. पूर्वं मथनेनाप्यसंस्कृत उदधिः । प्राकृतः पूर्वम् । इदानीं वेदरूपनिश्वसितरचितोर्मिविक्षिप्तः संस्कृतो भवतीति व्यज्यते । निश्वसितोर्मिविक्षेपणैः संस्क्रियते उदधिः । वेदवाततरङ्गैः स संस्कृतीक्रियत इव । २. डोलारूढा पूर्वश्लोके । इदानीमान्दोलितपर्यङ्कारोहो योगनिद्रासौकर्यार्थ । ३. वेदमन्त्रभूतः संस्कृतः पर्यङ्क उचितो धर्मसंस्थापनार्थमवतीर्णयोः सनातनधर्मस्वरूपदम्पत्योः । श्रुतयः शय्या भव-

न्तीति प्रसिद्धम् । 'तल्पं कल्पान्तयूनः ।' अत्र श्रुतिरूपनिश्वसितसंस्कृतमयः पर्यङ्कीभवति । ४. प्रेङ्खोलपर्यङ्किका सद्यः प्रादुर्भूतया नववध्वा श्रिया सह शयनायातीव भोग्या स्यात् । चन्द्रस्तदानीमेवोत्पन्नः । अमृतं च नवं प्रभूतम् । चिरविरहिता नवा वधूर्वक्षस्थलमारूढा पश्यतां सर्वदेवानाम् । तया सह नित्यमेव कूर्मत्वेन पर्यङ्किकामारुह्य निर्वृणोति । आरूढया सह देव्या पर्यङ्कारोहः । ५. यथा वक्षःस्थलारोहो नित्यस्तथा तया सह पर्यङ्कारोहोऽपि नित्यः । कूर्मावतारस्यावतारान्तरत्ववत्कालावच्छेदो मास्तु । श्वशुरगृहे क्षीराब्धावेवायमवतारः । नवां रक्तां वधूं प्रेङ्खोलपर्यङ्किकां च लब्ध्वा नित्यारोहमेव काङ्क्षतीति नित्यशब्देन व्यज्यते । पर्यङ्कोऽतिस्वच्छश्वेतपटैराश्रियेत । पयःपर्यङ्के तत्साम्यं सुलभम् । ६. डोलासेवा वृत्ता । इदानीं पर्यङ्कसेवा लभ्यते भक्तजनैः ॥

सहैव श्रिया । यदर्थमम्भोधिरमन्थि तां श्रियमसितेक्षणां विना क्षणमपि न जीवेत् । कूर्मवपुरिति नोद्विजते सा । तीव्रं नित्यं कामयते । तद्वपुश्च तस्या नित्यं रोचते । वेदप्राप्त्यनन्तरं स्थितप्रज्ञो वेदार्थं ध्यायेत् पुरुषः । 'यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।' इति कूर्मसादृश्यं प्रत्याहरणव्यापृतस्य ध्यातुः ॥

गोपायेदनिशं जगन्ति कुहनापोत्री पवित्रीकृत-
ब्रह्माण्डः प्रलयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः ।
यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थिति-
र्ब्रह्मस्तम्बमसौदसौ भगवती मुस्तेव विश्वंभरा ॥

नष्टा श्रीर्लब्धा कूर्मवपुषा। नष्टा भूमिर्लभ्यते वराहवपुषा । तस्यां भूयान्बहुमानो भगवतः । वक्षःस्थलेन वरुणालयराज-कन्यां संभावयति । भूमिं तु शेषात्मना सहस्रैः शिरोभिर्द-धाति । तद्भारापनयनाय भूयोऽवतरति श्रिया सह । 'अ-प्यङ्घ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरम्भ-णेन' इत्युक्तरीत्या नष्टां भूदेवीमानीय परिरब्धुं वराहवपुः-परिग्रहो युक्तः । अस्य वराहस्य निरतिशयंबृहत्त्वं श्रीभागवते स्फुटं वर्ण्यते । 'यस्यायुतशतैकांशे विश्वशक्तिरियं स्थिता' इतिवद्विश्वस्य भगवद्दंष्ट्राङ्कुरकोटिलग्नत्वप्रदर्शनेन समस्तजग-तः शरीरत्वरूपाधेयत्वं प्रदर्श्यते । भगवतो निरतिशयबृहत्त्वं विचित्रं व्यज्यते । अस्य वराहस्य घोणारवाः प्रलयोर्मिघोष-मभिभवन्ति । अस्य दंष्ट्राया अङ्कुरस्य कोटौ लग्ना विश्वं-भरा । तेन गाढघटिता, अतः परमकम्पनीयां नित्यां स्थितिं लभते। निष्कम्पत्वं निदर्श्यते चतुर्थेन पादेन। तथा निश्चलां स्थितिं लभते; यथा सा आब्रह्मस्तम्बपर्यन्तं कृत्स्नचेतना-

चेतनान् सुखं सूते । अन्तर्वत्न्यः स्त्रियो आसन्नप्रसवा न कम्पचलनादिकं सहेरन्निति प्रसिद्धम् । दंष्ट्राङ्कुरकोटिलग्नेयं कोटिसहस्रप्रजाः सूते । यथा मुस्ता तद्दंष्ट्राङ्कुरे लग्ना दृश्येत, तथा विश्वंभरा तत्र दृश्यते । किमु वाच्यं तस्य निरतिशयबृहत्त्वे । तस्य विश्वशरीरत्वं सम्यगभ्यधक्ष्यते । तत्तद्योनिस्वभावोऽप्यहेयो भगवता तत्र तत्रावतीर्णेन । वराहा नागासधमुद्रादौ विहरेयुः । पल्वलादौ पङ्किलजले खुरदघ्ने जानुदघ्ने वा विहरणं तेषां स्वभावः । 'विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले' इति कविसार्वभौमः । अत्रोच्यते । अयं ब्रह्मवराहः । अस्य खुरदघ्न एव जले अयं विहरति । महोदधिरस्य खुरदघ्न इति प्रदर्श्यते आचार्यैः । 'क्वापि कल्पान्तवेशन्ते खुरदघ्ने समुद्धृताम् । वहते मेदिनीमुस्तां महते पोत्रिणे नमः ॥' इति सङ्कल्पसूर्योदये ॥

गोपायेदनिशं जगन्ति । नावतारकालिकरक्षणमात्रात्तृप्यामः । अनिशं रक्ष्येमानेन ब्रह्मवराहेण । 'हरेर्धृतक्रोडतनोः स्वमायया' इति श्रीभागवते । देवीमात्ररक्षणेन व सन्तुष्यामः । एतद्रूपप्रदर्शनेन सर्वाणि जगन्त्यव्यात् ॥

कुहनापोत्रीपवित्रीकृतब्रह्माण्डः । 'अस्नाविरं शुद्धमपापविद्धम्' इति वर्णितस्य जगत्पवित्रभूतस्य यज्ञमूर्तेः कथं वराहत्वेनावतारः । अयं मिथ्यापोत्री । न वास्तवपोत्री । पवित्रतमोऽयं कोलः । अनेन जगन्ति पवित्रीक्रियन्ते । पूर्वमपवित्रो लोक इदानीं पवित्रीभवति । पवित्राणां पवित्रोऽयं वराहः । 'त्रयीमयं रूपमिदं च सौकरम्' 'विधुन्वता वेदमयं निजं वपुः' 'यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः' 'क्रोडापदेशः स्वयमध्वराङ्गः' 'यद्रोमगर्तेषु निलिल्युरध्वराः' इति वेदमयो यज्ञमयोऽयम् । 'सर्ववेदमयो हरिः' 'सर्वयज्ञमयो हरिः' 'यज्ञो वै विष्णुः' इत्यादिवचनान्यस्मिन्मुख्यानि । एतत्कथाश्रवणादिफलमेवं समकीर्त्यत श्रीशुकेन 'शृणोति गायत्यनुमोदतेऽञ्जसा विमुच्यते ब्रह्मवधादपि द्विजाः । एतन्महापुण्यमलं पवित्रं० पदमायुराशिषाम् ॥' इति । वराहावतारकाले तद्घुर्घुरितं श्रुत्वा 'जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म' इति त्रिलोकस्था मुनयः पवित्रम्, पवित्रम, पवित्रमिति त्रिरपठन्, शान्तिपठनवत् । इदं सर्वं प्रत्यभिज्ञाप्यते पवित्रशब्देन ॥

प्रलयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः । सागरान्तं खलु

हिरण्यकेशहिरण्याक्षयोरायोधनम्। हिरण्यकेश इति भगवन्तं निर्दिशन् श्रीशुको हिरण्याक्षस्य 'आ प्रणखात्सर्वं एव सुवर्णो हिरण्यकेशः' सदृशोऽधिकश्च शत्रुश्चेति चारु व्यञ्जयति। अक्षिमात्रं हिरण्यं तस्यासुरस्य। प्रलयोर्मिघोषो नियतः सागरे तयोस्तदन्तर्युद्धक्षोभसंरम्भसमये। तद्घोषादपि गरीयानस्य घोणारवः। प्रथमगुरोर्वेदमयस्यादिवराहस्य घोणारवस्य गुरुत्वं न्याय्यमिति गुरुशब्देन व्यज्यते। 'विद्यागुरवे नमो नमः' इति श्रीशुकः। मत्स्यावतारेण लब्धस्य कूर्मेण योगेनाशैथिल्येनाभ्यस्तस्य वेदस्येदानीं वराहेणोच्चैर्ब्रह्माण्डव्यापिभिर्घोणारवैरुद्घोषणम्, तेन च ब्रह्माण्डपवित्रीकरणमित्यवधेयम्। असुरापहारेणापवित्रीकृताया भुवो वेदमन्त्रानुपाठैः शुद्धिरूपसंस्कारः संपाद्यते। यथा मत्स्यस्य वीक्षणं सततधावनादिकमान्दोलनं च, यथा च कूर्मस्य निद्रानिश्वासादिकमङ्गसंहरणादिरूपव्यापारेण प्रत्याहाररूपयोगसाम्यं चावर्ण्यन्त, तथा वराहस्य स्वभावभूतघोणारवा वर्ण्यन्ते। यथावतीर्णेन ब्रह्मणा ब्रह्मस्वभावो न जह्यते, तथावतीर्णतत्तद्योनिस्वभावोऽपि न त्यज्यते। घोणैव मुख्यं बलं वराहस्य। 'स्थूलनासिकापूर्वसुन्दराम्' इति माघे। वनमृग इत्युपहसितो भगवान् 'सत्यं वयं भो वनगोचरा युष्मद्विधान्मृगया-

मो ग्रामसिद्धान्' इति प्रतिवक्ति । घोणया घ्राणेनापहृतभुवो मार्गणं कारणसूकरस्य सुकरमभूत् । यथा वीक्षणैर्मार्गणं निमैग्नस्य श्रुतिजालस्य, तथा घोणाया आघ्राणैर्मार्गणं निर्मग्नाया भुवः । 'निशम्यते घुर्घुरितम्' इति श्रीशुकानुभवः प्रत्यभिज्ञाप्यते घुर्घुरशब्देन । शुकानुभवानुकरणं वराहरूपभगवद्घोणारवानुकरणं च संपाद्यत एतच्छब्देनेति सहृदयैर्भाव्यम् । भगवत्कृतवेदघोषानूच्चारणरूपाध्ययनसंपादनेन तत एव साक्षादध्ययनसंप्रदायः संपादितः स्यात् । गुरुकुलवासरूपश्रमविलम्बाक्षमाणामियं काचिद्गतिरध्ययनप्रापणे ॥

यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थितिः। 'दंष्ट्राग्रकोट्या भगवंस्त्वया धृता विराजते भूधरभूः सभूधरः' 'स्वदंष्ट्रयोद्धृत्य महीं निमग्नाम्' 'भूमण्डलेनास्य दृता धृतेन ते' 'तस्य चोद्धरतः क्षोणीं स्वदंष्ट्राग्रेण लीलया' इत्यादिरार्षोऽनुभवः स्मार्यते । 'गाढघटना' इति निष्कम्पनित्यस्थितौ हेतुः । अच्युतोऽयं वराहः । निष्कम्पत्वमनेककोटिसुखप्रसवानुकूलम् ॥

ब्रह्मस्तम्बमसौत् । आब्रह्म स्तम्बपर्यन्तं कृत्स्नं भूतजातं सुषुवे । असुरापहृतधराया अनिर्यातनेऽन्तः स्थितगर्भ-

भूतजीवराशयो विच्छिद्येरन्। भगवता दता तामुद्धृत्य तत्र तस्याः निष्कम्पां स्थितिं संपाद्यानेककोटिसुखप्रसवसंभवो निर्वर्त्यते॥

असौ। पुरोवतिष्ठत इव देवी भूराचार्याणामनुभवे। यथा 'सैषा देवी' इति श्रीस्तुत्यन्ते। ध्रुवमध्यक्षितोऽवतारवृत्तान्तः सर्वोऽपि स्तोत्रकाले। भूम्येकदेशमध्यस्थैरस्माभिः कथं तस्याः पुरोवर्तित्वेन निर्देश्यत्वस्य संभवः। ईदृशावतारदशापरोक्षणकाल एव तत्संभवः॥

भगवती विश्वंभरा। विश्वं भरतीयम् स्वगर्भे। इमां बिभर्ति भगवद्दंष्ट्राङ्कुरकोटिः। तं बिभर्ति तस्य स्वो महिमा। अथ वा न सोऽपि। भगवतीं भगवान्बिभर्ति। 'विश्वंभरा भगवती भवतीमसूत।' इत्युत्तररामचरिते। तत्रातिसुन्दरम्। 'सर्वं बिभ्रती तव माता त्वामप्यसूत' इति सीतां प्रति वचनं कथं तस्याः स्तुतौ पर्यवस्येत्। यथा सर्वान्प्राणिनो गर्भे बभार तान् सुषुवे, तथा त्वामप्यसूतेति खलु तद्वचनभङ्गीपर्यवसानम्। 'भगवती विश्वंभरा' इति पदयोः सम्यग्विनियोजनं क्रियते आचार्यैरित्यवधेयम्॥

मुस्तेव। यथा मुस्तां लीलयानायासेन दन्ताग्रे बिभृ-

याद्वराहस्तथा विश्वंभरां बिभर्त्ययं ब्रह्मवराहः । यथा मुस्ताया निष्कम्पा निरपाया स्थितिः स्यात्तथा अस्या इति व्यज्यते । यथा मुस्ता स्तम्बादितृणप्ररोहस्य मूलं भवेत्तथेयं विश्वंभरा जगत्कन्दभूतेत्यपि व्यज्यते । वराहदंष्ट्रायां मुस्तेवातिसूक्ष्मा दृश्यते विश्वंभरा भगवद्दंष्ट्रायामिति च व्यज्यते । 'यथा वनाग्निःसरतो दता धृता मतङ्गजेन्द्रस्य सपत्रपद्मिनी ।' इति गजेन्द्रदंष्ट्रागतपद्मिनीव भूपद्मं शुशुभे इति श्रीशुकानुभवः । 'दंष्ट्रानुषक्तां धरणीं दधानो जम्बालरेखामिव केलिलग्नाम् ।' इत्याचार्याणामनुभवः सङ्कल्पसूर्योदये । पङ्करेखावदत्यन्तसूक्ष्मा दृश्यते भूः । रेखा निरतिशयसूक्ष्मा । सपङ्के पल्वले विहरतो मुस्ताक्षतिं च कुर्वतो वराहस्य दंष्ट्रायां पङ्करेखालगनं सुसंभवि । अत्र मुस्तात्वेनानुभवः । तत्क्षतिः सहजा वराहाणाम् । तच्च वर्णितमुदाहृतशाकुन्तलश्लोके । खुरदघ्नप्रमाणे समुद्रपल्वले विहरतानेन वराहेण लब्धा जगत्कन्दभूता देवी तद्दंष्ट्रायां विहारलग्ना मुस्तेव भासते । 'हृदि सुररिपोर्दंष्ट्रोत्खाते क्षिपन्प्रलयार्णवं क्षितिकुचतटीमर्चन्दैत्यास्रकुङ्कुमचर्चया । स्फुटधुतसटाभ्राम्यद्ब्रह्मास्तवोन्मुखबृंम्हितः शरणमसि मे रङ्गिंस्त्वमूलकोलतनुर्भवन् ॥' इति श्रीमद्भट्टारकैर्ब्रह्मत्वप्रदर्शनं कोलवपुषः ॥

प्रत्यादिष्टपुरातनप्रहरणग्रामः क्षणं पाणिजै-
रव्यात्त्रीणि जगन्त्यकुण्ठमहिमा वैकुण्ठकण्ठीरवः ।
यत्प्रादुर्भवनादवन्ध्यजठरा याहच्छिकाद्वेधसां
या काचित्सहसा महासुरगृहस्थूणा पितामह्यभूत् ॥

'दिवि स्पृशत्कायम्' 'सदावधूता जलदाः परापतन्' 'अम्भोधयः श्वासहता विचुक्षुभुर्निर्ह्रादभीता दिगिभा विचुक्रुशुः । द्यौस्तत्सटोत्क्षिप्तविमानसङ्कुला प्रोत्सर्पत क्ष्मा च पदातिपीडिता ॥' 'शैलाः समुत्पेतुरमुष्य रंहसा तत्तेजसा स्वं ककुभो न रेजिरे ।' इत्यस्य नृसिंहवपुषो निरतिशयबृहत्त्वव्यञ्जनं श्रीभागवते । 'सटाच्छटाभिन्नघनेन बिभ्रता नृसिंह सैंहीमतनुं तनुं त्वया ' इति माघकवेस्तद्वपुषो बृहत्त्वानुभवः । 'हिरण्यकरघट्टितात्सपदि जृम्भितः स्तम्भतः । पुरः स्फुरति संभ्रमस्फुटसटाच्छोटनत्रुटद्घनघनारवद्विगुणबृम्हितः सिंहराट्' 'सटाविधुतिसंभ्रमभ्रामितसप्तलोकस्थितिः' 'प्रत्यूढस्थेमभीमप्रलयघनघटाघोषणाडम्बराणि । क्षुभ्यत्सप्ताम्बुधीनि....अस्मद्भीतिव्यपोहं विदधतु नृहरेरट्टहासाद्भुतानि' इति विचित्रो ब्रह्मत्वानुभवो नृसिंहब्रह्मविषय आचार्याणाम् । अध्यक्षयाम इव नृसिंहं तद्वर्णनैः । 'प्रकर्षोद्विष्णुत्वद्विगुणपरिणाहोत्कटतनुः' इति श्रीभट्टानुभवः । विष्णोर्व्याप्तिरूपब्रह्म-

त्वं खल्वाक्षिप्तं शत्रुणा । तत्स्थापनार्थं खल्वयमवतारः । यथा ब्रह्मणो भक्तबृंहयितृत्वं तथा सत्यस्य तस्य भक्तसत्यापनं स्वभावः । आत्मसाम्यावहत्वं खलु तत्प्रकृतिः । 'सत्यं विधातुं निजभृत्यभाषितं व्याप्तिं च भूतेष्वखिलेषु चात्मनः' इति व्याप्तिसत्यापनयोः सहपाठः । यथा वराहस्य नासा बलं तथा सिंहस्य नखं बलम् ॥

प्रत्यादिष्टपुरातनप्रहरणग्रामः क्षणं पाणिजैः । १. अत्र भगवतस्तदायुधानां चोक्तिप्रत्युक्तिरूपसंवादो व्यज्यते । भगवन्तं सङ्ग्रामाय यियासन्तं सुदर्शनकौमोदक्यादिदिव्यायुधानि भगवता सह स्वानुगमनानुज्ञां निर्बन्धेन याचन्ते 'वयं पुरातनान्यायुधानि । बहुषु सङ्ग्रामेषु कृतसाहाय्यानि सम्यक्परीक्षितानि । चिरकृतयोधनयोग्यानि वयम् । पुरातनभृत्या वयम् । न वयं भूषणायेतरभूषणवत् । न वयमलंकारार्थं तिष्ठामः । अस्त्राणि खलु वयम् । शत्रुं प्रहर्तुं वयमास्महे । वयं बहून्यास्महे । ईदृशः सङ्ग्रामोत्सवो दुर्लभः । न वयमधुना परित्याज्यानि । अस्माकं प्रत्यादेशो न न्याय्यः । एवंरूपा आक्षेपाः 'प्रत्यादिष्ट' 'पुरातन' 'प्रहरणग्राम' इत्यादिशब्दैर्व्यज्यन्ते । तान्याश्वास्यन्ते भगवता 'क्षणमात्रं भवद्भिर्मद्विश्लेषः सह्यः । क्षणकाले प्रतियास्यामि । भवदधिकारे एतेषां पाणि-

जानां निवेशनं क्षणिकमेव। न तेभ्यो भवदधिकारः स्थिरं दास्यते। तेषां भवत्प्रतिभूत्वं भवत्प्रत्यादेशत्वं न क्षणादधिकं स्यात्। यूयमेव मम स्थिरायुधाधिकारभाजः। एवं वदंस्तानि पाणिजैः 'तिष्ठन्तु भवन्तः, मानुयान्तु माम्' इति संज्ञां करोतीव तानि क्षणं निषेधन् भक्तवागसत्यताभिया। पाणिजैः प्रत्यादिशति तान्यनुगमनोत्सुकानि 'क्षणम्' इति कथयन्। 'पाणिजान्' प्रदर्श्य तान्याश्वासयति, न भेतव्यं भवद्भिरहं निरायुधो यास्यामि प्रबलशत्रुं योद्धुमिति। सन्त्येतेऽद्भुताः पाणिजा इति प्रहरणग्रामशब्देन द्योत्यत इव। पाणिजशब्देन नखविशेषणतया पाणेरपि ग्रहणेन तेन निषेधनमभयप्रदानं च व्यज्यते। यथा वराहस्य घोणा बलम्, तथा सिंहस्य नखानि बलम्। तद्बलं भूयः प्रदर्श्यते सर्वैरपि कविभिः। 'समुग्धकान्तास्तनभङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः।' 'वक्ष एष निरदारयन्नखैः' इति माघानुभवः। 'नखक्षुण्णारातिक्षतजपटलैः' इति भट्टानुभवः। 'नखरशृङ्गदम्भोलिभिः' 'दम्भोलिश्रेणिदीप्यत्खरनखरमुखक्षुण्णदैतेयवक्षोनिष्ठ्यूतासृक्स्रवन्तीभरितदशदिशादर्शितापूर्वसन्ध्यः' इत्याचार्यानुभवोऽन्यत्र। 'माद्यन्मोहमहेभकुम्भदलनप्रोद्भूतसन्मौक्तिकद्योतालंकृतचित्सुखाद्वयवपुः श्री-

मान्नृकण्ठीरवः। प्रह्लादस्य गिरः प्रमाणनविधौ दिव्याकृतिः स्तम्भतो निर्यातः प्रकटीभवेत्स हृदयाम्भोजे ममाखण्डितम् ॥' इत्यद्भुतोऽनुभवः श्रीनृसिंहविषये कल्पतरुकाराणां श्रीमदमलानन्दयतीनाम्। एतच्छ्लोकभाववर्णने नात्रावतरामाब्धिरमज्जनभयात् ॥

अव्यात्त्रीणि जगन्ति। पाणिजैरव्यादित्यप्यन्वयः। 'प्रह्लादह्लादनानि' इति सततं प्रकृष्टह्लादमग्नमत एव प्रह्लाद इति ख्यातं प्रह्लादमद्भुतमपूर्वं ह्लादयितुमतिसुन्दरात्यन्तसुघटितनृसिंहतनुः परिजगृहे। तामेवागौर्णी नृसिंहतनुं सर्वदास्मल्लोचनचमत्काराय अस्मत्पुरतोऽवस्थाप्यास्मान्मन्दह्लादान्ह्लादयतु। अद्भुतसुन्दरवपुःप्रदर्शनेनावनं प्रार्थ्यते। 'नारसिंहवपुः' इत्युक्त्वा तस्य भीषणत्वादि निवार्य सौन्दर्यं प्रख्यापयितुमनुपदमेव 'श्रीमान्' इति पठ्यते सहस्रनामसु। तद्वपुर्दर्शनानन्तरं प्रत्येकं लोकोत्तरसुन्दरं नरं वा सिंहं वा द्रष्टुर्जुगुप्सा जायेतेत्युक्तं श्रीमद्भट्टारकैस्तद्भाष्ये। तदेव वर्णितं श्रीरङ्गराजस्तवे 'नृहरिदशयोः पश्यन्नौत्पत्तिकं घटनाद्भुतं नरमुत हरिं दृष्ट्वैकैकं समुद्विजते जनः' इति ॥

अकुण्ठमहिमा वैकुण्ठकण्ठीरवः। क्षणिकोऽयमवतारः।

हतो रिपुः । गतश्च प्रह्लादः । कथं तत्प्रादुर्भावेन त्रिजगदनुग्रहस्तत्परित्राणं च प्राप्र्येत इति चेत्, अकुण्ठमहिमायमित्युच्यते । यदा प्रह्लादः प्रतिजज्ञे पितृसंनिधौ 'हरिः सर्वत्र' इति, तत्सत्यपरीक्षकः पिता यत्र कुत्र वा स्वेष्टस्थले हरिं प्रदर्शयेत्याज्ञापयेत् । तत्काङ्क्षितस्थलेऽप्रदर्शने भक्तवाग्वन्ध्या भवेत् । 'शिरः कायाद्धरामि ते' इत्याक्रोशन्पिता तमर्भकं हन्यात् । न हि तत्पूर्वं पित्रा साक्षात्स्वबलेन पुत्रहनने प्रवृत्तम् । तदानीमेव तदिच्छा उद्घुष्यत । तदिच्छाप्रकटनक्षण एव भगवता प्रादुर्भवनीयम् । हरिं दिदृक्षति पिता तेन योद्धुम् । हरेर्व्याप्तिं प्रतिजानीते पुत्रः । अवतरता च हरिणा सिंहेन भाव्यम् । आदौ 'किं साधु मन्यते भवान्' इति पृष्टवन्तं पितरम् 'तत्साधु मन्येऽसुरवर्य देहिनाम्....वनं गतो यद्धरिमाश्रयेत' इति प्रत्याह सुतः । तत्रापि सिंहमेव हरित्वेनासूसुचत् । वनं गतो वनराजं सिंहमेवाश्रयेत । प्रह्लादस्य हरिः सिंह एव स्यात् । यत्र कुत्रापि हरिप्रदर्शनेच्छाप्रकटनसंभवेन सर्ववस्त्वन्तर्भगवता नृसिंहरूपेणावस्थितमिति प्रदर्श्यते आचार्यैः 'स्तम्भैकवर्जमधुनापि करीश नूनं त्रैलोक्यमेव नियतं नरसिंहगर्भम्' इति । तत्र 'त्रैलोक्यम्' इति । अत्र त्रीणि जगन्तीति वर्णनसाम्यमवधेयम् । गर्भभूतोऽच्यु-

तो न च्यवेत् । अमोघोऽयं गर्भोऽधुनापि तत्र तत्रास्ते । तत्र तत्र गर्भस्थितस्तत्र तत्र भक्तमनोरथेन वहिः प्रादुर्भूय वा त्रीणि जगन्ति रक्षतु । अखिलेषु भूतेषु व्याप्तिः सत्याप्यते श्रीनृसिंहेणेति श्रीशुकः । तच्च सर्वत्रान्तर्यामितया गर्भे नृसिंहत्वेनावस्थानेऽत्यन्तस्वरसं भवेत् । अकुण्ठमहिमाव्याप्तसर्वाणि भूतानि । महिमा च व्याप्तिः । व्याप्तिश्च नृहरित्वेन । 'व्याप्तिं च भूतेष्वखिलेषु चात्मनः' इत्यस्य ग्रहणं महिमाशब्देनेत्यवधेयम् । कथं सिंहस्य सर्वव्याप्तत्वमिति चेत्— उच्यते । अयं वैकुण्ठकण्ठीरवोऽकुण्ठः कण्ठीरव इति । श्रीमच्छङ्कराचार्यास्तदनुयायिनश्च नृसिंहोपासकाः । अत्र पूर्वोदाहृतावतारश्लोके 'नरहरिणपतिः' इत्यधिकवर्णनं तद्विषयेऽवतारान्तरेभ्यः । 'वैकुण्ठीये तु कण्ठे' इत्युक्तं तैर्भगवत्कण्ठविषये । 'श्रीमान्नृकण्ठीरवः' इति कल्पतरुक्तः । वैकुण्ठकण्ठीरव इत्याचार्याः । यादृग्गम्भीरं रूपं तादृङ्नाम ॥

यत्प्रादुर्भवनादवन्ध्यजठरा यादृच्छिकात् । यद्यपि त्रैलोक्येऽपि नरसिंहो गर्भत्वेनावस्थितः, अखिलभूतमध्ये एकैव स्थूणावन्ध्या प्रसुषुवे नृसिंहम् । इतरत्सर्वमन्तर्वदास्ते । या काचित्स्थूणासूत । किमित्येकस्यां प्रादुर्भावः, इतरत्रान्तरेवावस्थानमिति चेदुच्यते 'यादृच्छिकात्' इति । भगवदि-

च्छैव नियामिका । असुरेच्छा वा यदृच्छाशब्देन ग्राह्या । इतरत्र प्रदर्शनं स नाचकाङ्क्ष । यदृच्छया सोऽत्रैव दिदृक्षां प्रकटीचकार । किमिदमघटितघटनम् । तिष्ठतु नरसिंहयोरेकत्र सुश्लिष्टं घटनम् । तिष्ठतु महासुरेणाप्यघटनीयत्वेन निश्चितपरस्परविरुद्धानेकद्धिकहानघटनम् । इयमचेतना स्थूणा चेतनानां चेतनमसूत । किमिदमाश्चर्यम् । 'परस्परविरोधे हि न प्रकारान्तरास्थितिः । नैकतापि विरुद्धानामुक्तिमात्रविरोधतः ॥' इति न्यायः श्रद्दधेऽसुरेण वरवरणकाले । ब्रह्मणः सकलतर्कातीतत्वं विस्मृतं तेन । 'नैषा तर्केण मतिरापनेया' इत्याद्युपनिषदर्थां न गृहीतास्तेन विरोचनजातीयेनासुरेण ॥

वेधसां या काचित्सहसा महासुरगृहस्थूणा पितामह्यभूत् । अघटितघटना दृढीक्रियते । वेधसां पितामहानां पितामह्यभूत्स्थूणा । वेधसां पितामहानां पितामही स्थूणा गर्भं धत्ते । सूते च सर्वलोकपितामहम् । महासुरशब्दः प्रयुज्यते हिरण्यकशिपुविषये श्रीशुकेन । 'सुतं महाभागवतं महासुरः' 'अभ्यहनन्महासुरः' इति शुकमुखाच्च्युतः शब्द आचार्यैर्गृह्यते । महासुरगृहे वेधसां पितुर्जन्म । यद्यपि स महासुरः, स्वेन स्वीयेन वा भगवतो भागवतोत्तमस्य च गर्भे धारणमस्य भाग्यमित्यपि व्यज्यते । यथा प्रह्लादोऽस्य गर्भे, तथा भग-

वानेतद्गृहस्थूणागर्भे । महासुरगृहस्थूणासुप्रज इति श्रीनृसिंहः संबोध्येत । उत्तरा सन्ध्या प्रवर्तते उत्तिष्ठ नरसिंह । गर्भवासकालतारतम्यं बहुविधं वर्तते । कुत्रापि नैकक्षणमात्रावच्छेदो गर्भवासस्य । प्रह्लादः प्रतिजज्ञे 'स सर्वत्र' इति । क्वासौ ? यदि स सर्वत्र कस्मात्स्तम्भे न दृश्यते इत्यनुपदं पितुः प्रश्नः । अनुपदमेव 'दृश्यते' इत्यवतारदर्शनं प्रह्लादस्य । दृश्यत इति प्रह्लादवचनमपि भवेत् । 'विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।' यद्यपि पित्रा न तदा दृष्टः, नापि लोकेन, ज्ञानालोकेन पुत्रेण पूर्वमेव दृष्टः स्यात् । प्रह्लादार्थे नृसिंहः, तेनैव प्रथमं दृश्येत । तद्दृष्टं तत्प्रदर्शितमनूद्यते 'सत्यं विधातुं निजभृत्यभाषितम्' इत्यवतारवर्णनश्लोकेन । ब्रह्मस्तम्बमसौद्विश्वंभरेत्युक्तं पूर्वश्लोके । अत्र ब्रह्मपितरं ब्रह्म स्तम्भः प्रासूतेत्युच्यते । अत्र वा पूर्वश्लोके वा असुरनिरसनं न प्रकाशितम् । साधुपरित्राणमात्रं वर्णितम् । शुभसननं खलु प्रार्थितं प्रथमश्लोके ॥

व्रीडाविद्धवदान्यदानवयशोनासीरधाटीभट-
स्त्रैयक्षं मकुटं पुनन्नवतु नस्त्रैविक्रमो विक्रमः ।
यत्प्रस्तावसमुच्छ्रितध्वजपटीवृत्तान्तसिद्धान्तिभिः
स्रोतोभिः सुरसिन्धुरष्टसु दिशासौधेषु दोधूयते ॥

त्रिविक्रमो भवन्वामनः 'अणोरणीयान्महतो महीयान्' इति श्रुतिं निदर्शयतीव । एकस्मिन्नवतारे एककाले उभयप्रदर्शनम् । त्रिविक्रमस्य निरतिशयबृहद्रूपबृहत्त्वे न कोऽपि संशयीत । 'भूः पादौ' इति स्मृतिः । भूरेकः पाद इति भगवांस्ततोऽपि बृहत्त्वं प्रदर्शयति । 'पादोऽस्य विश्वाभूतानि' इति श्रुतिरन्वर्थ्यत इव त्रिविक्रमेण । 'यः पार्थिवानि विममे रजांसि । योऽस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः' इति त्रयी गम्भीरनिर्ह्रादिभिः शब्दैर्डिण्डिमवदुदजूघुषत्त्रिविक्रमयशः । एवमेवायं वेदमन्त्रोऽनुभूतः श्रीभट्टार्यैः 'दैत्यौदार्यैन्द्रयाच्ञाविहतिमपनयन्वामनोऽर्थी त्वमासीर्विक्रान्ते पादपद्मे त्रिजगदणुसमं पांसुलीकृत्य लिल्ये । नाभीपद्मश्च मानभ्रममिव भुवनग्राममन्यं सिसृक्षुस्तस्थौ रङ्गेन्द्र वृत्ते तव जयमुखरो डिण्डिमस्तत्र वेदः ॥' इति स्तवे । अद्भुतोऽयं श्लोकः प्रकृतावतारविषयः, तं च संग्रहेणानुभवामः । प्रह्लादपितृसभायां दिविस्पृशत्कायो नृसिंहोऽभूत् । तद्वंश्यवैरोचनेः सदस्यतिकनीयान्वामनोऽभूत् । त्रीणि जगन्त्यव्यादिति पूर्वावतारविषये प्रार्थना कृता । तदवतारेण गूढमेव गर्भत्वेनावस्थितं त्रिलोक्याम् । यथा रामावतारे ऋषिभिः प्रार्थितम्, कृष्णावतारे तानेव गोपिकाः

कृत्वान्वर्थ्यते, तथा नृसिंहावतारविषये कृता प्रार्थनेदानीं पूर्यते त्रिजगतां पादाम्भोजस्पर्शदानेन। तत्संयोग एव परमपुरुषार्थः। वैरोचनो यद्यपि दितिजः, स परमोदारः। यस्मै कस्मैचिदर्थिनेऽर्थितं सर्वं दद्यात्। स्वेनापहृतं त्रैलोक्यराज्यमरिरपीन्द्रो यदि याचेत नियतं तस्मै दद्यात्। सुरनायको याच्ञाया अपत्रपे। सर्वलोकनायकस्तस्मिन्स्वाश्रिते याच्ञालाघवं याच्ञाभङ्गं चापनयन्स्वयं याचको बभूव। कोऽयं नाथगुणः। नाथ इत्यात्मनः समाख्यां नाथनेन कर्तृव्युत्पत्त्यापि पूर्णां करोतीव प्रभुः। 'लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति' इति तस्य नाथनम्, नाथकामनं च स्वभावः। यद्यपि 'त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम्' इति तेनैव सनाथतरं जगत्। 'इन्द्रयाच्ञामपनयन्वामनोऽर्थी त्वमासीः' इतीन्द्रस्य याचकत्वपरिहाराय स्वयं भिक्षुको भवतीति द्योत्यते। 'मध्ये वामनमासीनं विश्वेदेवा उपासते' इति कठश्रुतिर्वामनावताराविषय इति श्रीमन्मध्वमुनयः। तथार्थवर्णने सर्वदेवोपास्यत्वं वामनस्योपपाद्येत। तस्य च ब्रह्मरुद्रादिमान्यत्वं प्रसिद्धम्। 'शब्दादेव प्रमितः' इति सूत्रेण परामृष्टः शब्दो वामनश्रुतिरूपशब्दः, नेशानपदघटितः 'ईशानो भूतभव्यस्य' इति लिङ्गप्रतिपादकशब्दः,

यद्गीत्यार्थवर्णने ईशानरूपश्रुतेरितीश्वरपरत्वतात्पर्यं विवर्णयिष्येत तत्पक्षपातिभिरिति तेषामाशयः स्यात् । वामनशब्दो नियतं भगवन्तमेव बोधयेत् । पादपद्मो भुवो माता, पिता वा, उभयं वा । तदाश्लेषे वत्सभूतस्त्रिजगत्तत्रासज्जत । अणोर्वामनस्य पादपद्मेऽणुपरागवत्त्रिलोकी निलिल्ये । कारणे लयः सहजः । एतेन भगवतो निरतिशयबृहत्त्वम्, विश्वशरीरत्वं च विचित्रमुपपादितं भवति । लयानन्तरं सृष्ट्या भाव्यम् । भगवतोऽन्यतः कुतः सृष्टिसंभवः । तल्लक्षणत्वेन तदसाधारणं खलु विश्वस्रष्टृत्वम् । तदवयवान्तरं नाभीपद्ममन्यं भुवनग्रामं सिसृक्षति । तन्नालीकसृष्टब्रह्मसृष्टं जगत्स्वदेहावयवान्तरभूतपद्मान्तरस्य नालमभूदिति स्पर्धयेवान्यन्मानक्षमं जगत्सिसृक्षति । नित्योऽपौरुषेयो वेदो बन्दीव त्रिविक्रमयशांसि गायति । ताताड्यते तद्विक्रमडिण्डिमम् । ऋगेषा भेरीदुन्दुभिताडनवदुच्चगम्भीरा शब्दतोऽर्थतश्चेति रसिकमनःसाक्षिकम् । 'उरुगायः' इति वदन्ती श्रुतिस्तद्यशसो गायमानत्वं व्यनक्ति । उरुभिर्बहुभिरुरु विस्तीर्णं दीर्घमुच्चैरुद्गीयत इत्युरुगायः । उरुगाने उरुतालापेक्षा स्वरसा । सा च पूर्यते श्रुत्यैव दुन्दुभिनिर्ह्रादगम्भीरशब्दैः । शब्दैस्तालो निर्वर्त्यते । वेदशब्देषु सर्वे शब्दा अन्तर्भवेयुः । न शब्दो-

ऽन्यं शब्दं सहेत । जयभेरी संपादितेत्युक्तम् । अष्टसु दिक्सौधेषु स्थिरध्वजपट्टिकाः स्थाप्यन्त इति प्रदर्श्यतेऽत्राचार्यैरिति रसिकैर्भाव्यम् । त्रिविक्रमयशो वेदो घोषयतीति श्रीमद्भट्टार्याः । जिगीषितस्य दैत्यस्यौदार्येण जितोऽजितो वामनस्तद्यशः प्रख्यापयितुं स्वयं लोकविक्रान्तभटो भूत्वा पदातिरेव लोकानतिवेगेन क्षणकालेनाक्रम्याष्टसु दिशासौधेषु पविलामृतध्वजपटीर्वर्तयति स्वचरणनिर्गलत्सुरसिन्धुस्रोतःफेनैरित्याचार्याः प्रदर्शयन्ति । ‘ध्वजारविन्दाङ्कुशवज्रलाञ्छनम्’ इति चरणगतध्वजेनापि त्रिजगदङ्कनं चारु प्रदर्श्यते । वामनभूमिकया वैरोचनसदःप्रवेशः । करे पतिते तोये वामनस्त्रिविक्रमो भवति । पूर्वावतारे विग्रहविशिष्टस्य भगवतो व्याप्तिर्न्यरूपि । अधुना विग्रहैकदेशभूतपादमात्रेण त्रिजगद्व्याप्तिर्निरूप्यते । स्वयं बृहत्त्वं वदान्यस्य बलेर्यशसो बृह्मणत्वमित्युभयरूपं ब्रह्मत्वं प्रदर्श्यत इत्यवधेयम् ॥

व्रीडाविद्धवदान्यदानवयशोनासीरधाटीभटः । औदार्येजलधिर्भगवान्बलिं याचते । याच्ञाया व्रीडा सहजा । तया च प्रांशोरपि वामनीभवनं सहजम् । महत्या नवीनदीनभावजन्यव्रीडया विध्यते भगवान् । ततोऽपि महती दातुर्बलेर्व्रीडार्थिनोऽल्पयाचने । प्रतिषेधन्तं गुरुमुल्लङ्घ्य ददा-

ति । दानेऽप्यल्पमेव याचितमपूर्वदुर्लभपात्रेणेति लज्जया विद्धो भवति । तल्लज्जागुणेन विद्धो भवति प्रतिग्रहीता भगवान् 'ह्रिया देयम्' इति शास्त्रीयधर्मानुष्ठानेन सन्तोषितः । उदारो भगवानौदार्यरसज्ञः । दातरि ह्रीरूपश्रियः शोभां स एव वेद । स्वस्य याच्ञाजन्यव्रीडावृतत्वेऽप्यल्पयाच्ञाप्रयुक्तव्रीडाविद्धत्वरूपदातृगुणेन विद्धस्तद्यशो दिगन्तेषु स्वेनैव सद्यः पादचारेण गत्वा प्रथनीयमिति दिशोऽन्तान्धावतीव बृहद्रूपं परिगृह्य । नायं त्रिविक्रमावतारो जगन्ति मातुम्, स्वीकर्तुम्, इन्द्राय प्रदातुं च । किं तु दातुर्बलेरौदार्ययशः स्वयं क्षणकाले दिगन्तविश्रान्तं प्रथयितुमित्याचार्या व्यञ्जयन्तीव । यद्यप्यवतारात्पूर्वमन्य उद्देशोऽभूत्, अधुना तद्विस्मृत्य बलियशसः सद्यः प्रथनमेव काङ्क्ष्यते बलिगुणविद्धेन । वदान्यशब्दो वद अन्यदपीति व्युत्पन्नः स्यादिति भाति । 'अन्यं वरं वृणीष्व, अन्यद्वद' इति खल्ववोचद्दाता दानवः । तद्विषये वदान्यशब्दोऽन्वर्थः । ईदृशव्युत्पत्तिरप्याचार्याभिप्रेतेव । वदान्यदानवशब्दयोरत्यन्तं वर्णसाम्यम् । दानवेषु वदान्यो दुर्लभ इति तस्याधिकं यशः । बलिं जेतुमागतो भगवांस्तद्व्रीडागुणेन जितः स्वयं तद्दास्यमङ्गीकृत्य तत्सेनाग्रभटो भूत्वा तद्विजयध्वजं स्वयं पादचारेण सर्वत्र नयन्नटाट्यते ।

यद्यपि यशस्वी प्रभुर्व्रीडाविद्धोऽधोमुखस्तिष्ठति, औदार्ययशसोरल्पदानेन ह्रासः समजनीति, अयं तद्गुणाजितः शत्रुभटस्तद्यश उद्धतमुद्घोषयतीति घाटीशब्देन व्यज्यते । यशसः स्वयं प्रथनं स्वभावः 'न हि कस्तूरिकामोदः शपथेन निवार्यते ।' ततोऽप्यग्रयायी भवत्ययमग्रभटः । स्वतः प्रथने भगवतो बृह्मणत्वं न सिध्येत् ॥

त्रैयक्षं मकुटं पुनन्नवतु नस्त्रैविक्रमो विक्रमः । शिवस्य शिवत्वकरणं प्रथमम् । अनन्तरं त्रिजगतः पवित्रीकरणं पादविन्यासेनेति व्यज्यते । 'देवो नः शुभमातनोतु' इति खलु शुभत्वविस्तारणमवतारेभ्यः प्रार्थितम् । शुभस्वरूपशिवत्वं प्रदीयते । 'त्रैयक्षम्' इत्यक्षित्रयेणापि सादरवीक्षणं भगवत्पादस्य मकुटनिवेशनकाल इति व्यज्यते । सादरं सानन्दं तत्र त्रीण्यपि विलोचनानि व्यापारयामासेति भावः । धूर्जटिशिरसि पतन्ती गङ्गा विचित्रं प्रीणात्याचार्यान् । विन्ध्याचलविकटसन्ध्यानटजटापरिभ्रान्तेति गङ्गा वर्ण्यते । नटराजो धूर्जटिः । सन्ध्यायां सन्ध्यारक्तजटाभिर्विचित्रमानन्दताण्डवं वर्तयते । नृत्यतस्तस्य शिरसि गङ्गा विष्णुपदान्निपत्य भूयोभिरावर्तैरतिद्रुतं बम्भ्रमीति । को वा तद्दर्शनेन न रञ्जितो भवेत् । नृत्यतः शंभोर्जटासु पतन्ती गङ्गा विचित्रं नृत्य-

तीति चारु प्रदर्श्यते आचार्यैः ‘जडकिरणशकलधरजटिलनटपतिमकुटतटनटनपटुविबुधसरित्’ इत्यादिना । नृत्यतश्चूडायां तस्था शशिकलापि नरीनर्ति । गङ्गा चातिवेगं सबह्वावर्तं नृत्यति । धूर्जटेरङ्गमर्धं नारी, अर्धं पुमान् । उमाकृतव्यतिकरे तदङ्गे लास्यताण्डवभेदेन द्वेधा विभक्तं नाट्यम् । यद्यपि रुद्रः, स्वार्धभूतया नार्यायमतिसुकुमारलास्यमपि दर्शयतीति रुद्रशब्देन व्यज्यते महाकविना । सन्ध्यायां चेदं नर्तनम् । एवं खलु श्रीनटराजस्य नटनमनुभाव्यमिति प्रदर्श्यते तद्रसज्ञैराचार्यैः । ‘कदा पुनस्त्रिविक्रम त्वच्चरणारुणाम्बुजं मदीयमूर्धानमलंकरिष्यति’ इत्युत्कण्ठन्ते महान्तः । अस्मदज्ञानदशायामलंकरणेन न तुष्यामः । पुनः कदा वयमनुभवाम इत्युत्कण्ठ्यत इति पुनःशब्देन द्योत्यत इव । ‘विष्णुं क्रान्तं वासुदेवं विजानन्’ ‘लोकविक्रान्तचरणौ शरणं तेऽव्रजं प्रभो’ इत्यादिवचनान्यत्र भाव्यानि । विश्वामित्रः ‘विष्णुर्मानुषरूपेण चचार वसुधातले’ ‘मया तु भक्त्या तस्यैव वामनस्योपभुज्यते’ इति च पुंसां दृष्टिचित्तापहारिविग्रहस्य रामस्य पुरतो वामनस्य शोभां प्रशशंस । वामनावतारस्य सर्वातिशायिलावण्यमिति वकुलभूषणादिभावुकानामनुभवः । भूमौ पादं न निक्षिपेयुर्देवा लाघवभिया । अयं देवदेवः

सर्वं पृथिवीतलं निविडं निरन्तरं पस्पर्श पादेन । एतद्यज्यते ऋषिणा 'वसुधातले चचार' इति । पूर्वं वामनश्चचार । इदानीं तदभिन्नस्य तव तदाश्रमे सञ्चरणं संपाद्य, तत्सञ्चरणानन्दमनुभवेयमिति खलु मयात्र त्वदानयनम्, न क्रतुरक्षणार्थमित्यपि व्यज्यते । 'नभःस्थले लङ्घितार्कशशिमण्डलः क्रमः' इति मायानुभवः । 'चरणपङ्कजेनाङ्कितम्' इति दयाशतके ॥

यत्प्रस्तावसमुच्छ्रितध्वजपटीवृत्तान्तसिद्धान्तिभिः स्रोतोभिः सुरसिन्धुरष्टसु दिशासौधेषु दोधूयते । शौरिपदोज्झिता सुरसरिदाकाशे निष्पतन्ती दिक्षु सर्वत्र व्यापिनीः शुभ्राः फेनच्छटाः प्रक्षिपति । गिरिनिर्झरपातं दृष्टवतामेतत्सुविदितं स्यात् । ताश्च यशस्तव इव, श्वेतध्वजपटा इव च दृश्यन्ते । 'नलः सितच्छत्रितकीर्तिमण्डलः' इति नैषधारम्भे । स्वग्रन्थस्यापि तादृशयश आशास्त इव कविर्यथा सुधावत्स्वग्रन्थस्य सुरैरपि पानमाशास्ते । पूर्वार्धे 'कथाम्' इति पठता तन्मनोरथः स्पष्टमेव प्रकटीचक्रे, स्वकाव्यस्यापि तत्कथात्वात् । सिद्धान्तशब्देन स्वासिद्धान्तगुरुपङ्क्तिविषयः 'दिक्सौधावद्धजैत्रध्वजपट...' इत्यादिश्लोकः स्मार्यत इव । नाभीपद्मसिद्धान्तवदयं पादप्रदर्शितो भगवत्परत्वसिद्धान्तः ।

यशसः पवित्रत्ववर्णनमुचितम्। न गङ्गाम्भसः पवित्रम्। न त्रिविक्रमपादात्पवित्रम्। स्वच्छावदातगङ्गाफेनच्छटा ध्वजायन्ते। भगवत्पादो ध्वजवाही भटः। दिक्सौधा ध्वजस्थापनस्थानानि। एवं वृह्मयते भगवदभिमानपात्रस्य यशः॥

क्रोधाग्निं जमदग्निपीडनभवं सन्तर्पयिष्यन्क्रमा-
दक्षत्त्रामपि संततक्ष य इमां त्रिःसप्तकृत्वः क्षितिम्।
दत्वा कर्मणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वस-
न्नब्रह्मण्यमपाकरोतु भगवानाब्रह्मकीटं मुनिः॥ ७॥

अयमवतारः शेषभूतं कंचिदनुप्रविश्य। शेषस्य निरतिशयशक्तिप्रदर्शने वृम्हणत्वरूपवृहत्त्वं सम्यगुपपाद्येत। तच्छक्तिदातृब्रह्मणो निरतिशयवृहत्त्वमप्युपलक्ष्येत। विप्रे परशुरामे सर्वक्षत्रियविनाशनानुरूपां महतीं वाहुशक्तिमादधाति। भगवद्बाहुजाः क्षत्रिया विप्रवाहुना घात्यन्ते। किमर्थं विप्रयोनौ शक्त्यावेशनम्? लोकरक्षार्थं स्थापिताः क्षत्रियाः। निरायुधा दीना अनाथा ब्राह्मणास्तैस्त्रातव्याः। 'क्षत्रियैर्धार्यते शस्त्रं नार्तशब्दो भवेदिति' इति क्षत्रियवंश्यो दाशरथिः। यैरेव ब्राह्मणा रक्षणीया यदि ते क्षत्रिया एवं तान्घातयेयुर्यथा जमदग्निं कार्तवीर्यादिः, तेषां निर्मूलनं नान्या-

य्यं स्यात् । यदि प्रजारक्षणार्थं नियुक्ता अधिकारिणस्तत्रापि सेनाधिकारिणः स्वयं प्रजाघातुका भवेयुस्तेषां प्राणान्तिको दण्डो न्याय्यः स्यात् । तथैवेदानीं नियमः सर्वेषु देशेषु सेनानये । को ब्राह्मणः ? 'मौनं चामौनं च निर्विद्याथ ब्राह्मणः' इति श्रुतिप्रतिपादितो महातपस्वी 'ब्राह्मण एवायम्' ब्रह्ममात्रसंबन्धी । शमप्रधानास्तपोधना राज्ञा सर्वथा रक्षणीयाः । तद्विषये किंचित्कारेण तत्सुकृतं सर्वमपि दायत्वेन लभ्यते । तदपकृतौ च तद्दुष्कृतं सर्वमपकारिणि सङ्क्रमेत् । 'शास्त्रफलं प्रयोक्तरि' इत्यनुलङ्घनीयं न्यायमपोह्यात्यन्तादरेणैनं निरायुधं क्रुध्यन्तमप्रतिक्रुध्यन्तं स्वदेहयात्रायां निरपेक्षं रक्षितुं श्रुतिरेवं शशास । कार्तवीर्यः प्रसिद्धः पृथिवीपालः । 'अन्तःशरीरेष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता । अकार्यचिन्तासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् ॥' इति हृषीकेशवत्प्रजानामकार्यचिन्तनसमय एव चापहस्तः पुरस्तादाविर्भूय भीषयित्वाकार्यकरणान्निवारयामास । तादृशी सिद्धिः संपादिता तेन परेषामकार्यनिवारणे । यदि स धर्मसेतुः स्वयं तपस्विब्राह्मणपीडको भवेत्, तत्पुत्रस्य कोपो जायेतैव । रौद्रबीभत्सरसौ प्रदर्श्येतेऽस्मिन्नवतारे । क्रोधो न सहजो भगवतः । आहार्यः स तस्य । 'क्रोधमाहारयामास'

इतिवत् । न क्रोधः स्थायीभावो भवेद्भगवतः, यथा परशुरामे विद्यते । क्षत्त्रजातिसामान्यस्य क्षत्त्रियेण भगवतोन्मूलनं न न्याय्यम् । ब्रह्मण्यपराधो ब्राह्मणावेशनेन दीर्घवैरः परिहर्तुमुचितः । जामदग्न्यो रुद्रशिष्यः । महावीरः कोपनश्च । तस्मिन्स्वशक्तिमावेश्य तद्द्वारा चिकीर्षितं साधयति । दशस्ववतारेषु द्वाववतारौ शेषजीवयोः । अवतारेष्वपि शेषी शेषमपि निवेशयति । तस्य कनीयानपि भवति । अवतरन्तौ शेषशेषिणौ समकालेऽपि भुवमलंकुर्वाते । यथात्र स्वेच्छया शेषं गुरुत्वेन पूजयति लालयति च, तथा परमपदेऽपि तं संमानयिष्ये इति रहस्यमवतारेऽपि प्रकाश्यते । परशुरामकृत्यं जुगुप्सितमिति मन्येत । अब्रह्मण्यापाकरणरूपनिमित्तेन तादृशघोरकृत्यानि निरवर्त्यन्त इत्याचार्या व्यञ्जयन्ति 'अब्रह्मण्यमपाकरोतु' इति । कथमन्यथा तद्घोरकृत्यस्य शुभत्वं निरुह्येत। हतक्षत्त्रियतनुगलत्क्षतजधारापूर्णानि घोरपङ्क्तिमहासरांसि खल्वनेन व्यरचिषत । पञ्चत्वमापन्नक्षत्त्रियरक्तैः पञ्च सरांसि । क्षत्त्रमात्रप्रलयकृदयं रुद्रशिष्यः । भगवदाहितशक्त्या तस्य तादृशं बृहत्त्वम् ॥

क्रोधाग्निं जमदग्निपीडनभवं सन्तर्पयिष्यन्क्रमात् । पितृवधनिमित्तः क्रोध इति क्रोधहेतुप्रदर्शनं तस्य दोषैकान्त-

त्वनिवृत्तये । जमदग्निरित्यग्निरूपाक्षरघटितनामा पिता । तमग्निं पीडयामास शत्रुः । तदात्मभूतपुत्रस्य क्रोधाग्निस्तेनाज्वल्यत । पीडितोऽग्निरन्यमग्निमुदपादयत् । अयं पुत्रः पितृवधोत्थितक्रोधाग्निं पितरं जमदग्निं मेने, उभयोरप्यनन्यत्वात् । क्रोधाग्निं च पितरं मत्वा तं संततर्प शत्रुक्षत्रियक्षतजधाराभिः । दीर्घायुश्चिरजीवी परशुरामः, तत्क्रोधोऽपि चिरजीवी । बहुकालं तेन पितृतर्पणं कार्यम् । चिरजीविनः क्रोधो दीर्घः । क्रमादेकविंशतिकृत्वः प्ररोहतीर्नवनवक्षत्रियसन्ततीर्विच्छिद्य विच्छिद्य तद्रक्तधाराभिर्निवापाञ्जलिं ददौ । क्रुद्धस्य करुणागन्धो न स्यात् । शत्रुरुधिरदर्शनं तस्य परमप्रीणनं भवेत् । स्त्र्यपि द्रौपदी दुःशासनरुधिरेण स्वकेशपाशमाञ्जिजिपत् । क्रोधाग्नौ रुधिरमेव होतव्यम् । 'देवः स्वर्गंगतोऽपि शात्रववधेनाराधितः स्यात्' इति राक्षसः । दिवं गतोऽपि पिता शत्रुवधेनाराध्येत । अमृतत्वतुल्यत्वेन वर्णितं स्वर्गसुखमनुभवन्नपि ततोऽप्यधिकं सुखमनुभवेच्छत्रुवधेनेति मुद्राराक्षसश्लोकस्य भाव इत्यवधेयम् । अग्नावाज्यादिकं क्रमेण हूयेत, न यौगपद्येन, सकृद्वा । 'क्रमेण युगपद्वा' इति विकल्पाशिरोवर्णनं क्षणभङ्गवादिभिस्ताथागतैः । नास्य क्रोधस्य क्षणिकत्वम्, किं त्वनेकजन्मानुगतत्वम् । अतः

क्रमेण होमः । यथाग्निर्हुताशनस्तथा क्रोधाग्निः शत्रुरक्ताशनः ॥

अक्षत्रामिह संततक्ष य इमां त्रिः सप्तकृत्वः क्षितिम्। 'द्यावापृथिवी निष्टतक्षुः' इति श्रुतिः प्रत्यभिज्ञाप्यते । क्षितितक्षणमवतारबृहत्त्वोपलक्षकम् । न तेनैव जगन्निर्माणं तक्षणेन, किं तु क्षितेस्तक्षणेन निष्कण्टकीकरणमात्रम् । क्षत्रसामान्यं कण्टकमभूत् । तन्मात्रमपनीतं सम्यक्तक्षणेन। अक्षत्त्रां संततक्ष । छेद्या वृक्षगुल्मलतादयो यथा छेत्तारं न प्रतियुध्येरन्, तथास्य प्रतिभटाः परशुना छिद्यमाना न प्रत्ययुध्यन्निति व्यज्यते । मूलानि निर्मूलयितुं क्षितितलं संतक्ष्येत । क्षत्त्रप्ररोहं निर्मूलयितुं पुनः पुनः क्षितितलं संततक्ष । 'अलावीद्भूपालान् पितृगणमतार्प्सीत्तदसृजा' इति श्रीभट्टपादाः ॥

त्रिः सप्तकृत्वः । अयं नीरसो निष्करुणः शुष्कः श्रोत्रियः । 'दश पूर्वान्दशापरान् पुनाति' इति शुश्राव । आत्मानं चान्तर्भाव्य एकविंशतिः संपद्यन्ते । पावनकर्मणि पूर्वेषामपि तच्छास्त्रविषयीकरणं सुलभम् । अत्र तु हननविषये न शत्रुपूर्व्या दिवं गताः पुनर्हन्येरन् । पित्रादिप्रीणनाराधनपावनादिविषये श्रुता त्रिःसप्तसंख्याद्रियतेऽनेन श्रोत्रि-

येण वध्यसंख्यायाम् । अयं ब्रह्मचारी । अयं ब्राह्मणः, न जितं राज्यमीप्सेत् । राजगुणभूतरञ्जनव्यापारोऽस्यात्यन्तमशक्यः । विप्रत्वाद्विरक्तत्वाच्च जितां पृथिवीं काश्यपाय प्रादात् । ब्राह्मणस्येदृशी विरक्तिः । राज्ये यदि सज्जेत तदर्थमेव क्षत्रहननं भवेत्, न पितृसन्तर्पणार्थम्, क्रोधाग्निसन्तर्पणार्थं वा । राज्यकामना क्रोधैकान्त्यं विहन्यात् । अयं क्रोधमेव जानाति, नार्थकामौ । धर्मं तु जानातीति तृतीयपादेन बोध्यते ॥

दत्वा कर्माणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वसन् । न स्वावस्थानार्थं स्वल्पमपि स्थलमियेष । कृत्स्नं ददौ । दत्वा भूमेर्बहिर्गत्वा समुद्रमास्कन्द्य तत्र स्वतेजसा कंचित्स्थलं कल्पयित्वा तत्रोवास ॥

अब्रह्मण्यमपाकरोतु भगवानाब्रह्मकीटं मुनिः । किं शुभमयं क्रोधैकरस आतन्वीतेति चेत्, आब्रह्मकीटमब्रह्मण्यमपाकुर्यादित्युच्यते । ब्रह्मण्यविरोधे किमापद्येत । 'ब्राह्मणो मम देवता' इत्युक्तभगवद्दैवतस्य हानिः स्यात् । धर्मेण लोको ध्रियते । दैवेन लोको ध्रियते । वेदैर्लोको ध्रियते । तत्त्रितयं ब्राह्मणाधीनम् । असहनमुनिरित्युक्तः कोपनो मुनिः । 'आशस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता

मुनेः' इति तस्य मुनित्वेन ग्रहणं वेण्याम् ॥

पारावारपयोविशोषणकलापारीणकालानल-
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स तन्वीत नः ॥

निरतिशयबृहत्त्वादिपरत्वप्रदर्शनमस्मिन्नवतारे कथं शक्यम्। 'आत्मानं मानुषं मन्ये' इति ब्रह्मत्वमत्यन्तं विसस्मरेऽवतरता भगवता। आसुरमोहनार्थं तानात्मनो मानुषत्वं मानयितुं मुक्तकण्ठं रुरोद दण्डकेपून्मत्तवत्, पामरवच्च। अस्मिन्नवतारेऽपि परत्वं प्रदर्शनीयं ब्रह्मत्वाहानार्थम्, अवतारेष्वपि बृहत्त्वमभ्यक्षयितुं च। कथमेतत्संपाद्येत। यद्यपि स न स्वयं बृहत्त्वं प्रदर्शयामास, तच्छरेण प्रलयाग्नेरपि घोरतरं सागरशोषणरूपोपसंहर्तृत्वादिकं प्रादर्शि। तच्छरस्य तादृशबृहत्त्वेन तद्बृहत्त्वमभ्यक्ष्येत। शूरतमः शत्रुपक्षप्रधानमल्लः शक्रजिदेतस्मिन् सागरशोषणविक्रमं दृष्ट्वा विसिष्मिये, तेन च राममुत्तमवीरं स्वसदृशप्रतियोद्धारं मेने इति सुन्दरं प्रदर्श्यते काव्यप्रकाशोदाहृते 'क्षुद्राः संत्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति परमसी

सायका निष्पतन्तः। सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किंचिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥' इति श्लोके॥

अस्यावतारस्य मुख्यं प्रयोजनं शरणागतिरूपसूक्ष्मधर्मप्रकाशनम्। तद्धर्मसंस्थापनार्थोऽयमवतारः। सुग्रीवं प्रपन्नं जिघांसंस्तत्पितृसमस्तज्ज्येष्ठो वाली अस्य प्रथमवध्योऽभूत्। अनन्तरमेव रावणः। यद्यपि स भार्यापहारी महापराधी, न स प्रपन्नं कमप्यहिनत्। मतङ्गाश्रमरूपस्थलविशेषलाभात्सुग्रीवप्राणा ररक्षिरे। यो धर्मः प्रतितिष्ठापयिषितस्तद्विघाती प्रधानशत्रुर्भगवतः। नूतनाश्रितो विभीषणो राघवेण समुद्रशरणवरणं रुरुचे। तदिच्छामनुरुध्याञ्जलिं प्राङ्मुखः कृत्वा प्रतिशयनभूमिकया पयोधिपुलिनमभूषयत्। अवतारभूमिकामध्ये प्रदर्शिता प्रतिशयनभूमिका। तेन चोद्यतो महोदधिराधिकमाधिकं विजजृम्भे। सागरतरणार्थं मार्गादानेन न चुक्रोध प्रभुः। किं तु प्रपत्तिमार्गविहननेन। तदानीमेव समुद्राजस्य शृण्वत उद्घोषितः प्रभुणा तत्पुलिने प्रपत्तिधर्मः। तद्धर्मविहनने महान् क्रोधः समजनि। तत्समयसंरम्भविजृम्भितस्तस्य सर्वेश्वरभावः, यो महता प्रयत्नेन पूर्वं गुप्तः। उद्घोषितं च तदा 'सागरं शोषयिष्यामि' इति। 'कुशली यदि

काकुत्स्थः किं न सागरमेखलाम् । महीं दहति कोपेन युगान्ताग्निरिवोत्थितः ॥' इति सीतया पप्रच्छे हनूमान् । स च प्रश्न आवेदितः प्रभोर्भक्तेन प्राज्ञेन दूतेन । सागरमेखलामिति वदन्त्या सीतया सागरोऽपि तस्य युगान्ताग्नेरिन्धनं भवेन्महीदहनायेति व्यञ्जितम् । 'जगत्सशैलं परिवर्तयाम्यहम्' इति च क्रोधसमये उक्तं भगवता । न मही सीतामाता दिधक्ष्येत भगवता । मह्येकदेशभूतलङ्का ददहे हनूमता । सा च पुनर्नवीकृता । सागरेण महदपराद्धम् । तद्दहनं सीतामभिनन्दयेत्, इन्द्रजिदादिशत्रूंश्च विस्मापयेत्, अपराधिनं समुद्रराजं च शिष्यात् । क्षितितक्षणमुक्तम् । इदानीं समुद्रदहनमुच्यते । नाटकेषु विचित्राद्भुतदर्शनान्यावश्यकानि ॥

पारावारपयोविशोषणेत्यादि । जलेन शाम्येत्प्रज्वलितोऽग्निः । अग्निना जलं तप्येत । आशीविषोपमाविशिखप्रखरदग्निना दिधक्ष्यतेऽब्धिः । 'अग्निर्वै मृत्युः सोऽपामन्नम्' इति बृहदारण्यके याज्ञवल्क्यः । लोकनाशकोऽग्निस्तन्नाशका आप इति मृत्युमृत्युत्वमपां दर्शितं तत्र । तदन्यथा क्रियते भगवता । 'अग्नेरापः' इति श्रुतिः । अप्कारणकोऽग्निः । प्रलयाग्नौ अपां लय उचितः । प्रलयाग्नेः

समुद्रदहनसामर्थ्यं न्याय्यम्, लयप्रकरणात्। कारणे लयस्य न्याय्यत्वात्। प्रलयकारणत्वं च ब्रह्मणः। जन्मादेः प्रत्येकं ब्रह्मलक्षणत्वमस्ति खलु। तच्छराणां तदिच्छामात्रेण समुद्रदहनशक्तिः स्यात्। परावरस्य भगवतो विशिखः पारावारं दहति। ज्वालाजालविहारहारीति तत्साम्यं वा, तदाधिक्यं वा। दयानिधिना खलु प्रपत्तिमार्गः प्रकाश्येत। उत्तरार्धे च प्रपत्तिः प्रस्तूयते। कथं पूर्वार्धे ईदृशनिष्करुणत्वघोरत्वादिप्रदर्शनमिति चेत्, तत्प्रत्युक्तं दयाशतके 'अपां पत्युः शत्रूनसहनमुनेर्धर्मनिगलं कृपे काकस्यैकं हितमिति हिनस्ति स्म नयनम्। विलीनस्वातन्त्र्यो वृषगिरिपतिस्त्वद्धिहृतिभिर्दिशत्येवं देवो जनितसुगतिं दण्डनविधिम् ॥' इति। सागरं दण्डयितुं प्रवृत्तः कोपस्तद्धितं परिणनाम। अतः पूर्वार्धेऽपि दयाप्रभावस्यैव वर्णनम्। समुद्रराजं तादृशकोपजनकाद्रापराधिनमपि शरणवरणक्षणे ररक्ष। तदहितांश्च तेनैव कोपेन जघान। कोपस्यातिबृहत्त्वप्रदर्शनं तच्छमनोपायभूतनमस्कारस्य ततोऽपि बृहत्त्वं प्रदर्शयेत्। 'प्रत्यग्रमञ्जलिरसौ तव निग्रहाख्ये।' अन्यापि गतिर्वर्तते पूर्वोत्तरार्धयोरेकीकरणे। सागरः प्रेप्सितां सीतां व्यवधत्ते। मध्यपाती स सीताप्राप्तिपरिपन्थी। सीता च शोकान्मुमोचयिषितश्चेतनः। चेत

नवृजिनविरचितस्तस्य भवसागरः । हनूमत्समेन गुरुणा चेतनस्य भर्तृप्रेप्सोत्कण्ठानिवेदने तत्संश्लेषव्यवधायकपापरूपभवसागरं शोषयति भगवान्विशिखदवाशुशुश्रणिना । चेतनज्ञानाग्निना जनितो भगवत्क्रोधाग्निः सर्वकर्माणि भस्मसात्कुर्यादित्यध्यक्षीकार्यत इव भगवता । अस्मज्ज्ञानजन्यभगवत्क्रोधाग्निरस्मत्पापसागरं शोषयति । नास्मज्ज्ञानमात्रस्य तत्सामर्थ्यम् ॥

सर्वावस्थसकृत्प्रपन्नेत्यादि । सर्वलोकशरण्यकर्तृकशरणागतिभङ्गरूपमहापराधिनमपि शरणं गतं ररक्ष । तदुच्यते सर्वावस्थेति । तादृक्प्रवृद्धो मन्युरार्द्रापराधिनस्तस्य प्रणामक्षणे शशाम ॥

धर्मो विग्रहवान् । शत्रोर्मारीचस्य वचनं रावणं प्रति । शत्रुमपि रमयति गुणै रामः । 'न रामः परदारान्वै चक्षुर्भ्यामपि पश्यति' इति तत्काले शात्रवाविष्टा कैकेयी । शत्रुकृतप्रशंसा कथमयथार्था स्यात् । तत्कृतप्रशंसां सर्वः श्रद्धास्यति । अनुकूलकृतप्रशंसा पक्षपातप्रयुक्ता स्यात् । श्रद्धा खलु मुख्यमङ्गं प्रपत्तेः । सा चोत्पाद्यते शत्रुप्रशंसाशब्दोपादानेन । धर्मश्च प्रपत्तिरूपधर्मः स्यात् ॥

अधर्मविरतिं धन्वी स तन्वीत नः । किं शुभमातनोत्वयम् । अधर्मविरतिरूपं शुभमातनोतु । भवसागरविरतिं तनोतु । सागरशोषणवृत्तान्तेन सेतुनिर्माणं ज्ञाप्यते । तेन च सेतुना ब्रह्महत्याद्यधर्मविरतिर्भवति । 'धन्वी सः' इति 'रामः शस्त्रभृतामहम्' इति प्रसिद्धः स धन्वी । 'वीर्यवान्न च वीर्येण महता स्वेन विस्मितः' इति स्ववीर्याविस्मितोऽपि स्वयमेवावतारान्तरे दाशरथ्यवस्थमात्मानमेकधन्वित्वेन प्रशशंस । 'शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्' इति प्रपन्नस्य शिष्यस्य तत्त्वमवश्यकथनीयम्, न गोपनीयम् । 'शरणमुपगतान्नस्त्रायते शार्ङ्गधन्वा' 'अनितरशरणानामाधिराज्येऽभिषिञ्चेच्छमितविमतपक्षा शार्ङ्गधन्वानुकम्पा' इति शरणागतत्राणविषये शार्ङ्गधन्वित्वकीर्तनमेतच्छ्लोकार्थं व्यञ्जयतीव ॥

फक्कत्कौरवपत्तनप्रभृतयः प्रास्तप्रलम्बादय-
स्तालाङ्कस्य तथाविधा विहृतयस्तन्वन्तु भद्राणि नः ।
क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणै-
राकौमारकमस्वदन्त जगते कृष्णस्य ताः केलयः ॥

शेषशेषिणावुभौ समकालं भुवमलंचक्रतुः । शेषश्च शेष्य-

भवच्छेपी च शेषः। शेषमत्यन्तं संमानयते शेषी। स च शेषिधर्मः सम्यक्स्थाप्यते। 'कचित्क्रीडापरिश्रान्तं गोपोत्सङ्गोपबर्हणम्। स्वयं विश्रमयत्यार्यं पादसंवाहनादिभिः॥' इति रामपादसंवाहनं कृष्णेन। बृहत्त्वप्रदर्शनं खलु मुख्यकृत्यमत्र। तत्कथं निरूप्यत इति चेत्, हलाग्रेण हस्तिनपुरमाकृष्य गङ्गायां पातनम्, तेनैव यमुनाकर्षणमित्यादिभिः कृत्यैस्तस्य बृहत्त्वमुपलक्ष्यते। 'अक्षत्रां क्षितिं करिष्यामि' इत्याद्यो रामः। 'अद्य निष्कौरवामुर्वीं करिष्यामि' इति तृतीयो रामः। यथा कृष्णः शिशुर्विपुलोलूखलं चकर्ष तथा तज्ज्येष्ठः 'लाङ्गलाग्रेण नगरमुद्विदार्य गजाह्वयम्। विचकर्ष स गङ्गायां प्रहरिष्यन्नमर्षितः॥' उभयोर्भ्रात्रोः कर्षकत्वं समानम्। एकः संकर्षणः, अपरः कृष्णः। एको हलधरः। अपरश्चक्रधरः। एकेन शेषेणाद्यरामेण क्षितिर्निष्कण्टकं सन्ततक्षे। अनेन हलधरेण सा कृष्यत इव। क्षेमकृषीवलोऽयं हलधर इति श्रीभट्टपादाः। कौरवपत्तनकर्षणेन ब्रह्मबृंहितशेषस्याद्भुतबृहच्छक्तिः प्रदर्श्यते। ब्रह्मणो बृहत्त्वं ब्रह्मयितृत्वं च दर्शितं भवति। शेषशेषिणोरुभयोरपृथग्भूतत्वरूपानन्यत्वं सम्यग्बोध्यतेऽत्र तद्विहृतीनामपृथग्भूतत्वकथनेन अपृथग्भूतशब्दः सिद्धान्तप्रतितन्त्रभूतमर्थमुद्घाटयतीव। त-

दृष्यक्षीकरणं मुख्यप्रयोजनम् । विशिष्टाद्वैतरूपभद्राण्ययं तनोति । 'भद्राणि नस्तन्वीत' इत्युक्तम् 'नः शुभमातनोतु' इतिवत् । किं भद्रं तन्वीतेति पृष्टे प्रतिवचनं दीयते उत्तरार्धेन । उभयोरपृथग्भूतयोः क्षीरशर्करयोरिव परस्परास्वादकत्वम् । तादृशं भद्रमाशास्यते । तदेवाभिप्रेयत इव क्षेमशब्देन श्रीभट्टार्यैः । एतादृशापृथक्सिद्धिरूपभद्रविस्तारणादस्य बलभद्र इति नामेवेति व्यञ्जयन्त्याचार्याः शुभार्थकयद्रशब्दमत्र प्रयुञ्जानाः । उभयोरनन्यत्वमाभिप्रेत्य श्रीभाष्यकारैर्बलरामकृतप्रलम्बमुष्टिकादिहननमपि कृष्णचेष्टितत्वेनावर्ण्यतेत्युक्तं तात्पर्यचन्द्रिकायाम् ! 'भगवतो बलभद्रस्याप्येतदंशरूपत्वात्प्रलम्बमुष्टिकादिहननमप्येतत्कर्तृकतयोपात्तम्' इति । तदेवानन्यत्वमत्रापि द्योत्यत इवाचार्यैरपृथग्भूतशब्दं प्रयुञ्जानैः ॥

फक्कत्कौरवपत्तनप्रभृत्तयः । कृष्णो गजं कुवलयापीडं जघान । तज्ज्येष्ठो रामो गजाह्वयं नगरं हलाग्रेण विचकर्ष । प्रभृतिशब्देन यमुनाकर्षणवृत्तान्तो द्योत्यते । 'अनागतां हलाग्रेण कुपितो विचकर्ष ह ।' पादयोः पतिता यमुना चक्रन्द 'राम राम महाबाहो न जाने तव विक्रमम् । यस्यैकांशेन विधृता जगती जगतः पते ॥' इति । एनेन ब्रह्मवत्तस्य

महिमा सुस्पष्टं प्रकाश्यते । यदा सा 'परं भावं भगवतो भगवन्मामजानतीम् । मोक्तुमर्हसि विश्वात्मन्प्रपन्नां भक्तवत्सल ॥' इत्यभयं ययाचे, सद्यस्तदपराधमक्षाम्यद्बल इत्युच्यते । 'ततो व्यमुञ्चद्यमुनां याचितो भगवान्बलः ।' अनेन पूर्वोत्तराभ्यां स्थापितशरणागतत्राणधर्मोऽनेनापि प्रख्यापित इति सूच्यते ॥

तालाङ्कस्य तथाविधा विहृतयः । कनीयानिव रागतालादौ नायं रसिकः । अस्य तालो ध्वजाग्रे चिन्हभूतः । नेतरं तालं जानात्ययम् ॥

तन्वन्तु भद्राणि नः । 'नः शुभमातनोतु' इति यदुक्तं प्रथमश्लोके तदिहापि प्रार्थ्यते । उचितमिदं भद्रे भद्रप्रार्थनेति व्यज्यते बलभद्रनामदृष्टभद्रशब्दप्रयोगेण । किं भद्रं प्रार्थ्यत इति चेदुच्यते उत्तरार्धे ॥

क्षीरं शर्करयेत्यादि । उभयोः शेषशेषिणोस्तद्व्यापारयोश्च परस्परापृथग्भूतत्वेनान्योन्यास्वादयितृत्वरूपं भद्रं विवक्ष्यते भद्रप्रार्थने । शेषी क्षीरम् । शेषः शर्करा । शर्करीभूतः शेषः शेषिणमधिकं स्वादयति । केवलो दाशरथी रामो न तथैकः शोभेत, यथा गुहेन सहितो लक्ष्मणेन च सीतया । यावन्तः

शेषास्तावानधिकमधुरिमा शेषिणः । कृष्णस्य केलयः स्वादुत्वेन प्रसिद्धा इति 'ताः' इत्यनेन व्यज्यते । कृष्णशब्देन निर्वृतिभूमिरिति निर्वचनलब्धार्थो विवक्ष्यते । स्वयं निर्वृतिभूमिः कृष्णः । अखेलन् केलीरहितोऽपि स निर्वृतिभूमिः । तस्य कृष्णस्य केलयो जगते स्वदेरन् । ताः प्रसिद्धाः कृष्णकेलयोऽपि बलभद्रकेलिभिरपृथग्भूता अत्यन्तं रसवत्योऽभूवन् । अपायधुरंधरस्य साहसरसिकस्य कृष्णस्य क्षणविश्लेषमपि न सेहे ज्येष्ठ इति व्यज्यते श्रीमद्भट्टैः 'यद्विश्लेषलवोऽपि कालियभुवे कोलाहलायाभवत्' इति ॥

नाथायैव नमःपदं भवतु नश्चित्रैर्विचित्रक्रमै-
　भूयोभिर्भुवनान्यमूनि कुहनागोपाय गोपायते ।
कालिन्दीरसिकाय कालियफणिस्फारस्फटावाटिका-
　रङ्गोत्सङ्गविशङ्कचङ्क्रमधुरापर्यायचर्यायते ॥

निर्वृतिभूमिराचार्याणां कृष्णावतारः । तथा चोक्तं तात्पर्यचन्द्रिकायां नवमाध्यायचतुर्दशश्लोकभाष्यटीकायाम् 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।' इति कृष्णशब्दोऽपि पुरुषार्थहेतुत्वप्रतिपादनमुखेन परव्यूहादिसमस्तावस्थासाधारण इति ज्ञापनाय व्यापकयोः (नारायणवासुदेवशब्दयोः) मध्ये

पठितः। अवतारान्तरेष्वपि कृष्णशब्दः प्रयुज्यते 'उद्धृतासि वराहेण कृष्णेन शतबाहुना' इति। अस्यावतारस्य ब्रह्मत्वे न कोऽपि संशयीत। 'नाहं प्रकाशः सर्वस्य योगमायासमावृतः' इति श्लोकमवतारयन्तो मधुसूदनसरस्वत्य ऊचुः 'ननु जन्मकालेऽपि सर्वयोगिध्येयं श्रीवैकुण्ठस्थमैश्वरमेव रूपमाविर्भावितवति संप्रति च श्रीवत्सकौस्तुभवनमालाकिरीटकुण्डलादिदिव्योपकरणशालिनि कम्बुकमलकौमोदकीचक्रवरधारिचतुर्भुजे श्रीमद्वैनतेयवाहने निखिलसुरलोकसंपादितराजराजेश्वराभिषेकादिमहावैभवे सर्वसुरासुरजेतरि विविधदिव्यलीलाविलासशीले सर्वावतारशिरोमणौ साक्षाद्वैकुण्ठनायके निखिललोकनिस्ताराय भुवमवतीर्णे विरिञ्चिप्रपञ्चासंभविनिरतिशयसौन्दर्यसारसर्वस्वमूर्तौ बाललीलाविमोहितविधातरि तरणिकिरणोज्ज्वलदिव्यपीताम्बरे निरुपमश्यामसुन्दरे करदीकृतपारिजातार्थपराजितपुरन्दरे बाणयुद्धविजितशशाङ्कशेखरे समस्तसुरासुरविजयिनरकप्रभृतिमहादैतेयप्रकरप्राणपर्यन्तसर्वस्वहारिणि श्रीदामादिपरमरक्तमहावैभवकारिणि षोडशसहस्रदिव्यरूपधारिणि अपरिमेयगुणगरिमणि महामहिमनि नारदमार्कण्डेयादिमहामुनिगणस्तुते त्वयि कथमविवेकिनोऽपि मनुष्यबुद्धिर्जीवबुद्धिर्वेत्यर्जुनाशङ्कामपनिनीषुराह भगवा-

न्' इति । साधूक्तं श्रीमद्ब्रह्मानन्दैरेतद्विषये 'मधुसूदन-सरस्वत्याः पारं वेत्ति सरस्वती । सरस्वत्याः परं पारं वेत्ति वै मधुसूदनः ॥' इति । भूतार्थव्याहृतिरेषास्यात्र स्तुतिः । ब्रह्मत्वप्रदर्शिका विश्वरूपादिवृत्तान्ता बहवः सन्ति । किमर्थं तेषामन्यतमस्येहाग्रहणम ? यदि कौमारकेऽपि ब्रह्मत्वं निदर्श्येत; तत्तत्सम्यगुपपादयेत् । मिथ्यागोपस्य विश्वगोपत्वं प्रदिदर्शयिष्यन्त्याचार्याः । गोपायेदित्यवतारान्तरेषु प्रार्थना । गोपवदाचरेदित्यर्थद्वयं भवेदत्र । तन्न ह्यास्यते वैचित्र्यदिद-र्शयिषुभिराचार्यैः । 'चित्रैर्विचित्रक्रमैः' इत्यस्मिन्श्लोकेऽपि वैचित्र्यसक्तताप्रकटनम् । तर्हि शैशवेऽपि मात्रे मुखं व्या-दाय तत्र विश्वं प्रादर्शि । तदपि गोपालबालकृतम् । बाल्ये प्रदर्शनादपि कौमारके तत्प्रदर्शनं निपुणतरं स्यात् । किमर्थं कालियमर्दनचरित्रोपादानमिति चेत्, सन्त्यत्र बहवो हेतवः । रङ्गे धामनि नटनं खलु प्रतिजज्ञे । वृत्ता अवतारा अत्र समाप्यन्ते । भाव्यवतारः कश्चिदवशिष्टः । वृत्तावतारपरि-समाप्तौ नृत्तवर्णनसंभवे तदुपादानमत्र सुसङ्गतम् । अत्र कालियफणा रङ्गं भवतीत्युच्यते । नवनीतनटनादेर्यद्यपि नवनीतादपि स्वादुत्वमस्ति, न तेन बृहत्त्वमुपपाद्येत । कृष्णत्रयमस्मिंश्चरित्रे सङ्गतमिति चारु दर्श्यते श्रीशुकेन

'विलोक्य दूषितां कृष्णां कृष्णः कृष्णाहिना विभुः' इति वदता । तन्मूर्धरत्नीनकरस्पर्शातिताम्रपादाम्बुजोऽखिलकलादिगुरुर्ननर्त ।' इति विचित्रं प्रदर्श्यते नर्तनोपक्रमः । नर्तनभूमौ भूतले दीपपङ्क्त्यो निवेश्येरन्पादजङ्घादिसुन्दरललितचेष्टाः प्रकाशयितुम् । तत्कार्यं निर्वर्त्यते नागशिरोरत्नैः पादाम्भोजाधःस्थितैः । अखिलकलादिगुरौ रसमये कृष्णे नृत्यति सर्वे प्रसिद्धगायका धावन्ति नवनवक्रमान् शिक्षितुम्, तत्र तालादिना सह कर्तुं च । नर्तनेऽवश्यं तालापेक्षा । वेणुगाने न तन्नैयत्यम् । नवनीतनाट्ये निमन्थमुखरं दधि तालं निबबन्ध । अत्र 'तं नर्तुमुद्यतमवेक्ष्य तदा तदीयगन्धर्वसिद्धसुरचारणदेववध्वः । प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः ॥' इति गन्धर्वसिद्धादीनां तत्रागत्य सर्वैस्तालाद्युपकरणवाद्यैर्गीतादिभिश्च सह कर्तृत्वमुच्यते । प्रथमं वाद्याद्युपहारः । अनन्तरं पुष्पोपहार इति चारु व्यज्यते परमरसिकेन ऋषिणा । 'उपसेदुः' इति गुरूपसदनं व्यज्यते । अखिलकलादिगुरुः खलु नृत्यति । अयं प्रथमगुरुर्न केवलमध्यात्मविद्यायाः । तमुपसद्य बहु शिक्षणीयमस्ति सिद्धानामपीति सिद्धशब्देन व्यज्यते । आदिगुर्वपेक्षया ते साधका भवन्ति । ईदृशश्चित्रता-

ण्डवेन वृत्तावतारसमापनं रोचयन्त आचार्याः । त्रुटितज-नताशोकः श्लोको य उदगायत भगवता, तदुपदिष्टोपायस्या-नुष्ठानमपि संपादितं भवत्यनेन । 'क्रोधोऽपि तेऽनुग्रह एव संमतः ।' 'तपः सुतप्तं किमनेन पूर्वम्.... कस्यानुभावो-ऽस्य न देव विद्महे तवाङ्घ्रिरेणुस्पर्शाधिकारः' इति पर-मकश्मलमापन्नस्य नागस्येषदपि प्रयत्नं विना शरणवरण-बुद्धिमात्रसंपादनेन स्वशिरसां भगवत्पादाम्भोजसंयोजनप्र-णामादिसौकर्यं बभूव । भगवत्पादाम्बुजसंयोगेन सर्वाणि शिरांस्यनुजगृहिरे । अस्माकमेकस्यापि शिरसस्तत्संयोगो दुर्लभः । शिरःसंख्याधिक्यं सकृत्प्रणामेप्यनेकप्रणामसंपा-दनानुकूलम् । 'तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपी-तवसनं स्मितसुन्दरास्यम् । क्रीडन्तमप्रतिभयं कमलो-दराङ्घ्रिं संदश्य मर्मसु रुषा भुजगश्छाद ॥' इति पुष्पहाससुकुमारं कुमारं क्रूरं ददंशायं नागः । परमापद-मापन्नो रुधिरमुरु वमन् गत्यन्तराभावान्ननाम तम् 'नारा-यणं तमरणं मनसा जगाम' इति । तादृशमार्द्रापराधिनं शरणोक्तिमात्राद्ररक्ष ; न केवलं तं मुमोच, किं तु तमनुज-ग्राह सुपर्णादभयप्रदानेन । सर्वभूतेभ्यः खलु तेनाभयं दीयते 'सुपर्णस्त्वां नाद्यात्' इति । क्रोधोऽप्यनुकूलं परिणतः ।

समुद्रराजो भगवन्तं न ददर्श । आहूतो नागच्छन्मार्गदानाय । अयं नागो महापराधी, आर्द्रापराधी च । अयमप्यरक्षि । त्रिविक्रमपादाम्भोजेन त्रिजगदङ्कितमभूदित्युक्तम् । तदङ्कनं वयं न पश्यामः । अयं नागस्तत्पदलाञ्छितोऽभूत् । भगवत्पादचिन्हितोर्ध्वपुण्ड्रं शिरःसु दधार । न केवलं सः । तज्जातिभवाः कृष्णसर्पाः सर्वेऽपि तच्चिन्हवन्तोऽभूवन् । पुरा परमदुष्टोऽपि नाग आदिदेवं शरणं समाश्रित्य निर्दोषो भागवतोऽभूत् । एतद्वृत्तान्तेनान्यदपि तत्त्वं द्योत्यत इति वर्ण्यते आचार्यैर्यादवाभ्युदये 'प्रणेमुषां प्राणभृतामुदीर्णं मनो विनेष्यन्विषमाक्षवक्त्रम् । अकल्पयत्पन्नगमर्दनेन प्रायेण योग्यां पतगेन्द्रवाहः ॥' अस्मन्मनः कृष्णाहेरपि दुष्टम्, कृष्णतरं मलघनम् । विषमाक्षवक्त्रं मनः । प्रणमतां मनो मर्दनीयं भगवत्पादाम्भोजेन, विनेयं च । बहुपायं मनोमर्दनम्, दुर्घटतमं च । कष्टं तत्कार्यं सिषाधयिष्यंस्तदपेक्षया सुलभेन कालियशिरोमर्दनेन मर्दनाभ्यासं करोतीव भगवान् । अस्मन्मनसो विनयनमेव वयमाकाङ्क्षामः । 'शतैकशीर्षणः' इत्येकशतसंख्या कालियशिरसाम् । तत्पाठ आचार्यसंमतः स्यात् । 'शतं चैका च हृदयस्य नाड्यः' इति मनसः एकशतनाडीवत्त्वम् । पतगेन्द्रवाहनो भगवान् किमर्थं कालि-

यशिरःसु नृत्येत् ? गरुडवाहस्य स्ववाहभूतगरुडच्छायामात्रेण स नागो हन्येत । अस्मन्मनोमर्दनाय तदभ्यासं कर्तुमेव भगवान्कालियशिरांसि मर्दयन्ननर्तेत्युत्प्रेक्षितमाचार्यैः । कालियमर्दने महान् रस आचार्याणाम् । विचित्रं तन्नर्तनानुगुणवर्णनं दृश्यते यादवाभ्युदये 'लोलापतच्चरणलीलाहतिक्षरितहालाहले निजफणे नृत्यन्तमप्रतिघकृत्यं तमप्रातिभमत्यन्तचारुवपुषम् । देवादिभिः समयखेवादरत्वरितहेवाकघोषमुखरैर्हृष्टावधानमथ तुष्टाव शौरिमहिरिष्टावरोधसहितः ॥'

नाथायैव नमःपदं भवतु नः । अयं मम नाथो रङ्गनाथः कालियशिरोनृत्तरङ्गे नृत्यति । नामैकदेशे नामग्रहणम् । यदुनाथः कृष्णो मम नाथः । तस्मिन् गरीयसी भक्तिः सूच्यते एवकारेण । यथा कालियं विनयते तथा मन्मनोऽपि संमर्दनेन विनीय तत्र नृत्यात् । तदनमने मर्येत शिरः ॥

चित्रैश्चरित्रक्रमैरित्यादि । सर्वाश्चर्यमयो देवः किमस्य नाश्चर्यम् । अमुमेव नारद आश्चर्यत्वेन निर्दधारेति हरिवंशे आश्चर्योपाख्याने । स्वस्मिन्नाश्चर्यपदविश्रान्तिं प्रतिषेद्धुमसमर्थः 'अहमाश्चर्योऽस्मि' इति नारदं प्रत्यूचे नाथः ॥

कुहनागोपाय । मिथ्यागोपाय, मायागोपाय; गोपवेषाय ॥

गोपायते । यद्यप्यात्मानं योगमायया गोपयामास, अस्मान् गोपायति ॥

कालिन्दीरसिकाय । रसिकः खलु नृत्येत् । यथा भावुका रसिकास्तथा रसस्वरूपोऽयं परमरसिकः । कालिन्दीरसिकोऽयं यामुनः, तस्याः कृष्णाहिना दूषणं न मर्षयेत् । कालिन्द्यां व्रजयुवतिभिः सह जलक्रीडादेरयमहिः परिपन्थी । कालिन्दीरसिकत्वमहिमर्दने तदुपरि नर्तने च हेतुः । 'नद्यस्तदाकर्ण्य मुकुन्दगीतमावर्तबुद्बुदमनोभवभग्नवेगाः । आलिङ्गनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः ॥' इति कालिन्द्याः कृष्णगानरसिकत्वम् । रसिकायां तस्यां नद्यां विहरणरसिकः कृष्णः । तस्यां नर्तनेन तां सन्तोषयितुमिच्छति ॥

कालियफणिस्फारस्फटेत्यादि । 'यद्यच्छिरो न नमदङ्ग शतैकशीर्ष्णस्तत्तन्ममर्द खलदण्डधरोऽङ्घ्रिपातैः ।' इति श्रीशुकानुभवः । समीचीनसन्मार्गनिर्माता खलु भगवान् । मार्गरचयितारः शर्करासञ्चयान्निवेश्य तान्मर्दयेयुर्दण्डादिभिः ।

या याः शर्करा विषमा उद्धृतशिरसः स्युस्ता मर्दयेन्मार्गसमीकरणार्थम् । एषोऽनुभवश्चारु प्रदर्श्यते आचार्यैरत्र । श्रीशुकस्तदेवाभिप्रेयाय 'ममर्द खलदण्डधरोऽङ्घ्रिपातैः' इति । अङ्घ्रिणापि संमर्दनं क्रियेत तत्कर्मकरैः । स्फटावाटिका मार्गो भवति । स्फारत्वं मार्गनैशाल्यं द्योतयति । विशङ्कचङ्क्रम—' 'पर्यायचर्या—' इति विषमा उच्छिरसः शर्कराः सङ्क्रम्यन्त इति सूच्यते ॥

यते । गच्छते नाथाय । अयं चर्या गच्छत्यस्मत्सुचर्यासंपादनार्थमिति व्यज्यते ॥

भाविन्या दशया भवन्निह भवध्वंसाय नः कल्पतां
कल्की विष्णुयशःसुतः कलिकथाकालुष्यकूलंकषः ।
निःशेषक्षतकण्टके क्षितितले धाराजलौघैर्ध्रुवं
धर्मं कार्तयुगं प्ररोहयति यन्निस्त्रिंशधाराधरः ॥

श्वेताश्ववदनः श्रीहयग्रीवः प्रथमावतारः । तेनोपक्रान्तावतारनाटिका । कल्कः श्वेताश्वः । तद्वता कल्किनोपसंह्रियते । इदं चाचार्याणां परमभोग्यम् । धर्मसंस्थापनार्थमवताराः । धर्मेषु श्रेष्ठो कार्तयुगधर्मो निवृत्तिधर्मः । तस्य नितरां ग्लानिर्भवत्यस्मिन्कलियुगे । वर्धमाने कलौ क्षितितलं कृत्स्नं कण्टक-

जनैरेव व्याप्येत । 'उत्खातलोकत्रयकण्टकेऽपि' इति राघवस्य प्रथा लोककण्टकभूतरावणसंहारेण । 'त्रिदिवमुद्धृतदानवकण्टकम्' इत्यन्यदा दानवमात्रस्य कण्टकत्वम् । कलियुगान्ते नष्टन्यायत्वाद्धर्मस्याधरोत्तरत्वात्सर्वस्य निःशेषजनाः कण्टकीभवेरन् । कृत्स्नकण्टकजनानां क्षतिः कार्येत श्वेताश्वारूढेन निस्त्रिंशधरेण भगवता । संहारः सृष्टिश्चोभयमपि प्रदर्श्येतानेनावतारेण । लक्षणद्वयसमन्वयस्तेनोपपाद्येत । संहारोऽप्यनुग्रहे पर्यवस्येदिति निस्त्रिंशस्यापि मेघत्वम् , तेन च धर्ममेघेन कार्तयुगधर्मबीजप्ररोहजनकत्वं च वर्ण्यते । अयं चावतारो भावी, न वृत्तः । वृत्ता अवतारा अद्यापि सन्ति, आराध्यन्ते च तत्तद्वर्षेष्विति श्रीभागवते प्रोच्यते पञ्चमस्कन्धे । 'रम्यके भगवतः प्रियतमं मात्स्यमवताररूपं तद्वंशपुरुषस्य मनोः प्राक्प्रदर्शितम् , स इदानीमपि महता भक्तियोगेनाराधयति' इत्यादिना । तादृशभक्तियोगं विनैव निर्भरत्वप्रपत्त्यारूढानां भावुकानामस्माकं भक्तिभराङ्गीकर्त्रा भगवता स्वयं प्रत्यक्षवत्प्रदर्श्यन्ते वृत्तावताररूपाणीति प्रथमश्लोके व्यञ्जितमाचार्यैः 'लब्धनिर्भररसैरभ्यर्थितो भावुकैः' इति । वृत्तावताराः सम्यग्वर्णिता महर्षिभिः । भविष्यदवतारोऽयम् । भूतावतारभावनाद्भाव्यवतारभावनं क्लिष्टतरं स्यात् ॥

भाविन्या दशया भवन्निह । परिदृश्यमाना इतरावतारमूर्तयो भूतदशया भवन्तः । अयं तु भाविदशया भवन् । सर्वेषामवताराणां व्यवहितत्वं तुल्यम् । इतरेषु भूतकालव्यवधानमत्र भविष्यत्कालव्यवधानमिति भेदः । सर्वेषां भवत्स्वरूपवर्तमानत्वतुल्यत्वमपि तुल्यमिति भवच्छब्देन व्यज्यते । अध्यक्षयिता सर्वशक्तो भगवान् । कर्मोपाधिहाने न त्रिकालभेदः । सर्वोऽपि कालः सततवर्तमान एव स्यात् । भगवता स्वावताराध्यक्षीकरणे भविष्यन्नपि भवन् भवेदिति व्यज्यते ॥

भवध्वंसाय नः कल्पताम् । किं शुभमस्माद्धाव्यते । न दुःखध्वंसः, किं तु भवध्वंसः । भवन्नयं भवध्वंसं तनोत्विति विरोधोऽप्यापाततश्चारु व्यज्यते ॥

कल्की । श्वेताश्वविशिष्टः ॥

विष्णुयशःसुतः । विष्णुयशसो जातोऽयम् । प्रणष्टप्राये विष्णुयशसि तद्यशोरूपकार्तयुगधर्मं प्रतिष्ठापयिष्यन्नयं यशोनामा जनिष्यते । 'तस्य नाम महद्यशः' इति भगवतो यशोनामत्वं प्रसिद्धम् । तस्य विष्णुयशोनामा ब्राह्मणोऽनुरूपः पितेति व्यज्यते । तमसावृते कलावयं यशसो जातः । अस्य

यश: कलिमलापहम् ॥

कलिकथाकालुष्यकूलंकषः । अयं धाराधरहस्त: प्रभूतं धर्मं वृष्ट्वा कालुष्यमपनुदति । धर्ममेघेन धर्मेण पापमपनुदति । कलिकथां कथाशेषं नयति । कथायाः कथाभवनं न्याय्यम् ॥

निःशेषेत्यादि । नैकोऽप्यकण्टको भवति । कृत्स्नं परिवर्तयित्वा नूतनशुद्धप्ररोहा अवतार्यन्ते ॥

धाराजलौघैः । कण्टकक्षपणसाधनो निस्त्रिंशो धर्मजलौघवर्षुकधाराधरोऽपि भवति । दुष्कृद्विनाशनमेव धर्मसंस्थापनसाधनमपि भवति ॥

ध्रुवम् ध्रुवं धर्मं प्ररोहयति । धर्मं ध्रुवं प्ररोहयति । ध्रुवमित्युत्प्रेक्षार्थकत्वमपि । धाराधरत्वेनोत्प्रेक्षा समर्थ्यते ॥

धर्मं कार्तयुगं प्ररोहयति । त्रेतायुगप्रवर्तितकार्तयुगवृत्तान्तो धर्मो विग्रहवांश्चक्रवर्तितनूजः । अयं कलियुगे तद्धर्मं प्ररोहयति ॥

यन्निस्त्रिंशधाराधरः । अस्य मेघस्य खड्गोऽपि मेघो भवति ॥

इच्छामीन विहारकच्छप महापोत्रिन् यदृच्छाहरे
रक्षावामन रोषराम करुणाकाकुत्स्थ हेलाहलिन् ।
क्रीडावल्लव कल्कवाहनदशाकल्किन्निति प्रत्यहं
जल्पन्तः पुरुषाः पुनन्ति भुवनं पुण्यौघपण्यापणाः ॥

पूर्वोदाहृतशाङ्करश्लोकप्रकारेण सर्वावतारानेकीकृत्याखण्डानुभवं प्रदर्शयत्यखण्डरमलब्धये । यद्यपि प्रत्येकं पूर्णत्वमस्त्येव भगवतः, तथाप्यनेकपूर्णसहानुभवजन्यो रसोऽखण्डतमः स्यात् । एकस्यैव दश भूमिकाः । तासामखण्डानुभवसंपादनमुचितम् । दशप्रकारविशिष्टाद्वैतानुभवो भवेत् । विशिष्टैक्यमवतारनाटकप्रदर्श्यम् । यथा सर्वचिदचित्प्रकारविशिष्टब्रह्मानुभवस्तथा सर्वावतारप्रकारविशिष्टप्रकार्यनुभवो निरूप्यते । प्रथमश्लोके समासः । अनन्तरं दशभिः श्लोकैर्व्यासः । पुनरपि निगमनरूपसमासः । तार्किकसिंहोऽयं कविसिंहोऽनुमानसरणिं न जहाति । प्रथमश्लोके प्रतिज्ञा । अत्र निगमनम् । विशिष्टवैशिष्ट्यावगाहिज्ञानरूपं फलं लभ्यते । प्रायेण तत्तत्पूर्वश्लोकोक्तानुभवा अत्रत्यैः शब्दैः सङ्गृह्यन्ते ॥

इच्छामीन । पूर्वं परोक्षतया प्रार्थना भगवतः । इदानीं तत्तच्छ्लोकानुभवेनाध्यक्षितं भगवन्तं समक्षं संबोधयतीत्य-

यचेयम् । अध्यक्षितो भावुकैरिति यदुक्तं तदन्वर्थितम् । शुभमातनोत्विति प्रार्थितं फलितम् । भक्तानुजिघृक्षया प्रदर्शितडोलारोहविषयो दोहद इच्छाशब्देन प्रत्यभिज्ञाप्यते । अस्मदनुग्रहे दोहदस्तस्य, यथा गर्भिण्याः । वीक्षणैः प्रजारक्षणं मत्स्यानां स्वभाव इत्युक्तम् । वीक्षणस्येच्छापर्यायत्वं वेदान्तेषु । ब्रह्ममीनस्यास्येक्षणं सङ्कल्पार्थकम्, यथा 'तदैक्षत बहु स्यां प्रजायेय' इत्यत्र ॥

विहारकच्छप । 'विहरते देवः सहैव श्रिया' इत्युक्तविहारप्रत्यभिज्ञापनम् । कूर्मस्य ध्यानम् । प्रत्याहारे स दृष्टान्तीक्रियते । तस्य च कथंचिद्व्यञ्जनं विहारशब्देन ॥

महापोत्रिन् । पूर्वोक्तपोत्रिशब्दस्यैव ग्रहणम् । पवित्रशब्दसन्निकृष्टत्वात् । मीनशब्दो दिव्यप्रबन्धप्रयुक्तशब्दपरिग्रहाय । कच्छपशब्दः 'मत्स्याश्वकच्छप—' इति शुकोक्तानुवादाय । महच्छब्दो बृहत्त्वोपपादकः । तन्नाम्नस्तत्त्वस्य स्मारणेनेच्छासङ्ग्राहकबुद्धिग्रहणाय च । स्वबुद्ध्या स्वेच्छयायं पोत्र्यभवत् ॥

यदृच्छाहरे । यादृच्छिकात्प्रादुर्भवनादित्युक्तं स्मार्यते । यदृच्छाप्रादुर्भूतोऽयं हरिः । हरिर्नित्यहरिः स्यात् । अयं

यदृच्छाहरिः । हरिरपि रामो हनुमन्तं हरित्वेन संबोधयति 'यत्त्वयोपकृतं हरे' इति । तस्य हरिर्हनूमांस्तदापदुद्धारकः । नरत्वमधः कृतं नरहरिणैव । अतो हरित्वमात्रेण संबोधनम् ॥

रक्षावामन । आश्रितमिन्द्रम्, तच्छत्रुं बलिम्, उदासीनं त्रिलोकं च ररक्ष । त्रीन् ररक्ष यथा तत्पादसलिलम् । सुहृद्दुर्हृदुदासीनत्रयाणामपि रक्षकत्वात्तस्य रक्षा असाधारणी एष ह्येव वामनीः । सर्वाणि वामानि नयति । अयं वामनः कथं रक्षकादन्यो भवेत् ॥

रोषराम । अस्य नाममात्रं राम इति । विरुद्धमपि कश्चिन्नाम भवेद्यथार्कस्य महावृक्ष इति नाम । यौगिकार्थनिर्बन्धेऽयं क्षत्त्रविरामकरो रामः । रोष एवायं रमते । अतो रोषरामः ॥

करुणाकाकुत्स्थ । नात्र लोकरामे रामशब्दः । जामदग्न्यविषयप्रयुक्तरामशब्देन नास्य तदनन्तरमेव संबोधनं न्याय्यं स्यात् । काकुत्स्थ इति श्रीशङ्करनामानुवादो वा । पारावारेत्यादिश्लोकः कृत्स्नोऽपि करुणाप्रतिपादकः ॥

हेलाहलिन् । हलिनो हेला युज्यत इति व्यज्यते ॥

क्रीडावल्लव । कुहनागोप, मिथ्यागोप । देव इत्युपक्रमे व्यञ्जितस्य क्रीडनस्यात्र कण्ठोक्तिः ॥

कल्कवाहनदशाकल्किन् । कल्कीत्युक्तं तदवतारवर्णनश्लोके । कल्क इति कलङ्कार्थकः स्यात् । कलियुगेऽवतरन् कल्की सकल्कः स्यात् । तद्व्यावृत्त्यर्थं कल्कशब्दस्य श्वेताश्व इत्यर्थो वर्ण्यते । कल्करूपश्वेताश्ववाहनदशायामयं कल्की भवति । नायं कल्करूपकलङ्कवान् । भाविन्यां कल्कवाहनदशायामयं कल्की । कथमसिद्धस्य भविष्यतः संज्ञाकरणम्, तस्य च संबोधनमिति चेत्, 'अस्य सूत्रस्य शाटकं वय' इत्यादाविव भाविनीमवस्थामाश्रित्यापि संज्ञाकरणं संभवेदिति बोध्यते । नायं प्रकार्यसिद्धः । प्रकारमात्रं भाव्यपि व्यज्यते । कल्कवाहनदशायामयं कल्की भवति । तेन प्रकारेणायं कल्की, नेतरथा दोषवत्त्वादिना । 'भाविन्या दशया भवन्' इति वर्णनानुगुणोऽयं पाठः । कल्कवाहन दशाकल्पिन्निति पृथक्पाठो वा । इतिशब्दस्याभ्यासस्तदा अपेक्ष्येत । इति दशाकल्पिन्निति प्रत्यहं जल्पन्तः ॥

इति प्रत्यहं जल्पन्तः । न पूर्वोक्ततत्तदवतारविषयश्लोकानां जल्पनमपेक्ष्यते । एतच्छ्लोकोक्ततन्नामावलीपठनमप्यलम् । न सम्यङ्नामपठनमप्यपेक्ष्यते । तज्जल्पनमप्यल-

मिति व्यज्यते । भावशून्यं स्वरनेत्राङ्गादिविक्रियारहितं जल्पनमप्यलम् । 'जामदग्न्यस्य जल्पतः' इति भीष्मोक्तवत् । न रोषरामस्य शास्त्रप्रवचने स्वरनेत्राङ्गविक्रियादिसंभवः । तस्य रोषरूपविक्रियैकैव । नान्या विक्रिया ॥

पुरुषाः । पुरुषमात्रस्यैतन्नामजल्पनेऽधिकारः । नात्राधिकारिव्यवस्था ॥

पुनन्ति भुवनम् । पवित्रयन्ति भुवनम् । 'तत्रोपजग्मुर्भुवनं पुनानाः' इति सप्ताहावधिजीवितं परीक्षितमनुग्रहीतुं श्रीभागवतं च श्रोतुमागतमहाभागर्षिसङ्घस्येव एषां भुवनपुनीतृत्वमिति तच्छब्दप्रयोगेण व्यज्यते । यथा ब्रह्माण्डः पवित्रीकृतो भगवद्व्रोणारवैरित्युक्तम्, तथैतेषां जल्पनैः पवित्रीक्रियन्ते भुवनानीति व्यज्यते ॥

पुण्यौघपण्यापणाः । तत्तदवतारकथाश्रवणपठनादिभिः कोटिकोटिपुण्यलाभः श्राव्यते तत्तत्फलश्रुतिभिरिति प्रसिद्धम । दशावतारनाम्नां जल्पनेन तत्फलं कृत्स्नमेभिः सञ्चितं भवति । पुण्यपण्यसंभारोऽनन्त एषाम् । एते सञ्चरन्तः पुण्यापणाः । नैतेऽल्पपण्यापणाः, किं त्वोघपण्यापणाः । अल्पपण्यवणिजो द्रोणादिपरिमितप्रमाणैर्विक्रीणीयुः । एते रा-

शिपण्यवणिजो राशिभिर्विक्रीणीयुः । राशिपण्यापणाः पुण्यौघानेव लम्भयेयुर्नाल्पाल्पं द्रोणादिपरिमितं पण्यमिति व्यज्यते ओघशब्देन । एते आपणाः । न विक्रेतारो वणिजः । 'तं ज्ञानपण्यं वणिजं वदन्ति' इति ज्ञानविक्रेतारो गर्ह्यन्ते । पुण्यपण्यविक्रेता गर्ह्यतराम् । तेषामुरुसंभृतपुण्यपण्यराशयस्तेषु यत्किंचित्सौहार्दं यदा कदापि प्रकटितवद्भिर्दायत्वेन विभज्येरन् । अनन्तपुण्यसंभारवत्त्वादेते पुण्यपण्यापणाः । नात्र क्रयो विक्रयो वा । नात्र वणिक् कश्चित् । अवतारदशकस्यापि रहस्यवेत्तुरस्येह जन्मन्येव मुक्तिः सिद्धा । शरीरवियोगे सुहृदः साधुकृत्यामुपगच्छन्ति । अस्य भूरि पुण्यं विभज्यते सुहृद्भिः । सौहार्दमेव पण्यक्रयमूल्यम् । एतज्जल्पनस्य श्रवणमपि सौहार्दमेव । तन्मात्रेण पण्यलाभो भवतीति 'जल्पन्तः पुनन्ति' इत्यनेन द्योत्यते । जल्पितनामश्रोतृषु स्वभूरिपुण्यं सङ्क्रमयन्ति । वणिग्रहितपुण्यौघपण्यापणेऽस्मिन् यो यद्यत्पुण्यं वाञ्छति तत्तस्माल्लभेत श्रवणरूपसौहृदमात्रेण । नाल्पं लभ्येतास्मादापणात् । ओघैः पुण्यं लभ्येत । 'पण्यं न चेदस्ति तदस्तु पुण्यम्' इति नैषधे । एते संचरन्त आपणाः । पण्यसंभारस्यातिभूयस्त्वे संभारलघूकरणार्थं सद्यस्तस्य भूरिविनियोगाय पण्यौघानादाय बहिः

सञ्चरेयुः; स्वल्पमूल्यार्थमपि वेगेन विक्रीणीयुरिति प्रसिद्धम्। एते पुण्यभारार्दितास्तद्दानाय पात्राण्यन्विष्यन्तश्चरन्ति॥

विद्योदन्वति वेङ्कटेश्वरकवौ जातं जगन्मङ्गलं
देवेशस्य दशावतारविषयं स्तोत्रं विवक्षेत यः।
वक्त्रे तस्य सरस्वती बहुमुखी भक्तिः परा मानसे
शुद्धिः कापि तनौ दिशासु दशसु ख्यातिः शुभा जृम्भते॥

अवतारनामावलीर्जल्पन्तः पुरुषाः पुनन्ति भुवनम्। ते च भूरिपुण्यपण्यापणा इत्युक्तम्। आपणत्वरूपणेन भूरिपुण्यसंभारो नामजल्पनमात्रेण लभ्येतेत्यपि व्यञ्जितम्। तज्जल्पनमात्रश्रोतारस्तत्पुण्यभाज इत्यपि व्यञ्जितम्। इदानीं मास्तु नाम पठनम्, एतत्स्तोत्रविवक्षामात्रेण भूयः फलं लभ्येतेति तत्फलं कीर्त्यते॥

विद्योदन्वति। समुद्रशायी भगवांस्तत्र त्रिरवततार। यदि वयमुदन्वान्भवेम, अस्मासु सोऽवतरेदिति स्वस्योदन्वत्त्वं संपाद्यते कविना। नायं प्राकृतः क्षारसमुद्रः, क्षीरसमुद्रो वा। किं त्वप्राकृतशुद्धमधुरैकान्तविद्यासमुद्रः। कल्पान्तयूनो भगवतोऽयं प्रियस्तल्पो भवेत्। उदन्वत्यवतारस्य भगवतः प्रियत्वात्, अस्मिन्विद्योदन्वत्यवतारविषय-

स्तोत्रमवतर्तु सुसांप्रतमिति व्यज्यते ॥

वेङ्कटेश्वरकवौ । कविर्भगवान् । कविरयं नटः । कवि-नटभूमिकास्तोत्रं कवौ जातम् । 'अहिरेव ह्यहेः पादान्विजानाति न संशयः ।' कविः कवेर्नटस्य भूमिकाः स्तौति । कवेर्जनिं कविः सम्यग्जानीयात् । युक्तमिदं देवेशस्यावतार-स्तोत्रं वेङ्कटेश्वरो रचयामासेति ॥

कवौ जातं जगन्मङ्गलम् । यथा स्तुत्यः कविः स्रष्टा, स्तोता कविरपि स्रष्टा । स्तुत्यस्य कवेः स्वेतरसृष्टिर्नियति-कृतनियमवती सुखदुःखमयी । तस्य स्वावताररूपस्व-सृष्टिस्तु नियतिकृतनियमरहिता स्वेच्छामात्रनिर्वृत्ता ह्लादैक-मयी । स्तोतुः कवेः स्वेतरसृष्टिस्तथैव ह्लादैकमयी । निरति-शयह्लादैकमयमिदं स्तोत्रम् । कविरूपोदन्वति कविमतिमथा मथिते जातमिदं जगन्मङ्गलं स्तोत्रम् । यथा क्षीरोदधि-मथने सर्वमङ्गला जाता, तथेदं जगन्मङ्गलं जातमेतदुद-न्वन्मथने । यथा जातो भगवदवतारो जगत्कल्याणभूतस्त-थेदं तज्जन्मस्तोत्रम् । यादृशं प्रतिपाद्यं भगवज्जन्म तादृशं तत्प्रतिपादकस्य स्तोत्रस्य जन्म । 'देवो नः शुभमातनोतु' इति शुभातननप्रार्थनायामेतत्स्तोत्ररूपजगन्मङ्गलविस्तारणम-प्यन्तर्गतमिव ॥

देवेशस्य । यद्यप्ययं नटाग्रणीर्नायं नटेशः, किं तु तस्य देवस्यापीशो देवेश ॥

दशावतारविषयस्तोत्रं विवक्षेत यः । एतत्स्तोत्रविवक्षामात्रस्य भूयः फलमस्ति । विविदिषामात्रस्य, वेदनस्य वा फलत्वेन साध्यत्वं स्यान्मतभेदेन यज्ञादिना । अस्या विवक्षायाः फलं स्यादेव । अवतारदशकविवक्षात्वात् । एकस्य ज्ञेयस्य ब्रह्मणो विविदिषा वा, वेदनं वा लिप्स्येतेति विप्रतिपत्तिः स्याद्यज्ञादिश्रुत्यर्थविषये । कथं भगवदवतारदशकविषयस्तोत्रविवक्षाया भूरिफलवत्त्वं न स्यात्? नात्र विविदिषापर्यन्तापेक्षा । विवक्षामात्रमलम् । अक्षरराशिग्रहणमात्रेऽध्ययनविधिपर्यवसानं प्रतिजानीते सूत्रकारः 'अध्ययनमात्रवतः' इति सूत्रं प्रणयन् ॥

वक्त्रे तस्य सरस्वती । वक्तुं खलु विवक्षति । तेन खलूच्चार्येत । वक्तरि वक्तुर्वक्त्रे सरस्वती सन्निधत्ते । 'स्नुषा दशरथस्याहम्' इति सीताया भूयान्बहुमानः श्वशुरे । श्वशुरस्यापि तुल्यं प्रेम स्नुषायाम् । भर्तुर्ब्रह्मणोऽक्षिदानं वेदसरस्वतीदानं च कृतं प्रथमेनावतारेण । इतरे चावतारा ब्रह्मदत्तवरासुरपीडानिवर्तनार्थं कृताः । कथं तादृशेषु श्वशुरावतारेषु सा न रज्येत । भगवत्स्तोत्रे तस्या भूरिरुचिरिति बोध्यते

श्रीभट्टार्यैः 'भारत्या सहधर्मचाररतया स्वाधीनसङ्कीर्तनः' इति । एतद्दशावतारस्तोत्रविवक्षुवक्त्रे भारती सन्निधत्ते, शब्दार्थज्ञानं सम्यक्तस्य दत्वा भगवदवतारांस्तेन सम्यक्स्तावयितुम । स्वस्या अपि तत्स्तवनेऽन्वयः स्यादिति । श्वशुरस्य भगवतः स्तोत्रस्याज्ञकर्तृकपठनं सा न मृष्येत । अतो यो वा को वा जडोऽज्ञो एतत्स्तोत्रं विवक्षेत् तदिच्छाक्षण एव सा तद्वक्त्रे सन्निधत्ते तं ज्ञं कर्तुम् ।

बहुमुखी न चतुर्मुखी, यथा नाथमुखेषु । 'वहति महिलामाद्यो वेधास्त्रयीमुखरैर्मुखैः' इति नाथमुखेषु चतुर्मुखत्वमेव । अत्र तदधिकमुखत्वम् । तावत्कुतूहलं तस्याः । विद्योदन्वति कवौ जातेयं स्तोत्रसरस्वती । कथमेतां सरस्वती न बहुमन्येत ॥

भक्तिः परा मानसे । यथा वक्त्रस्य सरस्वत्या शोभा, तथा मनसो भक्त्या शोभेति व्यज्यते । भक्तिरहितं मनो जडमुखवद्गर्हणीयम् । विद्योदन्वतीति भक्तिसागरे इत्यप्यभिप्रेतम् । वेदान्ताचार्यप्रयुक्तविद्याशब्दस्य भक्तिवाचकत्वं स्वरसम् । भक्तिसागरे जातस्यास्य स्तोत्रस्य विवक्षणे एतन्मातृभूता भक्तिजलधिः परा भक्तिः स्वसुतं प्रकाशयितुमिच्छन्ती मनसि नियतं सानुग्रहं सन्निदध्यात् । मनसि खलु विवक्षा

जाता ॥

शुद्धिः कापि तनौ । विद्योदन्वति जातमिदं स्तोत्रं स्वविवक्षोर्विलक्षणं ब्रह्मवर्चसं ददाति । नातेजस्केन वचनमेतन्मर्षयेत् । स्वस्यातेजस्कपठनरूपाशुद्धिनिवारणाय स्वविवक्षुतनुं पठनात्पूर्वं विवक्षाक्षण एव विलक्षणशुद्धिमतीं करोति ॥ परा भक्तिर्जाता मानसे । मोक्षः सिद्धः । स चैतज्जन्मावसान एव सिद्ध्येदवताररहस्यस्य ज्ञातत्वात् । अस्य स्तोत्रस्य विलक्षणं फलं विलक्षणकायशुद्धिजनकत्वम् । अजायमाने पुरुषे जाते तत्तनौ यादृशी विलक्षणा शुद्धिस्तादृशी देहशुद्धिर्भवति तद्विषयस्तोत्रविवक्षोः । तत्क्रतुन्यायः प्रेत्य फलं ददाति । इदमवतारस्तोत्रमिहैव भावितसादृश्यं ददाति ॥

दिशासु दशसु ख्यातिः शुभा जृम्भते । एकस्यावतारस्यैकस्यां दिशि यशःप्रथनेऽपि सङ्कीर्तयिषितदशावतारैर्दशस्वपि दिशासु यशः पूर्येत । वदान्यस्य बलेर्यशो दशासु दिक्षु प्रख्यापितम् । 'उदाराः सर्व एवैते' इति कीर्तितस्योदारस्य यशो दशस्वपि दिक्षु तन्यते । एतद्रूपशुभख्यातितननमपि प्रथमप्रार्थितशुभान्तर्गतमिव । 'यादृशी भावना यस्य सिद्धिर्भवति तादृशी' 'यशोऽहं भवामि ब्राह्मणानाम्' इत्यवताररूपशुभे आतते तद्विवक्षोर्ब्रह्ममात्रो-

पलक्षितब्राह्मणस्य यशस्तन्येत । शुभरूपावतारविस्तारणं यशोविस्तारणे पर्यवस्यति । यशोव्याप्तदिक्संख्या आततावतारसंख्यासमाना ॥

जृम्भते । वर्धतेऽभिवर्धते च । देवो जृम्भत इत्युपक्रमोपसंहारावेकीकृत्य लभ्यते । वर्धतेऽभिवर्धते च देवः । तज्जृम्भणे रसो जृम्भेत ॥

जृम्भतामिदमाचार्यस्तोत्रम् । तद्रसश्च वर्धतामभिवर्धताम् ॥

आचार्यरसविज्ञानं गोपालस्य कथं भवेत् ।
अवतीर्णः साहसेऽस्मिन्बालोऽयं वीक्ष्यतां शुभम् ॥

इत्थं गोपालदासेन वात्स्यवेङ्कटसूनुना ।
रचितं निगमान्तार्यस्तोत्रव्याख्यानमादरात् ॥

शुद्धिपत्रिका ॥

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
३	७	अव्य	आव्य
४	२	स्थायीभावस्य	स्थायिभावस्य
१४	१०	हनित्वा	हंनित्वा
२०	८	बृहत्त्वोपादनाय	बृहत्त्वोपपादनाय
२७	९	मोक्षेण समयातितत्वं	मोक्षणसमयातीतत्वं
२९	९	स्त्रीचित्तानां स्त्रीमयानां विटानां	स्त्रीचित्तैः स्त्रीमयैर्विटैः
,,	११	ब्रह्मचित्तानां ब्रह्ममयानां ब्रह्मविदां	ब्रह्मचित्तैर्ब्रह्ममयैर्ब्रह्मविद्भिः
३४	१८	ब्रह्मापराक्षण	ब्रह्मापरोक्षेण
३६	१८	अव्यस्य	आव्यस्य
४१	१०	भावुकैरप्यक्षवदाचर्यते	भावुकैरप्यक्षवान् क्रियते
,,	११	भगवद्बुद्धयेत्यपि	भगवान्स्वबुध्येत्यपि
,,	१५	यदेकत्तोत्पन्नमन्यान्द्रष्टून्	यदेकत्रोत्पन्नोऽन्यान्द्रष्टून्
४६	१	मत्स्याक्षीणामेव	मत्स्याक्षणामेव
,,	१०	मार्गते	मृगयते
,,	११	तानुज्जीवयितुं च।	तानुज्जीवयितुम्।

४९	३	नष्टद्रव्यरूपोच्चैः श्रवसैरावत-	नष्टद्रव्यरूपोच्चैःश्रवैरावत
५०	५	स्वनिश्वसितैर्वेदनिश्वारणम्।	स्वनिःश्वसितैर्वेदनिःसारणम्।
,,	१७	वेदमन्त्रभूतः	वेदमन्त्रपूतः
५१	२	निश्वसितसंस्कृतमयः	निःश्वसितसंस्कृतपयः
५४	१९	सागरान्तं	सागरान्तः
५६	३	घोणाया	घोणया
५८	१४	खुरदग्रप्रमाणे	खुरदग्रे
,,	१७	स्फुटधुतसटाभ्राम्यद्ब्रह्मा	स्फुटधुतसटाभ्राम्यद्ब्रह्म-
५९	५	सदावधूता	सटावधूता
,,	८	स्वं	खं
,,	१९	विष्णोर्व्यासिरूपब्रह्म	विष्णोर्व्यासिरूपबृह
६०	९	यियासन्तं	यियासुं
,,	१९	प्रतियास्यामि	प्रत्यायास्यामि
६९	१०	तन्नालीकसृष्टब्रह्मसृष्टं	स्वनालीकसृष्टब्रह्मसृष्टं
८२	१३	चोद्यतो	चोद्धतो
९२	४	ब्रह्मत्वप्रदर्शिका	ब्रह्मत्वप्रदर्शका
,,	६	विश्वगोपत्वं	विश्वगोप्तृत्वं
९३	२	तन्मूर्धरत्नीनकर-	तन्मूर्धरत्ननिकर-
,,	१४	सह कर्तृत्वमुच्यते	सहकर्तृत्वमुच्यते

STOTRAS OF SRI VEDANTA DESIKA—5.

SRISTUTI

WITH A COMMENTARY

BY

A. V. GOPALACHARIAR M.A. B.L

SRIRANGAM

SRI VANI VILAS PRESS.

1929.

श्रीमद्वेदान्तदेशिकस्तोत्राणि—९

॥ श्रीस्तुतिः ॥

भागवताङ्घ्रिरेणुना

अम्बिल्. वेङ्कटगोपालदासेन विरचितया

व्याख्यया सहिता ।

श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रिता ।

१९२९



॥ श्रीः ॥

॥ श्रीस्तुतिः ॥

श्रीनिवासं परं ब्रह्म तन्नाम्नश्च गुरूत्तमान्।
वन्दे भागवतान्सर्वान्देशिकाशयलब्धये ॥

व्यङ्ग्यप्रधाना गम्भीरा निगमान्तगुरोर्गिरः।
दर्शयन्तु प्रसादेन स्वं भावं कृत्स्नमञ्जसा ॥

सुन्दरे सीतां दृष्ट्वा हनूमांस्तामद्भुतं तुष्टुवे 'इयं सा यत्कृते रामश्चतुर्भिः परितप्यते' इत्यारभ्यासर्गान्तम् । अनन्तरसर्गारम्भे चोक्तमृषिणा 'प्रशस्य च प्रशस्तव्यां

सीतां तां हरिपुङ्गवः । जगाम मनसा रामं प्रशशंस च तं प्रभुम् ॥' इति । संश्रवे मधुरया वाण्या मधुरालापा मधुरा प्रशस्ता । प्रशस्तव्यैव प्रशस्ता । प्रशस्तव्यायाः प्रशंसा न्याय्यैवेत्यानुरूप्यानुभवो महर्षेः । तद्धृदि निधायाचार्याः 'अभिष्टौति स्तुत्यामवितथमतिर्यामुनमुनिः' इति चतुःश्लोकीभाष्यारम्भे श्रियोऽभितः स्तुत्यत्वं कथयन्ति । श्रीविषया स्तुतिः स्तोतव्यविषया स्यात् । 'हिरण्यनिधिम्' इति दहराकाशब्रह्मविषये दृष्टान्तप्रयोगः श्रुत्या । हिरण्यस्थाने कल्याणशब्दः प्रयुज्यते आचार्यैः 'कल्याणानामविकलनिधिः—' इति । तेन च हिरण्यं मङ्गलमित्युभयमपि गम्येत । 'हिरण्यवर्णां हरिणीम्—' 'चन्द्रां हिरण्मयीं लक्ष्मीम्—' 'सूर्यां हिरण्मयीं लक्ष्मीम्—' इति श्रीसूक्ते । यथा हिरण्मयः पुरुषस्तथा हिरण्मयी तत्पत्नी । 'स्त्रीनाम्नी श्रीश्च विज्ञेया—' इति न्यायमनुस्मृत्यास्याः स्तवस्य स्तुतिरिति स्त्रीनामकरणम् । अस्याः स्तुतिः स्त्रीनाम्नी । कथम् सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः' इति फलश्लोके क्लीबस्तोत्रशब्दग्रहणमिति चेत्— इन्द्रस्तुतिफलश्लोकमनुस्मृत्य तच्छ्लोकरचनयेति ब्रूमः । 'स्तोत्रेण यस्त्वमेतेन त्वां स्तोष्यत्यब्धिसंभवे । स त्वया न परित्याज्यः—' इति खलु

तत्र फलप्रार्थना । प्रायेण श्रीसूक्तम्, इन्द्रकृतश्रीस्तुतिं च, पूर्वाचार्यकृतस्तुतीश्च हृदि निधायैषा स्तुतिर्गीतेति तत्र तत्र प्रदर्शयिष्यते । 'श्रियं लोके देवजुष्टामुदाराम् । तां पद्मिनी-मीं शरणं प्रपद्ये' 'अप्रमेयं हि तत्तेजो यस्य सा जनका-त्मजा' इति श्रुतिस्मृती मुख्यतोऽनुसृत्येयं स्तुतिः प्रवृत्तेव । उदाहृतश्रुतिच्छाययात्रापि 'श्रियं त्वां शरणं प्रपद्ये' इति प्रथमश्लोके । 'लोके देवजुष्टाम्—' इति श्रुतिच्छायया 'कलशजलधावध्वरे वापि यस्याः' इति भगवदनुरूपावि-र्भावः । चतुर्थश्लोकमारभ्य सप्तभिः श्लोकैर्देवजुष्टत्वम्, अन-न्तरं पञ्चभिः श्लोकैर्दिव्यरूपाभिषेकादिमहिमा; तदनन्तरं चतुर्भिः श्लोकैरार्तार्थार्थ्यैश्वर्यार्थिमोक्षार्थिरूपचतुर्विधभक्तवि-षयौदार्यम्, तदनन्तरं तत्सेवातदुत्तरकृत्यफलानि च वर्ण्य-न्ते । सुन्दरकाण्डं सीतान्वेषणदर्शनप्रशंसापरत्वाद्धारणाचरि-त्रे पश्यत्युन्नतं प्रचरतीति व्यज्यते ऋषिणा तत्काण्डाद्यश्लोक एव । तथा मानातीतमस्याः स्तुतेः सौन्दर्यम् । मानातीत-प्रथितविभवा स्तुतिः ॥

मानातीतप्रथितविभवां मङ्गलं मङ्गलानां
वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या ।

प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां
श्रेयोमूर्तिं श्रियमशरणस्त्वां शरण्यां प्रपद्ये ॥

मानातीतप्रथितविभवाम् । (१) 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इति सौहार्देन रावणं प्रति मारीचस्य रहस्योपदेश आचार्यबुद्धौ परिवर्तते । जानकीकान्तत्वहेतुना रामस्याप्रमेयत्वोक्तेस्तस्या अप्रमेयत्वं कैमुत्यसिद्धम् । तस्या अप्रमेयत्वस्याभिधानवृत्त्या साक्षात्कथनमप्यशक्यम् ; तस्य कैमुत्यविधया न्यायगम्यत्वमेवेत्युपदेष्टुर्भावः । मारीचोक्ताप्रमेयत्वेनैवास्याः स्तुतेरुपक्रमः । भूयान्व्यामोह आचार्याणां मारीचकर्तृकसीतारामप्रशंसायाम् । 'धर्मो विग्रहवान्—' इति तदुक्तिग्रहणं रामविषयश्लोके दशावतारस्तोत्रे । (२) 'प्रकृतैतावत्त्वं हि प्रतिषेधति' इति ब्रह्मविषये यदुक्तं शारीरके तत्प्रथममेवोच्यते श्रीविषये मानातीतेति । यदुक्तं तदनन्तरम् 'ततो ब्रवीति च भूयः' इति तदुच्यते 'प्रथितविभवाम्' इत्यनुपदोक्त्या 'मङ्गलं मङ्गलानाम्' इत्यादि भूयोगुणजातस्योक्त्या च । अस्या विभवस्येयत्तापरिच्छेदो नास्ति । मानातीतोऽस्या विभवः, प्रथितश्च । (३) मातृमेयास्तद्गर्भोत्पन्नाः सर्वाः प्रजाः । मातृमहिमा तु प्रजाभिरपरिच्छेद्यः । (४) मानातीतेति सा-

मान्योक्तेस्तद्वल्लभस्यानन्तस्यापि तद्विभवेयत्तापरिच्छित्त्यसामर्थ्यं द्योत्यते । 'यस्यास्ते महिमानमात्मन इव त्वद्वल्लभोऽपि प्रभुर्नालं मातुमियत्तया निरवधिः—' इति चतुःश्लोक्युक्तमत्र भाव्यम् । तत्र महिमशब्दः पठितः । तत्स्थानेऽत्र विभवशब्दः । स्वेनापि स्वमहिमापरिच्छेद उच्यते 'देवि त्वन्महिमावधिर्न हरिणा नापि त्वया ज्ञायते' इति । (५) 'मानाधीना मेयसिद्धिः' इति न्यायेन मानापरिच्छेद्यस्याप्रसिद्ध्यापत्तावुच्यते 'प्रथितविभवाम्' इति । प्रसिद्धोऽस्या विभवो यद्यप्यपरिच्छेद्यः । को वा मातरं तदुपकृतीश्च न जानीयात् । माता सर्वासां प्रजानां प्रसिद्धा स्यात् । यद्यपि तन्महिमापरिच्छेद्यः, सा प्रसिद्धैव स्वप्रजानाम् । (६) 'अचिन्त्यानन्तविभवा' इति लक्ष्मीसहस्रनामस्तोत्रप्रथमश्लोके । तद्यानेनानुगतं भवति ॥

मङ्गलं मङ्गलानाम् । (१) प्रसिद्धमहिमेत्युक्तम् । प्रसिद्धा गुणाः संगृह्यन्ते । मङ्गलैकान्ता माता प्रजानाम् । 'चकार माता रामस्य मङ्गलानि मनस्विनी ।' गुरुतरमपि तमायासं क्षणमात्रेणापनीयोपस्पृश्य जलं शुचीभूय मङ्गलानि प्रायुङ्क्त माता । (२) 'मङ्गलं मङ्गलानाम्' इति कान्तस्य वर्णनं तपोधनेन भीष्मेण कृष्णसंनिधौ । एनां विना तस्य

दण्डधरस्येश्वरस्य मङ्गलत्वमेव नैकान्तेन सिध्येत् । किमुत मङ्गलमङ्गलत्वम् । (३) मातृवल्लभत्वेन तस्य मङ्गलानां मङ्गलत्वेन निर्धारणमित्युपपादयिष्यन्भर्तृविषयोक्तमेव पत्नी-विषयेऽपि प्रयुङ्क्ते । (४) सर्वमङ्गलेयम् । सर्वशब्दो मङ्गला-न्यपि गृह्णाति । तथा च मङ्गलानामपि मङ्गलत्वं लभ्यते । (५) 'सर्वमङ्गलमाङ्गल्यायै नमः' इति लक्ष्मीसहस्रनामाव-स्यामुपान्त्यनाम । (६) 'शुभां निमित्तानि शुभानि भेजिरे' इति प्राणपरित्यागोद्युक्तसीताविषये । शुभानि तामाश्रित्य शुभीभूयं यान्ति । (७) सर्वेऽपि महिमवन्तो माङ्गलिकाश्च तन्नामपूर्वकत्वेनैव व्यपदिश्यन्ते । इतरथा तेषां निःश्रीकत्वं स्यात् । 'श्रीरित्येव च नाम ते ।' इतरेषु श्रीर्विशेषणम् । इयं श्रीरेव धर्मी । स्वपरनिर्वाहिकेयं श्रीः । इतरेषु गौणी श्रीः इयं तु मुख्या श्रीः । (८) 'श्रीविष्णुस्मृत्यादिषु माङ्गल्यविभूतिभेदा-नामियं विशेषतो देवता' इति गद्यभाष्ये । (९) 'तव स्पर्शा-दीशं स्पृशति कमले मङ्गलपदं तवेदं नोपाधेरुपनिपतितं श्रीरसि यतः । प्रसूनं पुष्यन्तीमपि परिमलर्धिं जिगदिषुर्न चैवन्त्वा-देवं स्वदत इति कश्चित्कथयते ॥' इत्यद्भुतो भावानुभवोऽत्र भाव्यः ॥

वक्षःपीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या । (१)

सर्वशक्तः पक्षपातानभिज्ञः फलवितरणदक्षः 'फलमत उपपत्तेः' इति सर्वफलमूलभूतः संसारतन्त्रवाहित्वात्प्राण्यपराधेषु तीक्ष्णदण्डः स्यात्। ततश्चापराधिनां प्रजानाममङ्गलपरम्परानुपरतिरेव। 'न कश्चिन्नापराध्यति' इति सर्वेऽपराधिन एव। तत्कथमियं मङ्गलानां मङ्गलं भवितुं प्रभवेत्? तत्रोच्यते— वक्षःपीठीं स्वकान्त्या भूषयन्तीमिति। श्रियाध्युषितवक्षसो भगवत आशया दयाशिशिरिता भवेयुः। तस्याः कान्तिः कारुण्यप्रभा। कारुण्यकान्तिप्रवाहैरार्द्रीक्रियते भगवद्धृदयम्। करुणारूपिण्या अस्याः कारुण्यं प्रभा। भगवद्धृदयं कृपारूषितं भूषितं भवत्यस्याः कान्त्या। मधुविजयिनो वक्षःपीठीं स्वकान्त्या भूषयन्ती मङ्गलानां मङ्गलं भवतीत्यर्थः। (२) 'अन्तःपुरं जलधिराजकुमारिकायाः—' इति वरदराजवक्षःस्थलवर्णनं श्रीमद्दीक्षितैः। अन्तःपुरस्य स्त्रीमयत्वमुचितमिति पीठीशब्दप्रयोग इत्यवधेयम्। (३) नित्येयं पीठी। अग्रे भर्तुः सरसिजमये भद्रपीठे निषदनं कादाचित्कम्। रामेण सह रत्नमये पीठे निवेशनं च कादाचित्कम्। अभिषेकमङ्गलार्थं तदुभयम्। नित्यवासपीठ्या अत्र निर्देशः। (४) अत्र स्वकान्त्यम्भःपूरैर्नित्यमभिषिच्यते। मङ्गलानां मङ्गलस्येयं पीठी। (५) पीठिशब्देनेयं नित्यं भर्तु-

वक्षस्यासीना सदा जागरूका प्रजानामार्तध्वनिश्रवणाय सज्जेति व्यज्यते । यद्यपि भर्ता निद्रालुः स्वपेदियं सततमासीनैव । (६) 'मधुविजयिनः—' इति 'अक्षय्यं मधुहन्तारं जानामि त्वां सुरोत्तमम्' इति देवोत्तमत्वमुक्तं भवति । तथा चेयं देवदेवदिव्यमहिषीत्युक्तं भवति । 'कान्तस्ते पुरुषोत्तमः' इति स्तोत्रारम्भेण चैकार्थ्यं भवति ।(७) 'तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् । बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥' यद्यपि विगतदेहाभिमाना जनकसुता विदेहदेशोद्भवा वैदेही भर्तृपरिष्वङ्गाय सा देहं बहु मेने । 'यं च दृष्ट्वा परिष्वजेत्' इति शूर्पणखयेदमनूदितमिव । प्रबलशत्रुभूतमधुविजये भर्तृवक्षो गाढं परिरभ्य स्वपरिष्वङ्गेन तद्भूषयति, प्रहर्षयति च । मधुविजयिन इति प्रणष्टत्रयीमुद्धृत्य वेदसंप्रदायं प्रवर्तयतो भगवतो हृदयदेशस्य 'यज्ञविद्या महाविद्या गुह्यविद्यात्मविद्या' 'त्रयी दण्डनीतिस्त्वमेव च' इत्यादिप्रमाणैर्विद्यात्वेन त्रयीत्वेन रूपितयानयाधिष्ठानं सांप्रतमिति व्यज्यते । (८) त्रिभुवनकमनस्य लावण्यजलधेर्भगवतो निरतिशयसुन्दरमपि वक्षःस्थलमस्याः कान्तिमपेक्ष्यानुरूपपीठ्येव भवतीति व्यज्यते पीठीरूपकेण, तस्या भूषितत्ववर्णनेन च ॥

प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां श्रेयोमूर्तिं श्रियम् । (१) लक्ष्मीसहस्रनामस्तोत्रे प्रथमनाम श्रीरिति । अन्त्यनाम दृष्टादृष्टफलप्रदेति । उपान्त्यनाम सर्वमङ्गलमाङ्गल्येति । दृष्टादृष्टफलप्रदेत्यस्य विवरणं प्रत्यक्षानुश्रविकेत्यादि । प्रथमनाम्न उपान्त्यान्त्यनाम्नोश्चास्मिञ्छ्लोके ग्रहणेन लक्ष्मीसहस्रनामाद्यन्तग्रहणमप्याद्यश्लोकेन भवति । (२) श्रियो गुणः श्रेयः । (३) प्रत्यक्षं दैवतं पितरौ । 'यतो मूलं नरः पश्येत्प्रादुर्भावमथात्मनः । कथं तस्मिन्न वर्तेत प्रत्यक्षे सति दैवते ॥' इति पितृभक्तो रामः । पूजितौ मातापितरौ प्रत्यक्षदेवते दृष्टादृष्टसर्वफलं दत्तः । (४) श्रेयःसाधनो धर्मः । भगवतो धर्मत्वं प्रदर्श्यते 'रामो विग्रहवान्धर्मः' 'कृष्णं धर्मं सनातनम्' इति च । अस्तु नाम धर्मत्वम् । तच्च श्रेयःसाधनत्वम् । इयं तु श्रेयोमूर्तिर्न केवलं श्रेयःसाधनम् । अस्याः प्रसादमपेक्षते देवः श्रेयोदाने । प्रत्यक्षमहिमैहिकश्रीः । आनुश्रविकमहिमा स्वर्गश्रीर्मोक्षश्रीश्च । सर्वापि श्रीः सैव । नास्याः साधनान्वेषणप्रयुक्तविलम्बः । 'श्रियम्' इत्युक्त्यैव श्रेयोमूर्तित्वं निरूपितं भवति । सर्वेषां महिम्नां श्रीत्वात् । 'श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते संसृत्यक्षरवैष्णवाध्वसु

नृणां संभाव्यते कर्हिचित्', इति श्रीमद्यामुनमुनिभिर्व्यतिरेक-मुखेन यदुक्तं तस्यैवात्रान्वयमुखेनोक्तिः । व्यतिरेकोक्तिल-भ्याधिकदार्ढ्यमन्वयेऽपि श्रेयोमूर्तित्वरूपणेन लभ्यते । यदी-यमेव श्रेय एनां विना कथं कस्य वा श्रेयःसिद्धिसंभावना । भगवानेव शारीरकमितं फलमित्युच्यते 'फलमपि च शारी-रकमितः' इति । (५) 'दृष्टवदानुश्रविकः सह्यविशुद्धिक्षया-तिशययुक्तः' इति साङ्ख्यकारिकोक्तानुश्रविकशब्दस्यात्र ग्र-हणं साङ्ख्यमतव्यतिरेकप्रदर्शनाय । आनुश्रविकस्य महिमत्वे-नोक्तिस्तस्य साङ्ख्याभिमतमशुद्धत्वं वारयति । 'अशुद्धमिति चेन्न शब्दात्' इति सूत्रम । अनुश्रव एवानुश्रविकस्याशुद्धत्वं वारयतीति सूत्राभिप्रायः । (६) प्रार्थनाक्षण एवेयं प्रार्थित-श्रेयो भवतीति भावः श्रेयोमूर्तित्वकथनस्य । (७) श्रियमिति काङ्क्षितसर्वविधव्युत्पत्तिपौष्कल्यवन्नाम्नो ग्रहणम् । तेन ना-म्नैव मानातीतविभवत्वम्, तस्य प्रथितत्वम्; तस्याश्च मङ्ग-लमङ्गलत्वं चोपपाद्यन्ते । श्रीमतां सर्वेषां तत्पूर्वकत्वेनैवाबा-लगोपालं व्यपदेशः। तत्पूर्वकत्वं विना निःश्रीकत्वमापद्येत ! 'तद्विपरीतः श्रेयान्' इत्युदाहृतसाङ्ख्यकारिकोक्ताद्वैजात्यम् ।

अशरणस्त्वां शरण्यां प्रपद्ये । सर्वलोकशरण्योऽपि वत्प्रपदनानन्तरमेव शरण्यो भवति । अशरण इत्यनन्यश-

रणत्वम् । अन्यशब्देन सर्वभूतानां शरण्यस्यापि व्यावृत्तिः । तदुपसदनत्रासशमनीयम् । तस्याभिगम्यत्वमाधिक्येयम् । श्रीत्वादेव त्वां शरणं प्रपद्ये । लक्ष्मीसहस्रनामध्यानश्लोकेषु द्वितीयान्तपदान्येव दृश्यन्ते । 'त्वां शरण्यां प्रपद्ये' इति पदान्यध्याहृत्य तेषामन्वयः कार्य इत्याचार्याः प्रदर्शयन्तीव । नामावलीघटकप्रथमान्तपदानां 'भूयो भूयो दिशतु महतां मङ्गलानां प्रबन्धान्' इत्यध्याहृत्यान्वयोऽभिप्रेतः 'कल्याणानामविकलनिधिः' इति प्रथमान्तपठनेन ॥

आविर्भावः कलशजलधावध्वरे वापि यस्याः
स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा ।
भूमा यस्याः भुवनमखिलं देवि दिव्यं पदं वा
स्तोकप्रज्ञैरनवधिगुणा स्तूयसे सा कथं त्वम् ॥

मानातीतप्रथितविभवेत्युक्तम् । विभवा विभूतयश्च प्रस्तूयन्ते । 'अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा' इति सीताविषयवचनमुदाहृतं श्रीविषये । श्रीरेव सीतात्वेनाविर्भूता, यथा सैव कलशजलधिकन्या बभूवेत्युच्यते । 'मातर्लक्ष्मि यथैव मैथिलजनस्तेनाध्वना ते वयम् ।' इत्यादिकं भाव्यम् । श्रेयोमूर्तिमित्युक्तम् । जायमानत्वं विना कथं श्रेयस्त्वं

भवेत्। 'स उ श्रेयान्भवति जायमानः' इति खलु श्रुतिः। श्रेयस्त्वोपपादनार्थं बहुधा जायमानत्वं प्रदर्श्यते। प्रथमं समुद्रकन्यात्वमनन्तरं भूकन्यात्वं प्रदर्श्यते। यथा भगवति भक्त्युत्पत्त्यर्थं तद्विभूतयः प्रदर्श्यन्ते मध्यमषट्के भगवता, तथात्रास्या भूमा प्रदर्श्यते॥

आविर्भावः कलशजलधौ। (१) प्रपद्य इत्युक्तं पूर्वश्लोकान्ते। दुग्धोदधिशयं देवं देवा ऋषयश्च मुहुः प्रपद्यन्ते। तेषां प्रपदनसौकर्यायैषा तत्र भर्त्रा सह सततमास्ते। (२) अस्या अनन्ताः प्रजाः। कामधेनुरपि नालमस्या असङ्ख्यानां प्रजानां क्षीरं दातुम्। दोहरूपविलम्बोऽप्यक्षमोऽस्या मातुः। प्रजा आयास्यन्ति, ताभ्यः क्षीरं देयमिति मनोरथं कृत्वा तदर्थं प्रभूतं क्षीरं धत्त इव जलधिरूपेण॥

अध्वरे वापि यस्याः। (१) 'यदर्थमम्भोधिरमन्थ्यबन्धि च' अत्राप्युभयाविर्भावसहपाठ इत्यवधेयम्। देवानां प्रपदनार्थं क्षीराब्धावाविर्भूता। राक्षसीनां प्रपदनार्थमध्वर आविर्भूता। 'पापीयसोऽपि शरणागतिशब्दभाजः—' इत्यादिकं नात्यन्तं श्लक्ष्णं स्याद्भगवद्विषये। इयं तु शरणमित्युक्तिक्षणे रक्षति राक्षसीरार्द्रापराधाः। अतः प्रथममस्याः

प्रपदनमेव वरम् । (२) दशरथाध्वरे आविर्भूतं रामवि-ग्रहोपादानभूतं पायसम् । पायसप्राशनेन कौसल्या गर्भं बभार । इयं सीता 'कर्मणैव हि संसिद्धिमास्थिता जनका-दय:' इति कर्मयोगनिष्ठेषु श्रेष्ठत्वेन भगवता व्यपदिष्टस्य जनकस्याध्वरे आविर्भूता । मङ्गलं मङ्गलानामित्युक्तं पूर्व-श्लोके । 'पवित्राणां पवित्रम्—' इत्यत्र निरूप्यते । 'उत्प-त्तिपरिपूतायाः किमस्याः पावनान्तरैः । तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥' इत्युत्तररामचरिते । देवयजनसं-भवाया आजानशुद्धाया अस्याः पवित्रान्तरैर्न शोध्यत्वम् । पवित्राणां तीर्थादीनामनया शोधनं न्याय्यम् । सीताया अन्यतस्तीर्थोदकं वह्निश्च शोधनं नार्हतः । तस्या एव शुद्धिमर्हतस्ते इति तच्छ्लोकभावः । तथा च 'पवित्राणां पवित्रम्— इत्युपपादितं भवति । पवित्राणां तीर्थानामतः शुद्ध्यर्हत्वम् ॥

स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा । कल-शजलधावाविर्भूता 'पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः ।' तदुच्यते विष्णुवक्षःस्थलं यस्याः स्थानमिति । विष्णुवक्षःस्थलं तस्या उचितं स्थानम् । तत्रावस्थाने भर्त्रा नित्ययोगः सिध्येत्; तद्धृदयनियमनं च सिध्येत् । सरसिजवनेऽवस्थाने कथं तदा भ-

त्संयोगः सिध्येदिति चेत्—‘ तुलसीकाननं यत्र यत्र पद्मवनानि चेति भगवतो विशेषसंनिधिस्थाने पद्मवने तद्विग्रह इवासौ विशेषेण संनिधत्ते ’ इति गद्यभाष्यप्रदर्शितरीत्या सरसिजवने भगवानपि संनिधत्ते । पद्मवनालयां श्रियमिति गद्यरीतिरप्यत्रानुस्रियते । सुप्रसिद्धमङ्गलभूतपद्मवनोदाहरणं मङ्गलमङ्गलत्वोपपादकम् । जलधिराजकुमारेकान्तःपुरत्वेन श्रीमद्दीक्षितानां वर्णनं पूर्वमेवोदाहृतम् । वरदराजवक्षःस्थलवर्णने निपुणा दीक्षितवंश्याः । वक्षःस्थलाचार्य इत्येव राजदत्तं विरुदं तत्पितामहस्य । स्थलशब्देन विष्णुवक्षसः श्रीदेवतालयत्वमभिव्यज्यत इव । स्थलरूपं देवतास्थानम् ॥

भूमा यस्या भुवनमखिलं देवि दिव्यं पदं वा । मानातीतविभवस्य विवरणम् । उभयविभूतिशेषित्वमुक्तं भवति । विभूत्यध्यायेषु प्राकृतविभूतय एव वर्णिताः । ‘ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ’ इत्येकपाद्विभूतिरेवोक्ता । पुंसूक्ते ‘ त्रिपादस्यामृतं दिवि ’ इति त्रिपाद्विभूतिरप्युक्ता । श्रुत्युक्तोभयमप्यत्र कीर्त्यते । भुवनमखिलमिति श्रीभाष्यमङ्गलश्लोकप्रत्यभिज्ञापनम् । देवीत्युभयविभूत्योर्मध्ये संबुद्धेर्निवेशनम् । देवीति पूर्वविभूतेर्लीलाप्रयुक्तत्वं द्योत्यते क्रीडार्थकत्वमाश्रित्य । दिव्यार्थाश्रयणेन

दिव्यविभूतिमत्त्वस्यौचित्यमपि प्रदर्श्यते 'देवि साम्प्रतमिदं यद्दिव्यं पदं तव भूमेति ॥

स्तोकप्रज्ञैः । दिव्यं पदं देव्या विभूतिरित्युक्तं पूर्व-पादान्ते । 'तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम्—' इति श्रुतिस्तेन प्रत्यभिज्ञाप्यते स्तोतृप्रस्तावात् । असंकुचितज्ञानाः सूरयः खलु देवस्य देव्याश्च विविधं स्तोतारो विपन्यवो वन्दिनः । सा त्वं स्तोकप्रज्ञैरस्माभिः कथं स्तूयेथाः । निरवधिः सर्वज्ञः सर्व-वित्त्वद्वल्लभोऽपि त्वां स्तोतुं न शक्नुयात् ॥

अनवधिगुणा स्तूयसे सा कथं त्वम् । गुणिनिष्ठगु-णाभिधानं स्तुतिः । सम्यक्स्वगुणाभिवर्णनं स्तोत्रम् । स्तुतेरसाध्यत्वोपपादनार्थमनवधित्वविशेषणं गुणेषु ॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
तामेव त्वामनितरगतिः स्तोतुमाशंसमानः ।
सिद्धारम्भः सकलभुवनश्लाघनीयो भवेयं
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥

स्तुतिशक्त्यभावः, स्तुत्यसाध्यता च जगदे । कथं स्तो-त्रारम्भस्तत्सिद्धिर्वेति चेदुच्यते— स्तोतृत्वप्रतिष्ठामहं देही

लिप्से । मुक्त्यनन्तरमशरीरो वाप्राकृतशरीरो वा त्वां स्तुवीय । स्यादेव तदा तद्भाग्यं पूर्वोदाहृतश्रुत्या । एतद्देहस्थ एव तव स्तोता भूयासमित्याशासे । एतद्व्यज्यत इव देहिभिरिति । चतुःश्लोक्यां श्लोकद्वयेन स्तुतेरशक्यता वर्ण्यते । आद्यश्लोकद्वयस्य प्रकृष्टस्तुतित्वं समर्थ्यते आचार्यैः 'एवं स्तोत्राक्षेपसमाधानव्याजेन प्रवृत्तमपि श्लोकद्वयमिदं प्रकृष्टस्तुतिरूपमेव' इति तद्भाष्ये । अत्रापि श्लोकद्वयं स्तुत्याक्षेपसमाधानपरम् । तद्विषयकश्लोकद्वित्वमुभयत्र समानम् ॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना । यो मातरं स्तौति स लोकेन स्तूयते सत्पुत्र इति । त्वां मातरं स्तुवन्सर्वेषामपि जननीं स्तौति । स्वस्वजननीस्तोतारं जना बहुमन्येरन् । स्तुत्यत्वेन त्वामनुसंदधानः स्तुत्यत्वविशिष्टो भवति । तत्क्रतुन्यायात् । त्वत्स्तुत्या लक्ष्मीवान् भवति । तत एव सर्वैः स्तूयते । लक्ष्मीवन्तं सर्वो लोकः श्लाघते । 'नरं श्रिया जुष्टमिवोपजीविनः' इति ऋषिः । 'सर्वे जनाः काञ्चनमाश्रयन्ते' । 'स श्लाघ्यः स गुणी धन्यः ॥' 'यं स्तुवन् स्तव्यतामेति' इतिवदनुभवः ॥

तामेव त्वाहुः । 'योऽसि सोऽसि' इति श्रुतिः । त्वमेव त्वम् । तत्पदार्थस्त्वम् । तदेव त्वम् । 'ईश्वरीं

सर्वभूतानाम् ’। न त्वं त्वंपदार्थः ॥

अनितरगतिः । मातरं विना का गतिः प्रजायाः ॥

स्तोतुमाशंसमानः सिद्धारम्भः । स्तुता चेत्स्तोतव्यत्वं स्तोत्रा लभ्येत । स्तुतिः कथं साध्येतेति चेत्— स्तोत्रेच्छामात्रात्तत्साधयसि श्रेयोमूर्तिस्त्वम् । आशंसामात्रात्स्तोत्रं सिध्यति त्वदनुग्रहेण । ‘ त्वमेव श्रीसेह्यं वह्नुगुणयवाणीविलसितम् ’ इति स्तोत्रारम्भे भट्टार्याः ॥

श्लाघनीयो भवेयम् । त्वत्स्तोत्रसिद्धेः स्तुत्यः स्याम् । इन्द्रस्तुतौ स्तोतव्यत्वलाभः फलत्वेन कथ्यते ॥

सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् । त्वत्स्तुतिरूपसेवापेक्षामात्रमलं श्रेयोलाभाय । मम त्वत्स्तुतिरूपसेवापेक्षास्ति । तावता च स्तुतिनिर्वृत्तिलभ्यश्लाघनीयत्वश्रेयो लभ्येत ॥

यत्सङ्कल्पाद्भवति कमले यत्र देह्निन्यमीषां
जन्मस्थेमप्रलयरचना जङ्गमाजङ्गमानाम् ।
तत्कल्याणं किमपि यमिनामेकलक्ष्यं समाधौ
पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् ॥

सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यादित्युक्तम् । त्वत्पतिविषयेऽपीदं सममिति प्रदर्श्यते पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कमिति । मङ्गलं मङ्गलानामित्युक्तम् । तत्कल्याणं तेजस्त्वत्पादलाक्षारसशुभाङ्कवत्स्फुरतीत्युच्यते । यत्कारणं तदेव पूर्णम् । कारणं व्यापकम् । कार्यं व्याप्यमपूर्णम् । परमकारणमेव फलप्रदानसमर्थम् । तदेव योगिध्येयम् । भर्तुः कारणत्वप्रदर्शनमस्याः प्रशस्तिरेव । अस्याः पतित्वेनैव भर्तुः कारणत्वे विशेषज्ञप्तिः । अवगतेन प्रसिद्धेनानवगतस्य लक्षणं युक्तम् । हेतुत्वलक्ष्यः पुंसूक्तादिप्रसिद्धः कश्चित्पुरुषः । तस्य विशेषो न ज्ञायते । विशेषपरिज्ञानं च 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति तत्पत्नीकीर्तनेन भवति । 'पुंसूक्तं सर्ववेदप्रपठनमहितं यत्परत्वैकतानं तस्यैव श्रीपतित्वं विशदमभिदधे ह्युत्तरत्रानुवाके' 'वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिन्हैस्तरन्ति' 'नानागमोद्यद्विशयशमनतः श्रीमति ब्रह्मतोक्तेः' इत्यादिकमत्र भाव्यम् । कारणमुद्दिश्य तस्य श्रियः पतित्वं विधीयत इति वा, श्रियः पतिमुद्दिश्य तस्य कारणत्वान्वयो विधीयत इति वा । उभयथापि कारणत्वस्य ब्रह्मलक्षणत्वसिद्धिः । विश्वकारणत्वेन ईश्वरलक्षणम् । अस्याः पतित्वेन तस्य विशेषज्ञप्तिः । कमले इति समस्तमङ्गलावाप्तिसाधनरूपमाङ्गल्यद्योतनम् । अस्या-

श्चरणसेवित्वाद्भर्तुरभिगम्यत्वसिद्धिः ॥

सत्सङ्कल्पात् । नामरूपव्याकरणसङ्कल्पः । तेन च निमित्तत्वम् । तच्च केवलविशेष्यनिष्ठम् ॥

यत्र देहिनि भवति । यस्मिञ्छरीरविशिष्टे शरीरिणि भवति चराचररचना । उपादानत्वमुच्यते । उभयविधकारणत्वं विना न पूर्णत्वं ब्रह्मणः । 'सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम्—' इति शरीरद्वारकं परिणामित्वम् । 'अस्यैवाचिन्त्यशक्तेरखिलजनयितुः स्यादुपादानभावः सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकया स्थूलवृत्त्या । निष्कृष्टेऽस्मिञ्छरीरिण्यखिलगुणगणालंकृतानन्दरूपे संपद्यन्ते समस्ताः समुचितगतयो निर्विकारत्ववादाः' इत्याचार्यश्लोकोऽत्र भाव्यः । समन्वयाध्यायारम्भदृष्टं जन्माद्यधिकरणम्, तदन्तदृष्टं प्रकृत्यधिकरणमित्युभयमपि संगृहीतं भवति । तथा च समन्वयाध्यायस्येमौ दम्पती विषयः इति लभ्यते । इतरे रचयितारश्चतुर्मुखाद्याः स्वसङ्कल्पेन जंगमाजंगमान् स्वदेहाद्बहिः सृजेयुः । तेषां न विश्वोपादानत्वसंभवः ॥

अमीषां जङ्गमाजङ्गमानाम् । 'जन्माद्यस्य यतः' इति सूत्रस्थस्यास्येति खण्डस्य विवरणम् । इमानीति श्रुतिखण्डा

नुसार: । सूत्रस्थषष्ठीविभक्तिः, श्रुतिस्थबहुवचनं च । तथा च श्रुतिसूत्रोभयानुसार इत्यवधेयम् ॥ वेदान्ताचार्य: खलु कविः ।

जन्मस्थेमप्रलयरचना । 'रचनानुपपत्तेश्च' इति सूत्रोक्तरचनाशब्दस्य ग्रहणम् । जन्मस्थेमशब्दौ श्रीभाष्यप्रथमश्लोकस्थौ । भङ्गशब्दस्थानेऽत्र मङ्गलमङ्गलमातृसंनिधौ प्रलयशब्दप्रयोगः । यथा स्थेमरूपजीवनं मातृकरुणया, तथा सृष्टिप्रलयावपि करुणामूलौ ॥

तत्कल्याणं किमपि । 'यतो वेमानि भूतानि—' इति सामान्येनोक्तस्य 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इति निर्णयवाक्यदृष्टे आनन्दमये पर्यवसानम् । आनन्दमय: स आत्मा कल्याणशब्देन निर्दिश्यते । किमपीति तत्प्रकरणोक्तवाङ्मनसातीतत्त्वम् ॥

यमिनामेकलक्ष्यं समाधौ । एकाग्रबुद्ध्या योगिनः सर्वा वृत्तीर्निरुध्य स्वान्ते परमकारणं ध्यानेन दिदृक्षन्ते ॥

पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम् । यद्यपि यमिनो बुद्धिरेकाग्रैकमेव लक्ष्यं परमकारणमन्विष्यति, कारणस्य मिथुनत्वात्, पत्नीं विना पत्युरपूर्णत्वाच्च मिथुनमेव

समाधौ भासते । भाने च भगवद्दिव्यमङ्गलविग्रहस्य श्र्यङ्कितत्वं भासते । तेनैव कारणस्य विशेषनिर्णयः । यद्यपि 'यतो वेमानि भूतानि जायन्ते.........................तद्विजिज्ञासस्व तद्ब्रह्म—' इति पुरोवादसामान्यवचनस्य 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यानन्दरूपविशेषे पर्यवसानम्, न तावता व्यक्तिविशेषाकाङ्क्षाशान्तिर्भवति । अस्ति जिज्ञास्यशेषम् । तच्च पत्नीज्ञानेनैव पूर्णं ज्ञातं भवति । अत उच्यते यद्यपि कल्याणरूपानन्दत्वं ज्ञातम् 'तत्कल्याणम्' इति, त्वत्पादलाक्षारसाङ्कितत्वेनैव सर्वाकांक्षाशान्तिपूर्वकम्, व्यक्तिविशेषनिर्णयपूर्वकं जिज्ञास्यशेषमन्तरा पूर्णं स्फुरणं कारणतेजसः । देवताविशेषाकाङ्क्षायाः साकल्येन शान्तिरपि पूर्णशब्देन सिध्यति । कारणत्वसमव्याप्ततेजस्त्वस्याप्यत्र ग्रहणं तेजःशब्देन । 'अप्रमेयं हि तत्तेजः—' इत्यादिना मारीचोक्ततेजसोऽपि स्मरणम् । तथा च स्तोत्रारम्भोक्तमानातीतत्वरूपाप्रमेयत्वान्वयोऽपि । ज्योतिरधिकरणविषयत्वमपि प्रदर्श्यते तेजःशब्देन । तत्त्वं खल्वन्विष्यते योगसमाधिना । तत्त्वं च दम्पती । श्रीवैशिष्ट्यस्फुरणाभावे न पूर्णस्फुरणं तत्त्वस्य । तद्व्यज्यते पूर्णशब्देन । एकलक्ष्यं ह्यैकाग्र्येणान्विष्यते । कथं द्वयोः स्फुरणमिति चेत्— 'एकतत्त्वमिवोदितौ' इति स्वभावतः पतिपत्नीभावेन मणि-

प्रभान्यायेनैकीभूतयोरविभक्तत्वेनैव सिद्धेर्नैकलक्ष्यत्वहानिः । 'अस्ति वस्त्विदमित्थंत्वप्रसङ्ख्यानपराङ्मुखम् । श्रीमत्याय-तने लक्ष्मीपदलाक्षैकलाञ्छनम् ॥' इति भट्टानुभवोऽत्र भाव्यः । 'नेति नेति' इति श्रुत्येदमित्थमिति लक्षयितुमश-क्यमपि वस्तु त्वत्पदलाक्षारसाङ्करूपेणैकेन लक्षणेनैव विधि-मुखेन लक्ष्यते । 'वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिना-म्बरम्' इति स्वाश्रमे सततं योग्यनुभाव्यं रामं भावयतो योगिनो मारीचस्यानुभवो यस्य सेति । अत्र यस्या अय-मित्यनुभव इव । 'अस्या मम च शेषं हि—' इति भग-वदुक्तावस्याः प्राधान्यं तद्बुद्ध्या द्योत्यत इव । तद्बुद्धिं वय-मनुसरामः । तस्याज्ञा तद्वचनरूपस्मृतिः । तदाज्ञासेतुरस्मा-भिरनुपाल्यते । यथा राजा तथा प्रजाः । 'रसो वै सः' इति श्रूयते । पत्नीपादलाक्षारसाङ्कितो रस इति पूर्वाचार्या-णामनुभवः । तथा च रसिकसार्वभौमत्वरूपरसत्वमुपपा-द्यते । कलशजलधावाविर्भाव उक्तः । आविर्भूता भर्तुर्वक्षः-स्थलं ययौ । स्वयंवरमङ्गलविधौ लाक्षारसार्द्रपादा स्यात् । आर्द्रस्तद्रसाङ्कः स्याद्भर्तृवक्षसि । उरस्यासने तत्र पादलाक्षा-रसाङ्को नियतं भवेत् । 'आर्द्रां ज्वलन्तीम्—' इति तस्या जाज्वल्यमानं तेज आर्द्रम् । यथा भगवत्तेजः 'ज्योतिरिवा-धूमकः' इति वर्ण्यते । 'प्रवालानां दीक्षागुरुरपि च लाक्षारु-

णरुचां नियन्त्री बन्धूकद्युतिनिकरबन्धूकाविपदः' इति पण्डितराजलक्ष्मीलहरीकृत्कृतीया यद्यपि चरणरुचेर्लाक्षारसातिशायित्वमस्ति, न चरणमात्रेणाङ्कनसंभवः ॥

निष्प्रत्यूहप्रणयघटितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम् ।
शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां
संपद्यन्ते विहरणविधौ यस्य शय्याविशेषाः ॥

पादलाक्षारसाङ्कं स्फुरति भर्तृतेज इत्युक्तम् । प्रणयकलहे तत्संभवः प्रायेण । मिथः कलहायमाने ईश्वरद्वन्द्वे तदुभयनियाम्यं जगदितस्ततः कुष्टं नितान्तं क्षुभ्येत् । एकलक्ष्यमित्युक्तम् । वस्तुतो द्वित्वेऽप्येकतुल्यत्वमुपपाद्यम् । देवताद्वन्द्वमिदम् । ईश्वरत्वमस्मिन् द्वन्द्वे व्यासज्यवृत्ति । परस्परमनयोर्निष्प्रत्यूहः प्रणयः । उभयाधिष्ठानमेकं शेषित्वम् एवंजातीयका अंशाः षड्भिः श्लोकैर्निरूप्यन्ते ॥

निष्प्रत्यूहप्रणयघटितं द्वन्द्वम् । मित्रावरुणादिदेवताद्वन्द्वघटकयोर्देवयोः पुंसोरपि न मिथः कलहो दृश्यते । इदं मिथुनं परदेवताद्वन्द्वम् । स्वेतरेषु सर्वप्राणिषु सहजपरिपूर्णानुरागवन्ताविमौ । प्रेमैकस्वभावावितरविषयेऽपि । पर-

स्परं तयोः प्रणयो निरवधिर्निष्प्रत्यूहः । धर्मवीर्येण सर्वंहृ-द्यमानावमपरोक्षं पश्यन्नृषिरपि 'हृदयं त्वेव जानाति प्रीति-योगं परस्परम्' इति तत्प्रणयस्य स्वेनाज्ञाततामवधारयति । दाम्पत्यस्य प्रणयघटितत्वं वर्ण्यते मुत्तररामचरिते रामेण 'अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्विश्रामो हृद-यस्य यत्र जरसा यस्मिन्नहार्यो रसः । कालेनावरणात्यया-त्परिणतेर्यत्स्नेहसारे स्थितं भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥' इति । सुखं वा कृच्छ्रं वा भवतु । उत्त-मदम्पत्योः परस्परप्रेम स्नेहसारमेकरूपमेव स्यात् । तयोर्ज-रसा न स्नेहरसो जीर्येत । 'नास्य जरया जीर्यति ॥'

देवि । देवतामिथुनं युवाम् न युवयोः कलहसंभवः ॥

नित्यानपायम् नित्यमनादि । अनपायमनन्तम् । सादि सान्तमितरदेवताद्वन्द्वम् । देवीत्युक्तेरितरदेवताद्वन्द्वसामान्या-त्सादित्वसान्तत्वशङ्का जायेत । तद्वार्यते नित्यानपायमिति ॥ नित्यमविश्लिष्टं द्वन्द्वम् । अपायो विश्लेषः ।

विष्णुस्त्वं चेति द्वन्द्वम् । यद्यपीयं श्रीस्तुतिः, न भ-र्तारं विना श्रीमान्नं स्तोतुमुचितम् । भर्त्रविनाभावेन स्तवन एव तस्याः प्रीतिः स्यात् । भर्तृसंश्लिष्टायाः स्वस्याः स्तुति-

रेव स्त्रियेप्स्येत । 'विष्णुपत्नीम्—' 'यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम' इति चैश्वर्यवैभवादिप्रकरणपठितश्रौतस्मार्तनामग्रहणं विष्णुरिति ॥

अनवधिगुणं (द्वन्द्वम्)। यद्यपि द्वन्द्वघटकौ धर्मिणौ द्वावेव, तयोः कल्याणगुणा अनन्ताः ॥

अनवधिगुणं द्वन्द्वमन्योन्यलक्ष्यम्। यद्यप्येकैकस्यानवधिगुणानां सर्वेतरविसदृशत्वं, अनयोः परस्परसदृशत्वात्परस्परलक्ष्यत्वमस्ति । 'तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणाम्। राघवोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥' इति परस्परसादृश्यमूलपरस्परानिरूप्यत्वम्। परस्परस्य सदृशौ। अनन्यसदृशौ। अनवधिगुणत्वं प्रत्येकम्। ततश्च सर्वेतरविसदृशत्वम्, अन्योन्यलक्ष्यत्वं च। श्रियः पतिरिति त्वत्कान्तः, विष्णुकान्तेति त्वं इति युवां लक्ष्येथे ॥

शेषश्चित्तं विमलमनसां मौलयश्च श्रुतीनां संपद्यन्ते विहरणविधौ यस्य शय्याविशेषाः। द्वन्द्वमिति स्त्रीपुंसमिथुनोक्तिः। तयोश्चोत्तमशय्याः संपादनीयाः। उपचितगुरुभक्ति मन्मनः तदुत्पन्ना चेयं स्तुतिस्तन्मिथुनस्य तल्पं भूयादिति मनोरथः। यथा श्रीशठजित्कर्तृकस्तुतिः कल्पान्तयून-

स्तल्पं भवतीत्युक्तमाचार्यैः । शेषः प्रसिद्धः पर्यङ्कः । तस्य शरीरं शय्या भवति । श्रुतीनां स्त्रीणामुत्तमाङ्गानि शय्या भवन्ति । शेषः शेते । तदुपरि मिथुनं शेते । विमलमनसां हृदयं शय्या । श्रुतीनां शिरांसि शय्याः । उत्तमशय्याभूत-शेषश्रुतिमौलिभ्यां संदृष्टं विमलमनसां चित्तमपि तद्वदुत्तम-शय्या भवति । शेषः पुमान् । चित्तं नपुंसकम् । श्रुतयः स्त्रियः । धरातलाद्धृदयदेशगमनम् । तदुपरि मौलिगमनम् । कथं शेषः संपद्येत पुमान्? विमलमनोयुक्तयोगेन, मननेन च । कथं च मननादिकं संपद्येत? बहुभ्यो बहुधा श्रवणेन । एष क्रमोऽपि समासोक्त्या परिस्फोर्यते । यथा शेषोऽन्तरङ्गः शय्याविहारादिषु तथा विमलमनसां चित्तमपि । देवीति संबोधनेन विहरणशीलत्वमुक्तम् । शय्याविहाराः प्रस्तूयन्ते । संपद्यन्ते शय्यात्वेन । शय्याभवनसंपत्तिरनन्तत्वेन । 'स चा-नन्त्याय कल्पते' । आनन्त्यमनन्तभावः ॥

उद्देश्यत्वं जननि भजतोरुज्झितोपाधिगन्धं
प्रत्यग्रूपे हविषि युवयोरेकशेषित्वयोगात् ।
पद्मे पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन्मानसं नः ॥

देवताद्वन्द्व इवात्महविरुद्देश्यत्वादिकं मिथुनविषयम् । त-

योर्मध्ये जननीभूता त्वमत्यन्तसुलभा । पूर्वश्लोके विमलमनसां चित्तं शय्या संपद्यत इत्युक्तम् । चित्तस्य स्पर्श एव न संभवेन्मिथुनस्य । कथं तस्य शय्यात्वसंपत्तिः? विमलमनस्त्वं च योगिनामेव संभवेत् । कथं तव विमलमनस्त्वसंपत्तिः; तत्प्रयुक्तशय्यात्वसंपत्तिश्चेति चेदुच्यते— वयमत्यन्तमस्मदाकिंचन्यम्, अनन्यगतित्वं च बुद्ध्वा मिथुनमेव शरणीकृत्यास्मै मिथुनायास्मत्प्रत्यगात्मानं समर्पयामः । निरवधिकरुणौ दम्पती उद्देशक्षण एव समर्पितं प्रत्यग्रूपं हविर्गृहीत्वा तत्समर्पणं सततं श्लाघेते । आत्महविः संप्रदानोद्देशक्षण एव सख्यौ भूत्वोद्देश्यत्वं भजत इमौ दम्पती । निगमा नित्यमन्विष्यन्त्यनयोर्महिमानम् । तन्महिमा च नावच्छेदं भजति । इमौ तु क्षणमात्रे मदुद्देश्यत्वं भजतः । श्रुतयः परितोऽन्विष्यन्त्य एव वर्तन्ते । एतद्वीक्ष्य मम मनो हर्षविस्मयाविष्टं नृत्यति । वेदा नित्यं परितोऽन्विष्यन्तस्तदप्राप्नुवन्तो वदन्ति 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह —' इति । श्रुतीनां मनो न प्राप्नोति । अकिंचनस्य मम मनस उद्देश्यत्वमिमौ भजतः । कथमेतदाश्चर्यं मम मनो न नर्तयेत्? उद्देश्यत्वम् । 'यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट्करिष्यन्' इति शिष्यते । आत्महविः समर्पयिष्यन्तो वयं संप्रदानत्वेन युवयोर्द्वन्द्वमुद्दिशामः । त-

त्क्षण एवाविलम्बितं युवामस्मदुद्देश्यत्वं भजतः ॥

जननि । मातृत्वं हेतुरुद्देश्यत्वस्य सद्यो भजने । चिरमविधेयः पुत्रो यदि कदाचिन्मातरमुद्दिश्य नमः प्रयुञ्जीत सद्यः सा तत्प्रतिगृह्णीयात् ; न सा क्षणमपि दुर्लभा भवेत्पुत्रस्य । इतः पूर्वमसत्कल्प एवासीत्पुत्रः । इदानीमेव स सन्भवत्येतदुद्देशेन । इदानीमेवायं पुत्रो जात इव । अतो जननीति संबोधनम् । इदानीं मां प्रसूतासि । तव वन्ध्यात्वं निवृत्तम् । इतः पूर्वं ममासत्त्वान्मम माता वन्ध्याभूत् ॥

भजतोः । (१) आश्रयमाणयोः । श्रीः खलु त्वमाश्रयणस्वभावा । (२) पुत्रैरस्माभिरुद्दिष्टत्वं युवां सततं भजतः । सततं तत्कीर्तयतः । सततं श्लाघमानौ तद्भजतः । आवयोः पुत्र आवामुद्दिश्य तवास्मीति ययाचे । तव भरोऽहमित्यवादीत् । कोऽन्योऽस्ति सदृशोऽनेनेति सततं मदुद्देश्यत्वं भजत इत्यपि व्यज्यते । तत्र च जननीत्वं निमित्तम् । अस्मद्भजनभारः युवयोर्न्यस्तः । तं स्वीकृत्य युवामस्मदुद्देश्यत्वं भजन्तौ भजनभाराङ्गीकारं सत्यापयतः । (३) भजतोर्युवयोः । यदा युवां भजतः । सति षष्ठी ॥

उज्झितोपाधिगन्धम् । (१) देवतोद्देश्यकद्रव्यत्यागो यागः । बाह्यहविःसमर्पणरूपयागेषु तत्तद्देवतायाः साक्षा-

दुद्देश्यत्वम् । तत्राप्येतन्मिथुनस्याविधिनाज्ञातत्वेन तत्तद्देवतोपाधिद्वारा परम्परयोद्देश्यत्वमस्त्येव । सोपाधिकमहृदयम्, तत्रैतयोरुद्देश्यत्वम् । आन्तरप्रत्यग्रूपहविःसमर्पणे साक्षादेतयोरुद्देश्यत्वम् । नात्रोपाधिलेशोऽपि । (२) उज्झितोपाधिगन्धं युवयोरुद्देश्यत्वं भजतोः । यद्यप्यात्मानं समर्पयन्तो वयं सकैतवमनुज्झितोपाधिकं समर्पयामः, संप्रदानभूतौ युवामुज्झितोपाधिगन्धं कैतवलेशं विनात्यन्तार्जवेन निर्व्याजमस्मदुद्देश्यत्वं भजतः । (३) 'यद्यपि वयं मिथ्या आत्मानं दद्मः सत्यमेवास्माकं फलं दीयते' इति वकुलभूषणमुनयः ॥

प्रत्यग्रूपे हविषि । आन्तरात्महविषि । न पराग्रूपबाह्यहविषि ॥

युवयोरेकशेषित्वयोगात् । (१) उभयाधिष्ठानमेकं शेषित्वम् । शेषित्वं व्यासज्यवृत्ति । (२) एकशब्दस्य मुख्यार्थकत्वमपि । मुख्यं निरुपाधिकं शेषित्वं युवयोरेव । (३) पूर्वश्लोके शेष उक्तः । अत्र शेषित्वं निरूप्यते ॥

पद्मे । निधित्वं व्यज्यते । गुहायां निहितत्वमुच्यते निगमैः । 'निधिरिव क्षिप्तो गुहाभ्यन्तरे' । दुर्दर्शत्वेन, गुहाहितत्वेन; वाङ्मनसागोचरत्वेन च निगमवर्णनम् ॥

पत्युस्तव च महिमा । यद्यपि शेषित्वमेकम्, उद्देश्यत्वं चैकम्; पत्युस्तव च महिमा विभक्तः । 'गुरुत्वादौ तुल्येऽप्यपरवशताशत्रुशमनस्थिरत्वाद्यन्क्त्वा भगवति गुणान्पुंस्त्वसुलभान् । त्वयि स्त्रीत्वैकान्तान्म्रदिमपतिपारार्थ्यकरुणाक्षमादीन्वा भोक्तुं भवति युवयोरात्मनि भिदा ॥' इति श्रीभट्टार्यैः प्रदर्शितस्वभावप्राप्तव्यवस्थया विभागः ॥

नित्यमन्विष्यमाणः । नित्या निगमाः । 'सोऽन्वेष्टव्यः, स विजिज्ञासितव्यः' इति सततं वदन्ति । न क्वापि प्राप्तत्वज्ञातत्वकीर्तनं तैः ॥

नावच्छेदं भजति महिमा । (१) 'यतो वाचो निवर्तन्तेऽप्राप्य मनसा सह' 'नेति नेति' इति त एव ब्रुवन्ति; (२) युवामस्मदुद्देशमात्रेणावच्छिद्येथे । युवयोर्महिमा तु निगमैर्नित्यमन्विष्यमाणो नावच्छेदं भजति । युवां भजतः, पत्युस्तव च महिमा न भजतीति वैचित्र्यमप्यनुभाव्यम् ॥

नर्तयन्मानसं नः । निगमानामपि नित्यं दुर्लभं क्षणमात्रेण मितंपचानामस्माकं सुलभं भवतीति विस्मितं मानसमानन्दभरितं नृत्यति ॥ नर्त्यते मनः आनन्दपारवश्येन ।

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देन सार्धं
मध्येकृत्य त्रिगुणफलकं निर्मितस्थानभेदम् ।

विश्वाधीशप्रणयिनि सदा विभ्रमद्यूतवृत्तौ
ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् ॥

श्रुतिमौलयो दिव्यामिथुनस्य शय्या इत्युक्तम् । 'पत्युस्तव च निगमैर्नित्यमन्विष्यमाणो नावच्छेदं भजति महिमा' इति कथं विरुद्धमिवोच्यते? श्रुत्येकगम्यमिदं मिथुनम् । श्रुतय एवास्माकं चक्षूंषि ब्रह्मदर्शने । यदि ता अपि न पश्यन्ति तन्मिथुनं कथमस्माकं तदेकचक्षुषां मिथुनदर्शनसंभवः । अत्रोच्यते— पश्यन्तीष्विति । श्रुतयः पश्यन्त्येव । परितः पश्यन्ति च । सदा पश्यन्ति च । सदाशब्दस्तृतीयपादे गृह्यते । 'सदा पश्यन्ति सूरयः' इति श्रुतिः साक्षित्वेन वदति । स्वयं सदा दर्शनाभावे कथं सूरिभिः सदा दर्शनं तया साक्षीक्रियेत । यद्यपि सा सदा पश्यतीश्वरमिथुनं तथापि तयोर्महिमानं परिच्छेत्तुं न प्रभवति । महिमा नावच्छिद्यत इत्येतावन्मात्रमुक्तम् । अतो न विरोधगन्धः ॥

पश्यन्तीषु श्रुतिषु परितः सूरिबृन्देन सार्धम् । दीव्यन्तो द्विता एव स्युः । परित उपविश्य तद्द्रष्टारो बहवः स्युरिति लोकेऽनुभवः । स स्वभावश्चारु प्रदर्श्यते आचार्यैः । दीव्यन्तौ द्वौ । पश्यन्त्योऽनन्ताः श्रुतयः । अनन्ताश्च ता

असङ्ख्यैर्नित्यमुक्तसूरिबृन्दैः सहिताः । भगवत्प्राणनिश्वासित-भूतस्त्रीणां श्रुतीनां सूरिपुरुषेभ्योऽपि द्रष्टगोष्ठ्यां प्राधान्यं सहशब्देन व्यज्यते । सूरयः प्राणत्वेनाभिमतिविषयाः । श्रुतयो मुख्यप्राणाः; भगवन्निश्वसितत्वात् । निश्वसितद्वारेव पुरुषस्य सत्ता प्राणनं च गम्यते । निश्वसितभूतश्रुतिरेव परमपुरुषसत्तामस्मान् ज्ञापयेत् । सूरयश्च नित्याभिवाञ्छितनीचभावाः शेषिनिश्वसितभूताः श्रुतीरेवाङ्क्यासनेऽवस्थापयेयुः । 'पश्यन्तीषु', 'सदा' 'सूरी'ति पदैः 'सदा पश्यन्ति सूरयः' इति श्रुतिः प्रत्यभिज्ञाप्यते । सूरयः पश्यन्तीति वदन्ती श्रुतिरपि नियतं द्रष्ट्री स्यात् । सूरयोऽलिङ्गाः शुद्धान्तविहारदर्शनयोग्या इति दर्शयितुं नपुंसकलिङ्गबृन्दशब्दप्रयोग इत्यवधेयम् । सृष्टेः पूर्वं नित्यमुक्ताः श्रुतयश्च सिद्धा एव । ते सर्वे सृष्टिस्थितिलयादिक्रीडां पश्यन्ति ॥

मध्येकृत्यत्रिगुणफलकं निर्मितस्थानभेदम् । गुणत्रयमयी प्रकृतिश्चतुरङ्गफलकं भवति । सत्त्वरजस्तमोगुणाः शुक्लपीतकृष्णवर्णत्वेन प्रसिद्धरूपणाः । गुणविभागश्चेतनाः स्थानभेदं प्राप्नुयुः । तत्तद्गुणप्रचुरास्तत्तद्वर्णस्थानेषु निवेश्येरन् । ईश्वरमिथुनान्तरास्ति नियाम्या, आधेया प्रकृतिः । अचित्संश्लिष्टाश्रितः प्रजा मातापित्रोर्मध्ये भवेयुरुभाभ्यां लालनार्थम् ॥

विश्वाधीशप्रणयिनि । रङ्गाधीशप्रणयिनीति श्रीगुणरत्नकोशे । अस्याः स्तुतेः सामान्येन श्रीविषयत्वम् , नार्चाविशेषविषयत्वम् ; विश्वसृष्टिस्थित्यादिप्रस्तावाद्विश्वशब्दस्य तदधीशशब्दस्य च प्रयोगः । प्रेयस्यास्तव संप्रीत्यर्थं सृष्टिस्थित्यादिभिः क्रीडति प्रभुः । अनुशिखिनि शिखीव त्वत्समक्षं क्रीडति सः । तदर्थं त्वदभिमुखे स्थित्वा मध्ये च लीलाविभूतिमवस्थाप्य तत्र शारादिकं त्वादाङ्गितपराधीनस्त्वन्मुखं वीक्ष्य त्वत्कटाक्षवैचित्र्यमनुसृत्य तत्तत्स्थाने तांस्तांश्चेतनान्निवेशयति । त्वत्प्रीत्यै प्रभुः क्रीडति ; क्रीडायां शाराणां प्रचारवैचित्र्ये त्वत्प्रणयो नियामकः ॥

सदा । न युवयोः क्रीडाया उपरतिः ; यदि विहरणविरतिः स्याद्युवयोरिच्छयैव सा स्यात् । 'विहरणविरतिः स्वेच्छया नैव दोषः' इति तत्त्वमुक्ताकलापे । सर्वमुक्तौ लीलाविरतिरिष्टैव । चेतनमुक्त्यर्थमेव दयारूपा लीला । सर्वप्रजामुक्तेरनन्तरं न कर्तव्यशेषं स्याद्दिव्यमिथुनस्य । सर्वप्रजानां मुक्तेरधिकः संतोषः कस्तैरीप्स्येत ॥

विभ्रमद्यूतवृत्तौ । नेदं पणबन्धद्यूतम् । लीलाकैवल्यमिदं द्यूतम् । नात्र परस्परस्पर्धा परस्परविजिगीषा । देव्या अभिप्रायमनुसृत्यैवाक्षशारप्रचारः क्रियते देवेन । उभयोरभिप्रा-

ययोः सर्वदैकरूपत्वे कथं चतुरङ्गक्रीडासंभवः ? न द्वौ दीव्यन्तावभिन्नाभिप्रायेण परस्परस्पर्धाविजिगीषुत्वादिकं विना शारादिकं निवेशयन्तौ दृष्टचराविति चेन्न— अदृष्टपूर्वावेवेमौ दीव्यन्तौ । नात्यन्तसादृश्यनिर्बन्धो दृष्टान्तदार्ष्टान्तिकयोः । अभिप्रायभेद, एकस्य जयोऽन्यस्य पराजयश्चावश्यमपेक्ष्येतेति चेन्न— अस्ति तत्सर्वमिति वदामः । शाराणां तत्तत्स्थाने निवेशनात्पूर्वम् , तत्तत्स्थानप्रचारणात्पूर्वं च पक्षपातानभिज्ञो भगवानेते चेतना एतदेतत्स्थानमात्राहाः, कस्मिन्स्थाने एते निवेशनीया इत्यत्र देवी प्रमाणमिति देवीसंनिधौ विज्ञापयति । करुणैकरूपिणी सा तत्तत्प्राणिस्थानस्य किंचित्किंचिदन्यथाकरणं स्वोदारभावानुगुणं नाथसंनिधौ स्ववाक्प्रयेन विज्ञापयति । मुखेङ्गितादिना स्वाभिप्रायं भर्त्रे निवेदयति वा । देवीच्छामनु देवो देव्यभिमततत्तत्स्थाने निवेशयति । प्रथममस्यैव नाथस्य कश्चिदभिप्रायस्तत्तत्प्राणिकृतसुकृतदुष्कृतमनुसृत्य । देव्या दयया तत्तत्प्राणिनां स्वसुकृतादधिकंभोग्यं किंचित्स्थानं दित्स्यते । तदिच्छानुसारेण प्रभुः स्थानं ददाति प्राणिभ्यः । एवमैकरस्यं भवति । सदा देवीदयाप्रयुक्ताभिप्रायस्यैव जयः । देवस्य पराजय एव । 'पुत्रादिच्छेत्पराजयम् ।' पुत्रशब्देन कलत्रमप्युपलक्ष्यते । सर्वो रसिको विभ्रमक्रीडादिषु स्वस्य कलत्रा-

त्पराजयमेवेच्छति ॥

ब्रह्मेशाद्या दधति युवयोरक्षशारप्रचारम् । विश्वाधीशत्वं निरूप्यते । 'कालः काल्या भुवनफलके क्रीडति प्राणिशारैः' इति भर्तृहर्युक्तमत्र भाव्यम् । अक्षाः ब्रह्मेशाद्या लोकनियन्तार ईश्वराः तन्नियाम्याश्चेतनाः देवमनुष्यादयः शाराः । यथाक्षानुगुणं शाराः प्रचार्यन्ते दीव्यद्भ्यां जनाभ्यां तथा दिव्याभ्यां दम्पतिभ्यां स्वप्रत्ताधिकारब्रह्मेशादिसङ्कल्पानुगुणमितरे संसारिणः प्रचार्यन्ते ॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधितनया विष्णुपत्नीन्दिरेति ।
यन्नामानि श्रुतिपरिपणान्येवमावर्तयन्तो
नावर्तन्ते दुरितपवनप्रेरिते जन्मचक्रे ॥ ८ ॥

विश्वाधीशप्रणयिनीत्युक्तम् । तत्कथमिति चेत्—तद्बोधकश्रुतिः परिगृह्यते 'अस्येशाना जगतो विष्णुपत्नी' इति । जगच्चक्रप्रवर्तयितृत्वम्, ब्रह्मेशादिनियामकत्वं चोक्तं पूर्वश्लोके । संसारिणां जगच्चक्र एव निम्नोन्नतस्थानप्रापणमुक्तं तत्र । इदानीं मोक्षप्रदत्वमुच्यते । श्रुत्युक्तनामावृत्तेरनावृत्तिः सिध्येदिति चारु प्रतिपाद्यते । नामावृत्तिफलमनावृत्तिः ।

सौत्रमिदं प्रदर्शनम् । 'आवृत्तिरसकृदुपदेशात्' इति फला- ध्यायोपक्रमः । आवृत्तेः साधनत्वमुच्यते तेन सूत्रेण । 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इति तदध्यायोप- संहारः । अनावृत्तिः फलम् । अनावृत्तिमावर्तयति सूत्र- कारः, सूत्रावृत्त्या । आवृत्तिलभ्यानावृत्तिमाचार्या अपि प्रद- र्शयन्ति सौत्रीं रीतिमनुसृत्येति रसिकमनोहरं स्यात् । कथ- मीशस्याक्षरत्वमिति चेत्— 'त्वं विश्वस्येशाना' इत्यु- च्यते ॥

अस्येशाना त्वमसि जगतः । अस्याः स्तुतेः सर्वाधि- कारत्वाच्छ्रौतपदानां मध्ये त्वमसीति पदान्तरनिवेशः क्रि- यते ॥

संश्रयन्ती मुकुन्दम् । 'श्रयते च परं पदम्' इति निर्वचनोक्तं स्मार्यते । विष्णुपत्नीति श्रौतनाम्नोऽर्थः संश्र यन्ती मुकुन्दमिति । 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' । ब्रह्मेशाद्याः पुनरावर्तिलोकाधिपतयः उक्ताः पूर्वश्लोके । संसाराध्वपारभूतं विष्णोः परमं पदम् । 'वि- ष्णोः परमं पदम्' इत्यभेदषष्ठ्या विष्णोः स्वरूपमित्यप्यर्थ- संमत एव । भर्तारं संश्रिता विष्णुपत्नी । विष्णुश्च संसारपारभूतः । परमं पदमिति परमप्राप्यभूतमुकुन्द एवा-

ऽभिप्रेतः ॥

लक्ष्मीः । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ ।' इति श्रौत-नाम । श्रुतिपरिपणत्वं नाम्नाम् । ब्रह्मस्वरूपस्य निधित्वम् । लक्ष्मीनाम्नः परिपणत्वम् ॥

पद्मा । इन्द्रस्तुतिपठितनाम ॥

जलधितनया । अमृतमथनोद्भवत्वं तत्र वृत्तोऽभिषेक-वृत्तान्तश्च स्मार्येते । 'त्वां स्तोष्यत्यब्धिसंभवे' इतीन्द्रः ॥

विष्णुपत्नी । श्रौतनाम । इन्दिरा । 'श्रियमिन्दिरा-सहचरम्' ॥

इति यन्नामानि । यस्यास्ते नामान्यावर्तयन्त इमं मानवमावर्तं नावर्तन्ते सा त्वमस्य जगत ईशानेत्यन्वयः । एवं च यतो वेत्यादिलक्षणवाक्यरीतिरनुसृता भवति ॥

श्रुतिपरिपणानि । मूलधनवद्रक्ष्यन्ते त्वन्नामानि । सक-लकल्याणनिधेः श्रियस्तव नामानि परिपणान्येव ॥

एवमावर्तयन्तो नावर्तन्ते । नामावृत्तिमात्रस्य मोक्षप्रद-त्वं कथं स्यादित्याक्षिप्येत । तत्परिह्रियते एवमिति । यथा मम निरतिशयो भावः, उपचितगुरुभक्तिश्चैतच्छ्लोकपठनाव-

सरे, तादृशभावसहितमिति भावः । आवर्तस्य परित आवर्तनेनैवातिलङ्घनं शक्यमिति प्रसिद्धम् । तच्च चारु सूच्यत इव । 'इमं मानवमावर्तं नावर्तन्ते' इति श्रुतिः ॥

दुरितपवनप्रेरिते जन्मचक्रे । पवनप्रेरितश्चक्राकार आवर्तः ॥

स्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तः कलहमलिनैः किंचिदुत्तीर्य मग्नैः ।
त्वत्संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावारूढौ भगवति युवां दैवतं दम्पती नः ॥

लक्ष्मीनामावृत्त्यानावृत्तिः सिध्येदित्युक्तम् । तथा च तस्याः स्वातन्त्र्येण मोक्षप्रदत्वं स्यात् । किं भवतां मतम् ? चतुःश्लोकीभाष्यप्रदर्शितरीत्या बहवः पक्षाः प्रदर्शिता भवन्त्यावयोर्मिथः परापरत्वापार्थक्यैक्यादिविषये । तत्र को भवत्संमतः पक्ष इति पृष्टे— वदति । एते विकल्पा न निपुणैः कल्प्येरन् । पतिं विश्वस्येति त्वन्नाथो जगत्पतिः । 'अस्येशाना जगतः' इति त्वमीशाना । व्यक्तिभेदेऽप्युभौ देवताद्वन्द्ववदेकं दैवतम् । भर्तुरपि त्वत्परत्वोक्तिस्तद्विहरणस्य त्वत्प्रीत्युद्देश्यत्वात् । युवयोरेकदैवततुल्यत्वादेकमेवाद्वितीय-

मित्याचैक्यश्रुत्यविरोधः । अनन्तानां चिदचितामपि ब्रह्मणैक्यं घटयतामस्माकं युवयोः पतिपत्न्योरैक्यघटनं न दुष्करं स्यात् ॥

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं किं तैरन्तःकलहमलिनैः । अन्तःकलहः सयूथ्यकलहो ; दम्पत्योर्मिथः कलहकरणोद्यमो वा उभयमपि मालिन्यमेवावहेत् ॥

किंचिदुत्तीर्य मग्नैः । दैवतान्तरपरत्वाश्रयणादुत्तीर्यात(?)योर्दम्पत्योरन्यतरपरत्वाश्रयणरूपदोषस्पर्शः । विशिष्टाद्वैतचातुरीनिष्ठत्वेऽपि परदेवतामिथुनस्याद्वैतीकरणसामर्थ्यविरहान्मग्नत्वम् । उत्तीर्य किञ्चिन्मग्नैः । तीरसमीपमागत्य किञ्चिन्मात्रावशिष्टे तरितव्ये मग्नैः ॥

त्वत्संप्रीत्यै विहरति हरौ । त्वत्प्रीत्यै विहरतीति हरिर्हरिर्भवतीव । विहर्तृत्वाद्धरिरिति नामेव । ‘रुक्मिणीं हरता हरे’ इति बलरामो माघे कृष्णं प्रति । रुक्मिणीहरणेन हरिर्भवतीव । त्वत्प्रीत्युद्देश्यविहारवत्त्वात्त्वत्परत्वकथनं कैश्चन । यो यत्प्रीतिमुद्दिश्य कर्मानुतिष्ठति, तस्य तद्दैवतं स्यात् । ‘अनुशिखिनि शिखीव क्रीडसि श्रीसमक्षम्’ ॥

संमुखीनां श्रुतीनाम् । पश्यन्तीषु श्रुतिष्विति श्लोके

दम्पत्योर्विहरणमुक्तम् । तयोः क्रीडा भावुकाभिः श्रुतिभिरभ्यच्यते । आनुकूल्येन संमुख्यः श्रुतयः पश्यन्ति भावसहितम् । सन्मुखीनां श्रुतीनामिति वा पाठः स्यात् । सन्धिया खलु परदेवताया ऐक्यमवधारयति । तत्र च सेयं देवतेति देवताप्रस्तावः । तत्र विशिष्टैक्यपरत्वं निर्धार्यते एकत्वस्य । 'दैवतं दम्पती नः' ॥

श्रुतीनां भावारूढौ भगवति युवां दैवतं दम्पती नः ।

श्रुतीनां युष्मत्परत्वे भावः । 'त्वां सर्वकारणमुशन्त्यनपायवाचः' इति स्वरसभावः श्रुतीनां युवयोः । न तत्र कोऽपि हठात्कारः ॥

आपन्नार्तिप्रशमनविधौ बद्धदीक्षस्य विष्णो-
राचख्युस्त्वां प्रियसहचरीमैकमत्योपपन्नाम् ।
प्रादुर्भावैरपि समतनुः प्राध्वन्वीयसे त्वं
दूरोत्क्षिप्तैरिव मधुरता दुग्धराशेस्तरङ्गैः ॥१०॥

दम्पती दैवतमित्युक्तम् । दम्पत्योः सहाधिकारः । वसुधाकुटुम्बिनाविमौ दम्पती । जगतः पितराविमौ । 'यज्ञो वै विष्णुः' इति यज्ञमूर्तेः 'विष्णोः सततं बद्धदीक्षत्वम् । सततदीक्षितस्य नित्यं पत्नीसाहचर्यापेक्षा ॥

आपन्नार्तिप्रशमनविधौ । भगवदुपासकेष्वार्तो जिज्ञासुरित्यार्तः प्रथमग्रहणम् । 'परमापदमापन्नो मनसाचिन्तयद्धरिम्' इति गजेन्द्रविषये आपन्नशब्दप्रयोगः । 'महत्यापदि संप्राप्ते स्मर्तव्यो भगवान् हरिः' इति वसिष्ठगीतगाथा स्मर्यते पञ्चालतनयया नृपसदसि तथाभूतया । तादृशप्रमाणवचनप्रत्यभिज्ञापनमापन्नशब्देन। 'आर्त' इत्यादिगीतावचनम्, 'तावदार्तिस्तथा वाञ्छा' इति प्रमाणवचनं च प्रत्यभिज्ञाप्येते आर्तिशब्देन । विधिशब्देनेश्वरस्य प्रजार्तिप्रशमनकर्मणि विहितयज्ञादिकर्मणीवादरः, नियोज्यत्वबुद्धिश्चेति व्यज्यते ॥

बद्धदीक्षस्य विष्णोः ; नित्यमुक्तोऽयं दीक्षयात्मानं बध्नाति आश्रितमोचनहेतोः । नास्य बन्धकान्तरसंभवः । अत आत्मना बध्यते । दीक्षाशब्दो विष्णुशब्दश्च विष्णुपत्नीमिति श्रुतिस्मारकौ यज्ञसंयोगे शिष्टं पत्नीशब्दरूपम् । विष्णोरेव सर्वत्र स्थितत्वात्तत्र तत्र झटित्यार्तिपरिहरणसंभवः ॥

ऐकमत्योपपन्नां प्रियसहचरीं त्वामाचख्युः । आपन्नानामार्तिहरणे इयं तुल्यभावोपपन्नेति शब्दचारुता । सहधर्मचरी तवेति कर्मठजनकवचनस्मारणम् । अलौकिक-

श्रेयःसाधनोधर्मः । किमीश्वरस्य श्रेय इत्यलौकिकेन श्रुतिप्रमाणेनावेद्यते । जायमानत्वम् । 'स उ श्रेयान्भवति जायमानः ।' जायमानत्वमस्य श्रेयः तत्साधनं धर्मः । तद्धर्मेऽस्य दीक्षा । तद्वानया सहचर्यते । तथा च सहधर्मचारीत्वमवतारेषु सहावतारेण । एतदेवोपपाद्यते उत्तरार्धेन । सहशब्दस्यार्थ ऐकमत्येति प्रियसहचरीति च ॥

प्रादुर्भावैरपि समतनुः । जायमानत्वबोधकश्रुतिः स्मारिता । न मुख्यं जन्म, येन जन्मप्रतिबद्धदोषशङ्का स्यात् । ऐच्छिकप्रादुर्भावमात्रे जन्मोपचारः । प्रादुर्भावैरिति जन्मनां पृथग्विधत्वं द्योत्यते । समतनुरिति 'देवत्वे देवदेहेयम्—' इत्यादिप्रमाणस्मारणम् । 'विष्णोः श्रीरनपायिनी' इति तत्रस्थविष्णुशब्दश्चास्मिन्नवतारप्रतिपादकश्लोके उपात्त इति रसिकैर्विभाव्यम् ॥

प्राप्त्वमन्वीयसे त्वम् । पूर्वार्धोक्तैकमत्यप्रियत्वयोः पुनः कथनमानुकूल्यभावे आदरातिशयात् । 'अनुगुणान्भावान्स्वयं बिभ्रती ।' सङ्कल्पैकरूप्यं दम्पत्योरवश्यापेक्षितं क्रतुनिर्वर्तनाय । अन्वीयम इति छायेवानुगता सदेति वचनस्य स्मारणम् ॥

दूरोत्क्षिप्तैर्दुग्धराशेस्तरङ्गैर्मधुरतेव । 'मध्येविरिञ्च-

गिरिशं प्रथमावतार' इति क्षीराब्धौ विष्णुत्वेन प्रथममवतीर्णं भगवता । तत्र स्थितो भगवान्सुरादीनामार्तिं श्रुत्वा देव्या सह विविधतनूः परिगृह्य तदा तदावतरति । क्षीरोदधिशयदेवस्यावताराः दुग्धराशेस्तरङ्गत्वेन वर्ण्यन्ते । भर्त्रा सह चरन्ती देवी दुग्धस्य मधुरतात्वेन रूप्यते । 'भास्करेण प्रभा यथा' इत्यनन्यस्वरूपणवद्दुग्धोदधितरङ्गत्वेन रूपितस्य मधुरतान्वयानियम इव देवीसाहचर्यनियमः । किं भगवतो न माधुर्यम्? मधुरो भगवान्; न मधुरैकान्तः । तीक्ष्णोऽपि भवति सो दण्डधरः । इयं तु मधुरैकान्ता । भगवानेव तां मधुरेति व्यपदिशति 'मधुरा मधुरालापा —' इति । अस्या अन्वयेन भगवतो मधुरतेति व्यज्यते ॥

धत्ते शोभां हरिमरकते तावकी मूर्तिराद्या
तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा ।
यस्यां गच्छन्त्युदयविलयैर्नित्यमानन्दसिन्धा-
विच्छावेगोल्लसितलहरीविभ्रमं व्यक्तयस्ते ॥

क्षीराब्धितरङ्गौपम्यं वर्णितं भगवदवतारविग्रहस्य । तेन प्राकृतत्वशङ्का स्यात् । भगवद्दिव्यविग्रहाणां प्राकृतसूक्ष्मसत्त्वमयत्वमनित्यत्वं चोच्यते कैश्चित् । 'आनन्दात्म-

को भगवांस्तदात्मिका भगवद्व्यक्तिः' । यथा ज्ञानानन्दात्मको भगवांस्तथा तद्विग्रहाः । तथा श्रीविग्रहा अपि । उभयोराद्यो विग्रहोऽनादिर्नित्यः । इतरे विग्रहास्तत उत्पद्य तत्रैव विलीयन्ते । लक्ष्म्या आद्यानित्यविग्रहस्य नित्यत्वमानन्दत्वम्, सर्वेतरतद्विग्रहाणां प्रकृतित्वं च व्युत्पाद्यते । दुग्धसिन्धुग्रहणं कृतं पूर्वश्लोके औपम्याय । अत्राद्यविग्रहस्यानन्दसिन्धुत्वम्; इतरविग्रहाणां तत्सिन्धुलहरीकल्पत्वं च वर्ण्यते ॥

तावक्याद्या मूर्तिः । परमपदस्थत्वं नित्यमूर्तेः । आद्यशब्देन श्रीवकुलभूषणैर्भगवद्विग्रहविषयप्रयुक्ताद्यज्योतिःशब्दप्रत्यभिज्ञापनमिव । मूर्तिशब्देन 'मूर्तं ब्रह्म' इति चतुःश्लोकीवचनस्मारणम् ॥

तन्वी तुङ्गस्तनभरनता तप्तजाम्बूनदाभा । तन्वी श्यामेति मेघे । हिरण्यवर्णामिति श्रुतिः ॥

हरिमरतके शोभां धत्ते । भर्तुः शेषभूतेयं तस्य शोभातिशयं विदधाति । मरतकमणेः काञ्चनेन शोभा स्यात् । पुंसां दृष्टिचित्तापहारी हरिः । तस्यापि शोभाधीयतेऽनया ॥

यस्यामानन्दसिन्धौ । आनन्दोदधिर्मूलविग्रहः, यथा स्वरूपम् ॥

नित्यमुदयविलयैः । ततो जन्म, तत्रैव लयः कार्यविग्रहाणाम् ॥

इच्छावेगोल्लसितलहरीविभ्रमम् । न तव जन्मतां कर्मवातप्रेरितलहरीत्वम्; किं तु स्वेच्छासंरम्भमात्रप्रेरितत्वम् । स्वेच्छावातप्रेरितानन्दोदधितरङ्गसादृश्यम् । वीचीतरङ्गफेनबुद्बुदसादृश्यं वर्ण्यते चिदचिज्जगतो ब्रह्मसिन्धावद्वैतग्रन्थेषु । तद्दृष्टान्तं वयं दिव्यविग्रहप्रकृतिकावतारादिविग्रहेऽभ्युपगच्छामः । नेतरत्र ॥

ते व्यक्तयो गच्छन्ति । ते प्रादुर्भावाः । 'तदात्मिका भगवद्व्यक्तिः' इति प्रमाणप्रत्यभिज्ञापनं व्यक्तिशब्देन ॥

आसंसारं विततमखिलं वाङ्मयं यद्विभूति
र्यद्भ्रूभङ्गात्कुसुमधनुषः किंकरो मेरुधन्वा ।
यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भावलेशैस्त्वदीयैः ॥

कारणकार्यरूपाण्युक्तानि । इदानीं विभूतिरुच्यते । अस्य

विभूतिभूतसरस्वत्यादिदेवीनां विभूत्यादिकथनेऽस्या महिम्नो निरतिशयत्वं सम्यगुन्नीयेत । 'देवतिर्यङ्मनुष्येषु पुंनामा भगवान्हरिः । स्त्रीनाम्नी लक्ष्मीर्मैत्रेय नानयोर्विद्यते परम् ॥' इति स्त्रीनाम्नीनां सरस्वत्यादीनां लक्ष्मीविभूतित्वेन विभक्तत्वम् । विभागश्चोभयोरिच्छानियतः । युवत्वादौ तुल्येऽपीत्यादिश्लोकोऽत्र भाव्यः । रामस्य सर्वस्मात्परत्वं वर्ण्यते हनूमता 'ब्रह्मा स्वयंभूश्चतुराननो वा—' इति श्लोके ब्रह्मशर्वेन्द्रेभ्यः परत्ववर्णनेन । तद्रीत्यात्र तत्पत्नीभ्यः परत्ववर्णने सर्वस्त्रीभ्यः परत्ववर्णनम् ॥

आसंसारं विततमखिलं वाङ्मयं यद्विभूतिः । संसारमण्डले भूतभविष्यद्वर्तमानयावद्वाग्विलासः सरस्वतीविभूतिविलसितम् सरस्वतीमहिम्नस्त्वत्कटाक्षलेशायत्तत्वात्तस्या महिमा त्वन्महिम्नि पर्यवस्यति । आसंसारमिति संसाररूपसृष्टेः पूर्वभूतवेदवाचो व्यावृत्तिः । न वेदवाचः सरस्वतीसंभवाः । वाङ्मयमिति विकारार्थकमयटापि तद्व्यावृत्तिर्लभ्यते ॥

यद्भ्रूभङ्गात्कुसुमधनुषः किंकरो मेरुधन्वा । ईश्वरकोपदग्धोऽपि मन्मथः पार्वतीरूपास्त्रेण तं जिगाय । तं च स्वदासं चकार । पार्वत्या भ्रूविलासेनेश्वरो मन्मथकिंकरो-

ऽभूत् । पार्वत्यास्तत्सौभाग्यं त्वद्भावलेशाधीनम् । 'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा । कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्ये ॥' इति मन्मथवचनं कुमारसंभवे । कुसुमायुधोऽपि पिनाकपाणेर्धैर्यच्युतिं कुर्यामित्युक्तम् । कुसुमपिनाकयोरन्तरस्य न शब्दतस्तथा स्फूर्तिर्यथा कुसुममेर्वोः । उभयत्रैकरूपधनुःशब्दप्रयोग उचितः । यथा—'उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।' एतच्चोपपादितं श्रीमम्मटभट्टैः । 'के मम धन्विनोऽन्ये' इति धन्विशब्दग्रहणं कृतम् 'कुसुमधनुषः किंकरो मेरुधन्वा' इति श्लोकयन्त आचार्या दोषं परिजिहीर्षन्तीव । कुसुमायुधस्थाने कुसुमधन्वेति । पिनाकपाणिस्थाने मेरुधन्वेति । मधुमेकं सहायं मेने प्रथमं कामः । स्थाण्वाश्रमं गत्वा तत्तपोदार्ढ्यं दृष्ट्वा 'नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात्' इति च्युतचापो निराशोऽभूत् । अनन्तरं तदाश्रमं शुश्रूषया प्रविशन्तीं गौरीं दृष्ट्वा स्वकार्यसिद्धिं पुनराशशंसे । यदा सेश्वरं प्रणनाम तदा तामेव सहायं मत्वा संमोहनं नामास्त्रं धनुषि समधत्त । चुक्षुभे च तदा स्थाणुरीश्वरः । अत एव तद्भ्रूभङ्गसहायान्मन्मथ ईश्वरमजयदित्युच्यते । 'अद्यप्रभृत्यवनता-

ङ्घ्रि तवास्मि दासः—' इतीश्वरवचनं पार्वतीं प्रति पञ्चमसर्गान्ते । अत्र न केवलं तस्या दासः; तद्भ्रूभङ्गमनु मन्मथस्यापि दासोऽभूदित्युच्यते । दासशब्दस्थानेऽत्र किंकरशब्दप्रयोगः ॥

यस्यां नित्यं नयनशतकैरेकलक्ष्यो महेन्द्रः । 'इन्द्रो महेन्द्रः सुरनायको वा—' इति श्लोकस्य प्रत्यभिज्ञापनं महेन्द्रशब्देन । प्रियेषु सौभाग्यमेव पुरुषार्थः स्त्रीणाम् । इन्द्रः सहस्राक्षः । दर्शनकरणाधिक्यं स्त्र्यन्तरदर्शनसौकर्यतदपरिहार्यत्वादिहेतुः । दिव्यरूपिण्यः सुरस्त्रियो भूयो नृत्यन्ति सुरनायकस्य पुरतः । चक्षुर्भूयस्त्वेऽपि दर्शनीयदिव्यरूपभूयस्त्वेऽपीयं शची तन्नयनशतकानामेकलक्ष्या भवतीति किमाश्चर्यमतःपरम् । नित्यं तामेव सदाभावितैकलक्ष्यत्वेन पश्यन्ति । शतकैरिति पुरोभागे, पश्चाद्भागे पार्श्वभागे सर्वत्र नयनानां व्यवस्थितिरुच्यते । यदि ललाट एव नयनानि स्युः; बहून्यपि तान्येकमेव लक्ष्यमेककाले द्र प्रभवेयुः । अस्येन्द्रस्य पुरस्तात्पृष्ठतः पार्श्वतः सर्वत्र नयनानि सन्ति । तथा चैकैकनयनवर्गेण भिन्नभिन्नलक्ष्यदर्शनसामर्थ्यम् । तद्व्यज्यते नयनशतकैरिति विभागसूचनेन ॥

तासामसौ परिणतिः । तिसृणामीदृशं सौभाग्यफलम् ॥

पक्षे त्वदीयैर्भावलेशैः । त्वत्कटाक्षलेशैः । त्वदंशलेश-सद्भावैरिति वा । तव नेजोंऽशसंभवम् ॥

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णा-
मम्भोराशेरधिगतसुधासंप्लवादुत्थितां त्वाम् ।
पुष्पासारस्थगितभुवनैः पुष्कलावर्तकाद्यैः
क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन्गजेन्द्राः ॥

सरस्वत्याः, कुसुमधनुषः; शच्याश्च शक्तिसौभाग्यादिकं लक्ष्म्यधीनमित्युक्तम् । अन्वयव्यतिरेकाभ्यां त्रिभुवनैश्वर्यस्यापि तत्कटाक्षाधीनत्वं निरूपितं श्रीमद्यामुनार्यैः — 'ईषत्त्वत्करुणानिरीक्षणसुधासंधुक्षणाद्दृश्यते नष्टं प्राक्तदलाभतस्त्रिभुवनं संप्रत्यनन्तोदयम्' इति । ईषत्त्वत्करुणानिरीक्षणेति यदुक्तं तदुच्यते 'भावलेशैस्त्वदीयैः' इति । अन्वयव्यतिरेकप्रदर्शनं करिष्यतेऽनन्तरश्लोके 'शापाक्रान्ताः' 'लब्ध्वा भूयस्त्रिभुवनमिदम्' इत्यादिना । अस्या मथितक्षीराब्धेरुत्थानकालेऽभिषेकमङ्गलं निरवर्त्यत । नष्टा त्रिभुवनशोभा पुनः समजनि । अत्राभिषेकमङ्गलं वर्ण्यते । 'ऐरावतं गजेन्द्राणाम्—' इति निर्धारणमैरावतस्य गजेन्द्रेषु । ऐरावतश्च लक्ष्मीमालां पदा ममर्द । गजेन्द्रकृताप-

राघं गजेन्द्राः क्षालयन्ति स्वयमभिषेचनेनेत्युच्यते 'अभ्यषिञ्चन्गजेन्द्राः' इति रसिकैर्भाव्यम ॥

अग्रे भर्तुः । भर्तुरप्यग्रे भवतीयम । सहसीतमिति रामाभिषेके सीतायाः सहशब्दगम्यं किंचिदप्राधान्यमिव । अत्र भर्तुरिति भर्तुर्निरूपकत्वमेव महिष्याः । तस्याः प्राधान्यम् ॥

सरसिजमये भद्रपीठे निषण्णाम् । 'स्थानं यस्याः सरसिजवनं विष्णुवक्षःस्थलं वा' इत्युक्तमनुसृत्य सरसिजमयासननिषदनमुच्यते । 'विकासिकमले स्थिता—' इत्यवतारवर्णनं श्रीपराशरेण ॥

अम्भोराशेरधिगतसुधासंप्लवादुत्थितां त्वाम् । अमृतसंप्लवनदशापन्नक्षीराब्धेरुत्थितेति विशेषो द्योत्यते । न केवलक्षीराब्धेरुत्थिता, 'श्रीर्देवी पयसस्तस्मादुत्थिता—' इत्यार्षशब्दग्रहणमुत्थितामिति ॥

पुष्पासारस्थगितभुवनैः । पुष्पमयमासनम् । पद्मा पद्मप्रिया पद्मवनावासा लक्ष्मीः । पुष्पवृष्ट्याभिषेको युक्तस्तस्याः । पुष्पवृष्ट्या सुदिनं भवति, न दुर्दिनं मिलितेष्वपि सप्तमेघेषु ॥ 'शरीरिणां स्थावरजङ्गमानां सुखाय तज्जन्मदिनं बभूव' इतिवत् सुदिनं खलु तदाविर्भावदिनम् ।

पुष्पकलावर्तकाद्यैः । अभिषेके सहकुर्वतां मेघानां पुष्कलत्वम्; हर्षवेगेनावर्तवत्त्वं च व्यज्यते संज्ञाभ्याम् ॥

क्लृप्तारम्भाः कनककलशैरभ्यषिञ्चन्गजेन्द्राः । अभ्यषिञ्चन्नित्यार्षशब्दग्रहणम् । गजेन्द्रा इति स्वप्रधानभूतैरावतकृतःपयःरस्याभिषेकधाराभिः क्षालनं व्यज्यते । ऐरावतोऽपीदानीमेव पुनः संभूतः । 'गृहीत्वामरराजेन स्रगैरावतमूर्धनि । न्यस्ता' 'मदान्धकारिताक्षोऽसौ गन्धोत्कृष्टेनैरावणः । करेणाघ्राय चिक्षेप तां स्रजं धरणीतले ॥' इति श्रीपराशरः 'दिग्गजा हेमपात्रस्थमादाय विमलं जलम् । स्नापयांचक्रिरे देवीं सर्वलोकमहेश्वरीम ॥' इति च ।

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थां
शापाक्रान्ताः शरणमगमन्सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः
सर्वाकारस्थिरसमुदयां संपदं निर्विशन्ति ॥१४

अन्वयव्यतिरेकप्रदर्शनमत्र चतुःश्लोकीरीतिमनुसृत्य । लक्ष्मीकटाक्षालाभात्त्रिभुवनं शून्यमिव नष्टमिवाभूत् । 'ततः प्रभृति निःश्रीकं सशक्रं भुवनत्रयम् । मैत्रेयासीदपध्वस्तं संक्षीणौषधिवीरुधम् ॥' इति श्रीपराशरः । 'तस्मात्पणष्ट-

लक्ष्मीकं त्रैलोक्यं ते भविष्यति' इत्यक्षान्तिसारसर्वस्वत्वे-नात्मानं वर्णयतो दुर्वाससः शापः शक्रविषये। लक्ष्म्यवतारा-नन्तरम्— 'श्रिया जुष्टं च त्रैलोक्यं बभूव द्विजसत्तम' इति पराशरः ॥

आलोक्य त्वाममृतसहजे विष्णुवक्षःस्थलस्थाम् । 'ततोऽवलोकिता देवा हरिवक्षःस्थलस्थया' इत्यार्षशब्दा-नुसरणम् । 'पश्यतां सर्वदेवानां ययौ वक्षःस्थलं हरेः' इति पूर्ववाक्यम् । वाक्यद्वयमिश्रणमत्र । अमृतस्यानन्तरं लक्ष्म्युत्थानम् । प्रथमं धन्वन्तरिर्देवोऽमृतस्य पूर्णं कमण्डलुं बिभ्रदुत्थितः । अनन्तरं लक्ष्मीः । 'विष्णुवक्षःस्थलस्थिताम्' इतीन्द्रः ॥

शापाक्रान्ताः । लक्ष्मीमालाक्रमणस्य शापाक्रान्तत्वं फलम् ॥

शरणमगमन्सावरोधाः सुरेन्द्राः । पूर्वश्लोके गजेन्द्रकृ-तसेवोक्ता । अत्र सुरेन्द्रसेवोच्यते । इन्द्रापराधस्तदीयैः सुरे-न्द्रैः क्षाल्यते । यथा गजेन्द्रैरैरावतस्य । 'घृताचीप्रमुखा ब्र-ह्मन्नृतुश्चाप्सरोगणाः ।।' श्रीसूक्तेन सर्वे तुष्टुवुर्मातरम् । 'नमामि सर्वलोकानाम्—' इतीन्द्रस्तुत्युपक्रमः । सावरोधैः

शरणगमने फलनिश्चयः । दम्पत्योः सह्याधिकारो न्यासयागे । सह प्रपदनमुचितम् । सावरोधः खलु प्रपद्यते ॥

लब्ध्वा भूयस्त्रिभुवनमिदं लक्षितं त्वत्कटाक्षैः ।
त्रैलोक्यमित्यार्षवचनम् । त्रिभुवनमिति यामुनपदोपादानम् । शरणगमनक्षणे भूयो लाभसिद्धिः ॥

सर्वाकारस्थिरसमुदयां संपदं निर्विशन्ति । 'संप्राप्य त्रिदिवं पुनः' इति पराशरः । अत्र 'लब्ध्वा भूयः' 'समुदयाम्' इति । 'संप्रत्यनन्तोदयम्' इति चतुःश्लोक्यनुसरणमप्यत्र । 'त्वया देवि परित्यक्तं सकलं भुवनत्रयम । विनष्टप्रायमभवत्त्वयेदानीं समेधितम्' भूयस्त्वत्कटाक्षैर्लक्षितमित्यप्यन्वयः । त्वत्कटाक्षलक्ष्यत्वफलमनन्तोदयवत्त्वम् । अनन्तोदयमित्यस्य भाववर्णनम् 'सर्वाकारस्थिरसमुदयां संपदम्' इति । 'सुरव्रजस्त्वद्दासदासीगणः' इत्यस्य भाववर्णनम् 'सावरोधाः सुरेन्द्राः' इति । भूय इति प्रणष्टस्य लाभः सूच्यते । 'प्रणष्टस्य यथा लाभः' इति दशरथो हर्षातिशयं निदर्शयति ॥

आर्तत्राणव्रतिभिरमृतासारनीलाम्बुवाहै-
रम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः ।

यस्यां यस्यां दिशि विहरते देवि दृष्टिस्त्वदीया
तस्यां तस्यामहमहमिकां तन्वते सम्पदोघाः ॥

शरणगमनमुक्तम् । 'तावदार्तिः....यावन्न याति शरणम्' इति प्रमाणस्योपस्थितिर्भवति । 'ददाम्येतद्व्रतं मम' इत्यपि स्मर्यते । मेघैः पुष्पवर्षः कृतः । कृते च प्रतिकर्तव्यं कृतज्ञसार्वभौम्या । तस्या अपाङ्गा नीलाम्बुवाहा भवन्ति । पुष्पासारस्थानेऽमृतासारं प्रवर्तयन्ति । स्वयमपि सद्यो विकसत्पद्मानि भवन्ति । 'वर्षाकीर्णामिव कमलिनीम्—' 'शिशिरमथितां पद्मिनीम्—' इत्यम्बुवाहैः पद्मानि कदर्थ्येरन् । अत्र नीलाम्बुवाहाः पद्मानि भवन्ति । संपदोघास्त्वदृष्टिपातेऽहमहमिकां भजन्ते ॥

आर्तत्राणव्रतिभिः । 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ।' प्रथमपठितस्यार्तस्य त्राणमुच्यते । दम्पत्योराश्रितार्तिप्रशमनविधौ बद्धदीक्षत्वमुक्तम् । अत्र पत्नीकटाक्षाणां तद्व्रतित्वमुच्यते । यथा राज्ञी तथा तत्परिकराः ॥

अमृतासारनीलाम्बुवाहैरम्भोजानामुषसि मिषतामन्तरङ्गैरपाङ्गैः । अपाङ्गा अन्तरङ्गा इति शाब्दविरोधवैचित्र्यम् । नीलाम्बुवाहा अम्भोजानामन्तरङ्गा इत्यपि वैचित्र्य-

प्रदर्शनम् । 'उन्निद्रपद्माक्षीम्—' इतीन्द्रस्तुतौ । तदुच्यते 'उषसि मिषताम्' इति ॥

यस्यां यस्यां दिशि । वीप्सया व्याप्तिः; संरम्भश्च । तस्यां तस्यामिति वीप्सा । अहमहमिकापि च वीप्सागर्भा । संपदोघा इति तासां पौनःपुन्येन भवनम् । एवं वीप्साबाहुल्यमस्याः फलदातृत्वविषयेऽत्यन्तहृद्यम् ॥

विहरते देवि दृष्टिस्त्वदीया । देवि विहरणशीले ! त्वच्छीलानुसारिणी त्वद्दृष्टिः । त्वदीयत्वात्सा विहरते । आत्मनेपदप्रयोगः फलं तवैवेति व्यनक्ति । विहरणं च दयालीला ॥

तस्यां तस्यां दिशि । दिगन्तपर्यन्तं धावन्ति संपदो लक्ष्यमन्विष्यन्तः ॥

अहमहमिकां तन्वते संपदोघाः । अनिर्दिष्टसंप्रदानव्यक्तिविशेषाः संपदः स्वामिन्या । 'का काल' 'गम्यताम्' इति सामान्येन निर्विशेषाज्ञा । सर्वा अहं पूर्वमहं पूर्वमिति धावन्ति । अथ वा न भाषते देवी । कटाक्षमात्रं प्रसृतं कस्यांचिद्दिशि । भाषणात्पूर्वमेव तत्र सर्वा धावन्ति । कटाक्षमात्रपाते कस्यैवाज्ञा दत्तेति विशेषापरिज्ञानात्सर्वा अहं

पूर्वमहं पूर्वमिति ससंरम्भं दिगन्तेषु धावन्ति । यद्येका संपद्दिशिष्याज्ञाप्येत सैकैव गच्छेत् । न तदाहमहमिकावकाशः । स्वामिन्यपि किं दद्यां किं दद्यामित्यनिश्चाय्यैव संपदोघधावनं स्पृहयतीव । तासामहमहमिका तस्या इष्टेव ॥

योगारम्भत्वरितमनसो युष्मदैकान्त्ययुक्तं
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम् ।
तेषां भूमेर्धनपतिगृहादम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम्

अर्थार्थिनामर्थप्राप्तिरुच्यतेऽत्रानन्तरश्लोके च । न स्वार्थमर्थार्थिन इमे । धर्मार्थमर्थापेक्षा । न फलाभिसन्धिरूपकलङ्कोपहतधर्मार्थम् । किं तु तद्रहितशुद्धनिवृत्तिधर्मार्थम् । संपदामहमहमिकारूपा त्वरोक्ता । अत्र भूम्यादिवसुस्थानानां संपद्धारावर्षणे त्वरा बोध्यते । कनकधाराश्रीलक्ष्मीस्तव इत्यपि स्तुतिनामविशेषोऽन्वर्थीक्रियते ॥

योगारम्भत्वरितमनसः । 'विविदिषन्ति यज्ञेन दानेन —' इति श्रुतिमनुसृत्य योगारम्भयोग्यतासंपादनार्थमनाशकमकामोपहतं यज्ञं दानं च चिकीर्षन्ति ॥

युष्मदैकान्त्ययुक्तं धर्मं प्रथमं प्राप्तुम् । प्रथमो धर्मः, प्रथमयुगधर्मः ; कार्तयुगधर्मो निवृत्तिधर्मः । स एव प्रथमः श्रेष्ठो धर्मः । ऐकान्त्ययुक्तमित्यैकाग्र्यरूपयोगवत्त्वमपि धर्मस्य गृहीतं भवति । तेन च योगारम्भानुकूल्यम् । 'व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।' ऐकान्त्यं नः बहुशाखत्वमानन्त्यं वा— ॥

इह ये धारयन्ते धनायाम् । न धनमात्मन इच्छन्त इमे धनायन्त: ; किंतु परोपकारार्थमिति वैचित्र्यमभिप्रेतम् । परार्थनैव स्वार्थतैषाम् ॥

तेषां वाञ्छितानां वसूनां धारा अधिकमधिकं निर्यान्ति । ये धारयन्ते तेषां धारा निर्यान्तीत्युचितम् । नाहं प्रथमिकारूपा मिथः स्पर्धा । एकैकस्या वसुधाराया अनेकशः पूर्वपूर्वाधिक्येन जिगमिषात्र वर्ण्यते । अहं चरमिकारूपा स्पर्धा ।

भूमेः । वसूनां धारा वसुंधराया निर्गच्छन्तीति साम्प्रतम् । अतो भूमेः प्रथमनिर्देश इव । सीतामाता भूमिः । मातृप्रेषितं वसु ॥

धनपतिगृहात् । धनपतिर्लक्ष्म्या कोशाधिकारे नियुक्तः ।

स्वस्या एव कोशागारान्निर्यान्ति ॥

अम्बरात् । विष्णुपदमम्बरं भर्तृपदम् । भर्तुर्धनधाराः प्रसरन्ति ॥

अम्बुधेर्वा । अम्बुधिश्च रत्नाकरः । पितापि सः ; भर्तुः स्वस्याश्च च वासगृहं च ॥

धारा निर्यान्त्यधिकमधिकं वाञ्छितानां वसूनाम् । वसूनां धारा अधिकमधिकं निर्यान्ति । उत्तरोत्तरमभिवृद्धा निर्यान्ति । अधिकमधिकं वाञ्छितानां वसूनां धारा निर्यान्ति । वाञ्छितानामधिकमधिकं धारा निर्यान्ति ॥

श्रेयस्कामाः कमलनिलये चित्रमाम्नायवाचां
चूडापीडं तव पदयुगं चेतसा धारयन्तः ।
छत्रच्छायासुभगशिरसश्चामरस्मेरपार्श्वाः
श्लाघाशब्दश्रवणमुदिताः स्रग्विणः संचरन्ति ॥

'श्रेयो न ह्यरविन्दलोचनमनःकान्ताप्रसादादृते' इत्युक्तिस्मारणं श्रेय इति । 'स्तूयमाना स्तोतव्यत्वं दिशति' इत्युक्तम् । 'यं स्तुवन्स्तव्यतामेति ।' तदुपपाद्यते । श्रुतिमौलयश्चरणयुगं धारयन्ति । अस्माभिरपि तथैव कर्त-

व्यम् । तच्चरणयोश्चेतसा धारणेऽस्माकं छत्राणि धार्यन्ते; चामराणि वीज्यन्ते, श्लाघाशब्दाः पठ्यन्ते; मालाः समर्प्यन्ते । चरणधारणस्य फलं छत्रधारणम् । चरणश्रवणफलं श्लाघाशब्दश्रवणम् । धारणस्य धारणम्; श्रवणस्य श्रवणं च प्रत्यर्प्यते परमोदारया । इतरथा आनृण्यं न भवेदिति मन्यते सा ॥

कमलनिलये । पद्मसौगन्ध्यम्, पद्मसौकुमार्यं च व्यज्यते चरणकमलधारणरुचिजननाय । युक्तं हृदयपुण्डरीकेण चरणकमलधारणम् ॥

श्रेयस्कामाः । कामना तावदधिकारिविशेषणम्, स्वर्गकामो यजेतेतिवत् । एतेन नान्यथा श्रेयोलाभ इति व्यज्यते ॥

आम्नायवाचां चित्रं चूडापीडं तव पदयुगम् । श्रुतीनां शिरोऽवतंसभूतं पदपद्मयुग्मम् । पद्मादित्वं मङ्गलकरम् ॥

चेतसा धारयन्तः । न स्वर्णशठारेः शिरसा धारणेनालम् । बुद्धौ धारणमावश्यकम् । मौलिश्च बुद्धिस्थानम् । अनेन शिरसा धारणमपि सिध्यति 'यावन्न शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति' इति भरतः । धारणमिति धारणापि व्यज्यते । धारयन्त इति शतृपा समानकालिकत्वं

द्योत्यते । धारयन्तश्छत्रच्छायासुभगशिरसः। धारणक्षण एव भूयः संमानं लभन्ते ॥

छत्रच्छायासुभगशिरसः । येन शिरसा तव चरणयुगलं धार्यते, तच्छिरश्छत्रच्छायया म्रियते । शिरसि धृतयोर्लक्ष्मीचरणयोरियं संमानना । तदर्थमनातपसंपादनम्; चामरवीजनं च । तच्चरणानुभावोऽयम् । 'जनार्दनानुस्मरणानुभावः' इति प्रह्लादः स्वस्य प्रह्लादस्यानुभाव इति पितृबुद्धिं निरस्यति ॥

श्लाघाशब्दश्रवणमुदिताः । जय विजयीभवेत्यनुचरैरुच्चैरुद्धोष्यते । श्रवणेनाराधितवन्तं श्रवणेन मोदयते माता । स्तोतव्यत्वं ददाति स्तोतुः । तत्क्रतुन्यायोऽनुस्मियते ॥

स्रग्विणः । मालाः समर्प्यन्ते प्रभूणां श्रिया जुष्टानामिति लोकमर्यादा दृश्यत इदानीम् । श्लाघापत्रिकाश्च पठ्यन्ते तेषां श्रवणाय । इदमाचार्यैरनुभूतमिति विस्मयस्थानमस्माकम् ॥

ऊरीकर्तुं कुशलमखिलं जेतुमादीनरातीन्
दूरीकर्तुं दुरितनिवहं त्यक्तुमाद्यामविद्याम् ।
अम्ब ! स्तम्बावधिकजननग्रामसीमान्तरेखा-
मालम्बन्ते विमलमनसो विष्णुकान्ते दयान्ते ॥

मोक्षार्थं त्वमाश्रीयसे । योगः सिध्यति त्वत्कृपया । विमलमनसो योगिनः । अनाद्यान्तरशत्रवो निर्मूल्यन्ते । अनाद्यविद्योच्छिद्यते । क्षीयन्ते सर्वकर्माणि । त्वद्दयैव सर्वं सम्पद्यते ॥

अखिलं कुशलमूरीकर्तुम् । सर्वकामावाप्त्यर्थम् ।

आदीनरातीञ्जेतुम् । आदिशत्रवोऽनादिशत्रवः । जगदादिरनादिस्त्वम् । आदिभूतस्यानादित्वम् । आदिशब्दप्रयोगस्य प्रयोजनमन्तः शत्रूणां मुख्यत्वद्योतनम् ॥

दुरितनिवहं दूरीकर्तुम् । एवं प्रत्येव विनाशः पूर्वपुण्यपापानाम् । स्वरूपतो न विनाशः । अन्यत्र संक्रमिष्यमाणत्वात् । अतो दूरीकरणमुच्यते । निवहमिति संचितदुरितद्योतनम् । ब्रह्म निकटे भवति । दुरितानि दूरीभवन्ति ॥

आद्यामविद्यां त्यक्तुम् । 'कर्माविद्यादिचक्रे—' इति कर्मणाविद्या । कर्मणि निवृत्तेऽविद्यापि निवर्तते । अविद्यायास्त्यागः । नाविद्यकप्रपञ्चप्रविलापनम् ; यथाद्वैते ॥

अम्ब । दयाप्रार्थने वात्सल्यप्रयोजकसंबन्धद्योतकसंबुद्धिः ॥

स्तस्यावधिकजननग्रामसीमान्तरेखाम् । आलम्ब्यमाना दयारेखा जननग्रामसीमान्तरेखा भवति । नास्माकं कश्चिज्जन्मग्रामविशेषोऽस्ति । अस्मज्जननग्राम इति वृथैव कंचिद्ग्रामविशेषमभिमनुमहे । नैकोऽस्मज्जननग्रामः । अनन्तास्तेऽत्यन्तमनियताः । जननसमूहोऽस्मज्जननग्राम इति वक्तुं साम्प्रतम् । एतद्व्यज्यत इव ग्रामशब्देन । जननग्रामाद्बहिर्निःसारणं दयया । प्रकृतिमण्डलं कृत्स्नमस्मज्जननग्रामः । तन्मण्डलाद्बहिर्नयनमिष्यते ॥

आलम्बन्ते विमलमनसो विष्णुकान्ते दयान्ते । 'दान्ते दयान्ते विदन्' इति श्रीयामुनमुनयः । दान्तविवरणं विमलमनस इति । विष्णुकान्तेति वैष्णवाध्वनयनसामर्थ्यद्योतनम् ॥

जाताकाङ्क्षा जननि युवयोरेकसेवाधिकारे
मायालीढं विभवमखिलं मन्यमानास्तृणाय ।
प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् ॥ १९ ॥

दयालम्बनकथनेन प्रपदनं सूचितम् । प्रपत्त्यनन्तरदशा वर्ण्यते । दुरितनिवहस्य दूरीकरणमुक्तम् । न तावता नित्य-

कर्महानिरित्युच्यते ॥

जननि । प्रपदनेन सत्त्वे संपादिते इदानीमेव तव पुत्रोऽहं जात इति द्योत्यते ॥

युवयोरेकसेवाधिकारे जाताकाङ्क्षः । युवयोः सेवाकाङ्क्षायां जातायां त्वं जननी भवसि । सेवाकाङ्क्षाजन्मना वास्तवं जन्म प्रजानाम् । सेवाया अधिकारत्वेनादरणं तस्या नीचवृत्तित्वदुःखहेतुत्वादिनिरासाय । स्वतो रुचिविषया स्वरूपस्य परमानुकूला सेवा ॥

मायालीढं विभवमखिलं मन्यमानास्तृणाय । 'अच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तवितराणि तृणाय मेने' इतिवदत्रानुभवः । एकसेवाधिकार इत्येकपदेन न वित्तादिसेवान्विष्यत इति द्योत्यते । तद्भावविवरणं द्वितीयपादेन । मायालीढं विभवमिति शुनालीढपुरोडाशवद्दूरतः क्षेपणीयत्वस्य व्यञ्जनमालीढशब्देन ; 'न च सुखमशेषाभिलषितम् ; नान्यत्किमपि तव शेषत्वविभवाद्बहिर्भूतं नाथ क्षणमपि सहे' इत्यस्य स्मारणमिव । तव शेषत्वविभवाद्बहिर्भूतविभवस्य नानिष्टता ॥

प्रीत्यै विष्णोस्तव च कृतिनः प्रीतिमन्तो भजन्ते ।

परस्परं प्रीयमाणत्वम् । 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।' कृतिन इति कृतकृत्यत्वमुच्यते । कृतिन इति कर्मनिष्ठत्वमप्युच्यते । कर्मिणो न कर्मत्यागिनः । 'अस्या मम च शेषं हि—' इति वचनानुरोधेन शेषिद्वयस्य पृथक्पृथङ्निर्देशः । प्रीतिमन्त इति मतुपा प्रीत्यनपायद्योतनम् । प्रीतिमन्त इति कर्मानुष्ठाने भोग्यताबुद्धिमन्त इति च ॥

वेलाभङ्गप्रशमनफलं वैदिकं धर्मसेतुम् । आज्ञासेतुरनुपाल्यते । लोकानामसंभेदाय धर्मसेतुर्निबद्धः । तद्भङ्गे उद्वेलं जगत्कदर्थ्येत ॥

सेवे देवि त्रिदशमहिलामौलिमालार्चितं ते
सिद्धिक्षेत्रं शमितविपदां संपदां पादपद्मम् ॥
यस्मिन्नीषन्नमितशिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥

चरणकमलसेवया परप्राप्तिरुच्यते । 'कृष्णप्रणामी न पुनर्भवाय' इत्युक्तम् । 'जगन्मातृपदपद्मे प्रणमितो न पुनर्भवाय' इत्यत्र वैलक्षण्यमुच्यत इव । 'नामान्यावर्तयन्तो नावर्तन्ते जन्मचक्रे' इत्युक्तम् । कुत्र ते वर्तेरन्निति पृष्टे उच्यते— वासुदेवस्य वितमसि पद इति ॥

न केवलं मुखेस्मितम् । पार्श्वयोरपि स्मितं भवति चामरै-र्वीज्यमानैः ।

देवि । 'देवि ! दिव्यं पदं वा—' 'तव भूमा,' इत्यु-क्तं स्मार्यतेऽनेन संबोधनेन ॥

त्रिदशमहिलामौलिमालार्चितम् । न पुष्पमालाभिर-र्चनं चरणयोः ; किं तु मौलिमालाभिरर्चनम् ॥

शमितविपदां संपदां सिद्धिक्षेत्रं ते पादपद्मम् । 'वि-पदो नैव विपदः संपदो नैव संपदः । विपद्विस्मरणं विष्णोः संपत्तस्यैव संस्मृतिः ॥' शमितविपत्संपन्मुख्या संपत् । इतरसंपदाममुख्यत्वेनानुषङ्गिकत्वेन ग्रहणम् । पद्मशब्देन नि-धित्वबोधनम् । पद्मनिधेः क्षेत्रशब्दसमभिव्याहारः 'हिर-ण्यनिधिमक्षेत्रज्ञाः—' इति श्रुतिं स्मारयति ॥

यस्मिन्नीषन्नमितशिरसः । नमितत्वमात्रेणालम् । न प्रणामोऽपेक्ष्यते ; यथा कृष्णविषये । केवलनमितत्वम् ; न न-तत्वमपि । शिरस इति शिरोमात्रस्य नमितत्वमुच्यते औत्स-र्गिकावधारणगर्भत्वाश्रयणेन । मनोबुद्ध्यभिमानेनेत्याद्यष्टाङ्ग-प्रकनमनानपेक्षेति व्यज्यते । 'शिरस्तत्रैव पञ्चमम्' इति चरमस्य शिरसो नमितत्वेनालम् ॥

यापयित्वा शरीरम् । शरीरयात्रां निर्वर्तयित्वा ॥

वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः । अस्य तत्र वर्तनेच्छा भवतु वा मा वा । प्रसभमयं तत्रातिवाह्य वर्तिष्यते । सर्वत्र णिजेव प्रयुज्यते । वासुदेवं निरवधिकधसुमन्तमपि धन्यं कुर्वन्तीमे । तद्लब्ध्या धनलम्भयितार इमे पद्मनिधिसेवितारः । निधिसिसेविषूणां धन्यत्वमुचितम् ॥

सानुप्रासप्रकटितदयैः सान्द्रवात्सल्यदिग्धै-
रम्ब ! स्निग्धैरमृतलहरिलब्धसब्रह्मचर्यैः ।
घर्मे तापत्रयविरचिते गाढतप्तं क्षणं मा-
माकिञ्चन्यग्लपितमनघैरार्द्रयेथाः कटाक्षैः ॥ २१

शरीरस्य यापनं भविष्यतीत्युक्तम् । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति' इति सशरीरत्वे तापत्रयग्लपितत्वं स्यात् । सशरीरत्वे तापत्रयनिर्वापणमासेचनकैस्त्वत्कटाक्षैराप्यायनेन भवतीत्युच्यते । 'एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम्' इति ब्रह्मप्रवेशे संसारग्रीष्मतापनिर्वापणम्, आर्द्रीभवनं च भवेत् । दूरतः स्थितानप्यमृतवर्षुकैर्वात्सल्यनिर्भरैर्दयाशीतलैः कटाक्षैरार्द्रं सिञ्चति, स्नपयति च मातेत्युच्यते ॥

सानुप्रासप्रकटितदयैः । सानुप्रासशब्देन मास्मिंस्त्वद्दया प्रसरत्विति निषिद्धाऽपि दृढं दयत इति द्योत्यते । प्रकटास्या दया । न पितुरिव निगूढा ॥

सान्द्रवात्सल्यदिग्धैरम्ब । मातृत्वरूपसंबन्धोऽत्र सहजं निमित्तमिति द्योत्यते वात्सल्यशब्देन । अम्बेति तस्यैव स्पष्टकथनम् ॥

स्निग्धैरमृतलहरीलब्धसब्रह्मचर्यैः । अमृतेन सह जातेयममृतसहजा । अमृतलहरीभिः सहजाभिः सब्रह्मचर्यमुचितम् । उभयोरेका विद्या; एकः स्वभावः ॥

अनघैः कटाक्षैः । पापहराः कटाक्षाः । न कदापि कोपकलुषिताः ॥

घर्मे तापत्रयविरचिते । ग्रीष्मशब्दभावविवरणम् । मनसिजप्रसरस्यापि ग्रीष्मवत्तापकत्वं महाकविसंमतम् । 'समस्तापः कामं मनसिजनिदाघप्रसरयोः' इति तदुक्तिः ॥

गाढतप्तं मामाकिंचन्यग्लपितमार्द्रयेथाः । आर्द्रीकुरुष्व माम् । 'पानीयशालं मरुभूषु तस्यात्' । तप्तस्यैवार्द्रीकरणं न्याय्यम् ॥

संपद्यन्ते भवभयतमीभानवस्त्वत्प्रसादा-
द्भावाः सर्वे भगवति हरौ भक्तिमुद्वेलयन्तः ।
याचे किं त्वामहमिह यतः शीतलोदारशीला
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥

आर्द्रैयेथाः कटाक्षैरिति किमर्थं मया प्रार्थ्यते ? मत्प्रार्थनायाः पूर्वमेव त्वं स्वयं सहजौदार्यान्मङ्गलपरम्पराः प्रदिशसि । 'अप्रार्थितो न गोपायेत्' इति निषेधं माता त्वं न गणयसि । अनिष्टनिवृत्तिरुक्ता । इष्टप्राप्तिरुच्यते ॥

त्वत्प्रसादात् । त्वदनुग्रहात् ॥

त्वत्प्रसादात्संपद्यन्ते भवभयतमोभानवः । संसारभयरूपान्धतमसो निरासकाः सूर्या भवन्ति । तमीभास्वतस्त्वत्प्रसादादिति वा पाठः । संसाररजनीप्रभातं भवति त्वदनुग्रहेण । त्वदनुग्रहसङ्कल्पसूर्योदयः ॥

भगवति भावाः सर्वे हरौ भक्तिमुद्वेलयन्तः । वेदान्तज्ञानस्य, वेदान्तव्युत्पत्तेश्च पूर्णत्वात्सर्वमैन्द्रियकं ज्ञानं पर्यवसानभूमानं परमात्मानमनुभावयति । सर्वे भावाः पदार्थाः परमशरीरिणिमनुभावयित्वा तस्मिन्नुद्वेलां भक्तिमुत्पादयन्ति । भगवतीति संबोधनं वा । हरिविशेषणं वा ॥

भवभयतमोभानवः संपद्यन्ते । सर्वे पदार्थास्त्वत्कृपया संसारभयरूपतमोनिरासकसूर्याः संपद्यन्ते ॥ 'संसार एष भगवन्नपवर्ग एव' । तमः एव स्वनिरासकभानुर्भवति ॥

किं त्वामहमिह याचे । यद्यपि त्वत्पादभक्तेर्याचने न दोषः ; न तस्यावकाशोऽस्ति । याचनात्पूर्वमेव स्वयं त्वया वितीर्णत्वात् ॥

यतः शीतलोदारशीला । हरिरिति 'ताच्छील्ये णिनिः' इति शाब्दिकाः । दुःखहरणशील इति हरिशब्दार्थः । त्वं खलु शीतलोदारशीला । त्वद्वशत्वात्तु खलु हरिर्हारिर्भवति । 'आर्द्रां पुष्करिणीम्—' इति तद्विषये पठ्यते । उदारामिति च ॥

भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् । मङ्गलानामभ्यासो वीप्सा चात्र । भूयो भूयः स्वयं त्वं दिशसि । 'लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्' इति भूयो भूयो नतिः क्रियते पक्षुदेवेति वदतो रामस्य विषये । त्वं तु स्वयं भूयो भूयो मङ्गलानि वितरसि । मङ्गलानामिति बहुवचनेनाप्यपरितोषः । तेषां प्रबन्धाः परम्पराः प्रदिश्यन्ते । मङ्गलानि च महान्ति ;

न न्यूनानि । 'कृतस्वस्त्ययनं मात्रा—' 'चकार माता रामस्य मङ्गलानि मनस्विनी' इति मातृस्वभावः ॥

माता देवि त्वमसि भगवान्वासुदेवः पिता मे
जातः सोऽहं जननि युवयोरेकलक्ष्यं दयायाः
दत्तो युष्मत्परिजनतया देशिकैरप्यतस्त्वं
किं ते भूयः प्रियमिति किल स्मेरवक्त्रा विभासि ॥

मङ्गलपरम्परावितरणरूपमातृस्वभाव उक्तः । अतस्त्वं मातैवेति सहेतुकं निश्चीयते । याचे किं स्वामित्यहं त्वां वदामि । तव किं ते भूयः प्रियमिति स्मितेन पृच्छसीव । मातापितरौ युवां दम्पतीत्यवसीयते । स्तोत्रे परिसमाप्यमाने स्मितमुदेति मातुर्मुखे ॥

देवि! माता त्वमसि 'मातृदेवो भव' इति श्रुतिः । अदेव्यपि माता देवी भवति, मातृत्वात् । तव देवीत्वे कः संशयः? मातृभवनमतिदुष्करं सर्वं भवितुर्वासुदेवस्यापि । पिता भवेत्सः । न माता । त्वमेव माता ॥ 'वासुदेवः सर्वं' इत्युत्सर्गः । मातृभावनाशक्तिस्तदपवादः ॥

भगवान्वासुदेवः पिता मे । वासुदेवः सर्वम् । मातृ-

व्यतिरिक्तसर्वं सः । वासुदेवो मे पिता । 'त्वं माता सर्वलोकानां देवदेवो हरिः पिता' इतीन्द्रः ॥

जातः सोऽहं जननि! युवयोरेकलक्ष्यं दयायाः ।
योगिनां युवामेकलक्ष्यं समाधौ भवथः । अहं युवयोरेकलक्ष्यं भवामि । किमिदमाश्चर्यम्? कृते प्रतिक्रियते कृतज्ञाभ्याम् । मम त्वद्दयालक्ष्यीभवनेन त्वं जननी भवस्यहमपि जातो भवामि । जातेन पुत्रेण मया त्वं जननी भवसि ॥

दत्तो युष्मत्परिजनतया देशिकैरपि ;। मातापितरौ देवावुक्तौ । तद्दयाविषयत्वं चोक्तम्; तत्कृपाविषयत्वं चोच्यते । अतिक्रमोऽत्रानुस्मियते । आत्मापहाररूपचौर्यमपहृतस्वस्य स्वामिनो प्रत्यर्पणाभावे न निवर्तेत । प्रत्यर्पणं च घटकैराचार्यैः क्रियते । न चोरेणैवं । प्रत्यर्पणं च परिजनत्वेन । तद्दास्यमेव स्वरूपम् । 'तव परिजनभावं कामये' । देशिकैर्दत्तोऽयं देशिकः । एवं मम समस्तसौभाग्यपूर्तिः ॥

अतस्त्वम् । एवं सिद्धेषु सर्वेषु मनोरथेषु ॥

किं ते भूयः प्रियमिति । किं मया तव भूयो देयमवशिष्यत इति पृच्छन्ती ॥

किल । इव ॥

स्मेरवक्त्रा विभासि । स्मितेन विशेषतो भासि । श्रियोऽपि श्रीर्भवति स्मितेन । 'कां सोऽस्मिताम्—' इति स्मयमानत्वं श्रूयते । ईषदुद्गतहासवती ॥

कल्याणानामविकलनिधिः कापि कारुण्यसीमा
नित्यामोदा निगमवचसां मौलिमन्दारमाला ।
संपद्दिव्या मधुविजयिनः संनिधत्तां सदा मे
सैषा देवी सकलभुवनप्रार्थनाकामधेनुः ॥ २४ ॥

उपक्रमश्लोकाभिरूप उपसंहारश्लोकः । यत्प्रतिज्ञातमाद्यश्लोके तद्विस्तरेण निरूपयित्वेदानीं तस्यैव निगमनं क्रियते ॥

कल्याणानामविकलनिधिः । हिरण्यनिधितालियं वर्ण्यते भगवतः । कल्याणपदपरिग्रहे हिरण्यं मङ्गलमित्युभयमपि गृहीतं स्यात् । मङ्गलं मङ्गलानामित्युक्तमपि संगृह्यते । मङ्गलानां निधिभूतेयम् । अविकलनिधिरिति भगवतोऽपि वैलक्षण्यम् । अज्ञातनिग्रहेयं मङ्गलैकान्ता । पुरुषकारत्वरूपाकारोऽस्या अतिशयः ॥

कापि कारुण्यसीमा । कापीत्युभयत्रान्वेति । कारुण्यकाष्ठा ॥

नित्यामोदा । कारुण्यकाम्रेत्युक्ते भृश दुःखितत्वशङ्का जायेत । तद्वार्थं ते नित्यामोदवत्त्वकथनेन । नित्यानन्दघनेयम् । 'नित्यानन्दा, सदानन्दा ।' नित्यामोदेति नित्यसौगन्ध्यवतीति वार्थः । तथा चोत्तरत्रान्वयो मालया । गन्धद्वारामिति सकलसौगन्ध्यस्येयमेव द्वारभूता मूलभूता माला ॥

निगमवचसां मौलिमन्दारमाला । 'पद्ममालिनी' हेममालिनी' इति निगमशिरसो मालात्वेन लक्ष्मीं बिभ्रति । निगमवचसां नित्यपरिमलवती मौलिमालेयम् ॥

संपद्दिव्या मधुविजयिनः । प्रथमश्लोकद्वितीयपादोक्तमत्रापि भण्यते उपसंहारे । मधुविजयिनो वेदसंप्रदायप्रवर्तकस्येयमेव संपत्; सर्वविद्यामयत्वात्; 'यज्ञविद्या, महाविद्या, आत्मविद्या' इति सर्वा विद्यारूपत्वमस्याः इत्युच्यते, इन्द्रेण ।

संनिधत्तां सदा मे । सदा मम पुरतो भवतु ॥

सैषा देवी संनिधानप्रार्थनाक्षणे संनिहिताऽग्रतो दृश्यते देवी । सैषेति निर्देशार्हा भवति ॥

सकलभुवनप्रार्थनाकामधेनुः । 'प्रत्यक्षानुश्रविकमहिमप्रार्थिनीनां प्रजानां श्रेयोमूर्तिम्' इत्युक्तस्य पुनः कीर्तनम् ।

'यथा तरुणवत्सा धेनुर्वत्सम—' इति श्रुतिः । भगवद्विषये तदुपचारमात्रं भवेत्; स्त्रीत्वाभावात् । इयं न केवलं धेनुः, किं तु कामधेनुः ॥

उपचितगुरुभक्तेरुत्थितं वेंकटेशा-
त्कालिकलुषनिवृत्त्यै कल्पमानं प्रजानाम् ।
सरसिजनिलयायाः स्तोत्रमेतत्पठन्तः
सकलकुशलसीमा सार्वभौमा भवन्ति ॥ २५ ॥

उपचितगुरुभक्तेः । गुरुषु निरवधिकभक्तिं विना श्रीतत्त्वविषयसूक्ष्मार्था दुर्ग्रहाः । 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इत्युक्ता गुरुविषयपरभक्तिर्गृह्यते उपचितगुरुभक्तेरिति ॥

वेङ्कटेशादुत्थितम् । 'स्तुतिरियमिन्द्रमुखोद्गता' इतीन्द्रस्तुतिवर्णनं पराशरेण । अत्रोत्थितमिति । इन्द्रस्य मुखादुद्गता स्तुतिः । गुरुमुखादुत्थितेयं स्तुतिस्तद्विषयपरभक्तेरुत्थितत्वादिति व्यज्यत इव ॥

प्रजानां कलिकलुषनिवृत्त्यै कल्पमानम् । प्रजानामितिपुनः पुनः स्तुतौ फलश्रुतौ च पठ्यते । प्रजानामिति

प्रथमश्लोके उपक्रमः तथैवोपसंह्रियते । सर्वपापापनोदनं मातुरनुग्रहेणैव सिद्ध्येत् ॥

सरसिजनिलयाया एतत्स्तोत्रम् । 'पद्मालयां पद्मकरां पद्मपत्रनिभेक्षणाम् । वन्दे पद्ममुखीं देवीं पद्मनाभप्रियामहम् ॥' इतीन्द्रस्तुतौ । पद्मालयामित्युक्तस्य ग्रहणं सरसिजनिलयाया इति ॥

पठन्तः सकलकुशलसीमासार्वभौमा भवन्ति । पठन्तो भवन्ति । 'इति सकलविभूत्यवाप्तिहेतुः स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्मीः । अनुदिनमिह पठ्यते नृभिर्यैर्वसति न तेषु कदाचिदप्यलक्ष्मीः ॥' इतीन्द्रस्तुतिपठनफलकथनं पराशरेण । सकलविभूत्यवाप्तिहेतुरित्युक्तस्यात्र कथनम् । सकलेति तच्छ्लोकप्रत्यभिज्ञापनम् । सकलकुशलसीमासार्वभौमेति बहुविधानन्दानुभवयुक्तभूमिषु रममाणत्वमप्युच्यते । सार्वभौमशब्दो योगशास्त्रे प्रसिद्धः । 'सार्वभौमे निरोधे—' इति हंससंदेशे । 'यमिनामेकलक्ष्यं समाधौ—' 'योगारम्भत्वरितमनसः—' इति योगप्रस्तावः कृतः । न हि ब्रह्मानन्दव्याप्तभूमिप्राप्तेः परं कुशलमस्ति । समाधिः कुशलसीमा । सार्वभौमत्वेऽभिषिच्यन्ते

पठितारः । एवं माता प्रजा अभिषेचयेत् । न हि लक्ष्मीस्तोतारः सार्वभौमादवरा भवेयुः । माता प्रीयताम् । तस्याः प्रसादे सर्वमङ्गलावाप्तिर्नियता ॥

यत्स्तुत्या स्तव्यताप्राप्त्या तद्व्याख्याया न गर्हिता ।
इत्युत्सर्गस्यापवादो व्याख्यया गर्ह्ययानया ॥

इत्थं गोपालदासेन वात्स्यवेङ्कटसूनुना ।
रचितं निगमान्तार्यस्तोत्रव्याख्यानमादरात्

समाप्तोऽयं ग्रन्थः ॥

श्रीरस्तु ॥

STOTRAS OF SRI VEDANTA DESIKA

BHAGAVAT - - DHYANASOPANA

WITH A COMMENTARY

BY

A. V. GOPALACHARIAR M.A., B.L.

SRIRANGAM

SRI VANI VILAS PRESS

1927.

॥ भगवद्ध्यानसोपानम् ॥

भागवताङ्घ्रिरेणुना
अन्विल् वेङ्कटगोपालदासेन विरचितया
व्याख्यया सहितम् ।

श्रीरङ्गस्थ
श्रीवाणीविलासमुद्रायन्त्रालये
संमुद्रितम् ।
१९२७.

॥ श्रीः ॥

॥ श्रीमद्वेदान्तदेशिकस्तोत्राणि ॥

भगवद्ध्यानसोपानव्याख्या ।

श्रीनिवासं परं ब्रह्म तन्नाम्नश्च गुरूत्तमान् ।
वन्दे भागवतान्सर्वान्देशिकाशयलब्धये ॥

व्यङ्ग्यप्रधाना गम्भीरा निगमान्तगुरोर्गिरः ।
दर्शयन्तु प्रसादेन कृत्स्नं स्वं भावमञ्जसा ॥

श्रीमदाचार्यस्तोत्राणि व्याख्यातपूर्वाणि प्रौढैर्विद्वद्भिः । पूर्वव्याख्यानानि सर्वाणि सादरं सबहुमानं कार्त्स्न्येन उपादेयानि । तत्र ये भावाः प्रतिपादिताः यानि च प्रमाणान्युदाहृतानि पुनरुक्तिभयाद्विस्तरभयाच्च न तेषामत्र पुनर्लेखनम् । यद्यत्र विज्ञा-

ख्यमानेषु भावेषु सन्ति कियन्तोऽपि ग्राह्यांशाः पूर्वव्याख्याभिरागमन्यायेन समुच्चेतव्या इति सविनयमभ्यर्थ्यते ।

भगवद्ध्यानसोपानमित्यस्य स्तोत्रस्य कविभिः कृता संज्ञा । प्रायेणान्येषां स्तोत्राणां तत्तद्विषयभूतार्चाविभवमूर्तीनां नाम्नैव संज्ञाः कृताः । मूर्तिविशेषविषयिण्या अस्याः स्तुतेः सामान्येन भगवच्छब्देन संज्ञाकरणं श्रीमद्रङ्गनाथे असाधारण्येन भगवच्छब्दव्यपदेश्यतां द्योतयतीति तन्मूर्त्यभिमानिभिर्वक्ष्येत । तथैव च दयाशतकमिति मूर्तिविशेषगुणविशेषविषयस्य स्तोत्रस्य मूर्तिमनिर्दिश्यैव गुणमात्रेण संज्ञाकरणं तन्मूर्तेरेवासाधारण्येन दयात्वं सूचयेत् । तथैव न्यासदशकम्, न्यासविंशतिरिति निर्विशेषा संज्ञा श्रीमत्प्रणतार्तिहरविषये । असाधारण्येन खलु व्यपदेशा भवन्ति ॥

"कारणं तु ध्येयः" इति श्रुतिः । प्रकृतिः कारणमित्यनर्थान्तरम् । ध्यानस्य कारणविषयत्वस्यौचित्यात्, अर्चासु प्रकृतिभूतमूर्तिविषये साङ्गध्याननिरूपणं न्याय्यमित्याचार्या अभिप्रयन्तीव । योगारोहपर्वक्रमप्रदर्शिकेयं स्तुतिः । यद्यपि 'अन्योन्तर आत्मा, अन्योन्तर आत्मा' इति भूषानिषिक्तद्रुतवाग्रवदन्तरन्तः कोशपरंपरानिरूपणे, अन्तरन्तरवतरणेनान्तरतमब्रह्मप्राप्तिः प्रदर्श्यते, अत्र प्रज्ञाप्रासादस्य योगभूमेरारोहो वर्ण्यते । योगारूढ इति भगवत्प्रयोगः । अत्राप्यारुरुक्षोरिति कविभिरारोहः प्रदिदर्शयिषित इति स्पष्टम् ।

'आरोहतु दुरारोहं समाधिगगनस्थलम्' इत्याचार्याः सङ्कल्पसूर्योदये । अक्लेशेन चारोहः सर्वैरीप्स्येत । अत्रापि तथैवेप्सा इति स्पष्टमुच्यते । यदि श्रीवेङ्कटनायको वा श्रीहस्त्यद्रिनाथो वा ध्यानारोहप्राप्यत्वेन वर्ण्येत, ध्रुवं तत्रारोहश्रम अधिकः स्यात् । तन्निवासभूतगिर्यारोहस्तत्राधिक एव । यद्यपि तन्मूर्तिद्वयमपि प्रकृतिभूतं गिर्यारोहश्रमलघूकरणार्थं रङ्गस्थाननिवासिविषयं ध्यानारोहप्रणयनमुचितमेव । श्रीभाष्यकारैर्गद्येषु श्रीरङ्गनाथविषयमात्रगद्यनिबन्धनमिति यत्, यच्चाचार्यैः प्रधानदिव्यक्षेत्रपरिगणने श्रीरङ्गस्यैव नियमेन प्रथमनिर्देशः क्रियते संकल्पसूर्योदयादिग्रन्थेषु, यच्च तद्विषयैव गाथा प्रथमं पठ्यते स्थानविशेषाधिकारनिगमने, न तावता कुत्राप्याद्यस्वयंव्यक्तमूर्तौ मनागपि वैषम्यमुद्भावयामः । इतरत्रारोहश्रमाधिक्येनैव योगालम्बनवरणमुपपादितं स्यात् । एतदेव 'सुलभमिह' इत्युपक्रमश्लोके आचार्यैर्व्यञ्ज्यत इव ।

'आरोहणार्थं नवयौवनेन कामस्य सोपानमिव प्रयुक्तम्' इति कुमारसंभवे यदुक्तं कविसार्वभौमैः श्रीगौरीविग्रहैकदेशभूतवलित्रयवर्णने, ध्यानसोपानमिति संज्ञाकरणे तदेव मूलं स्यादिति भाति । एतदपि भगवद्विषयकामस्य सोपानमेव । ध्यानं च निरन्तरोत्कटकाम एव । स च भावः प्रोषितप्राणनाथायाः पतिव्रतायाः कान्तविषयभावस्य परमसाम्यापन्न इति सर्ववेदान्तिसंप्रतिपन्नम् । तथा च श्रीमच्छंकराचार्याः—
'ध्यायति प्रोषितनाथा पतिमिति या निरन्तरस्मरणा पतिं प्रति

खोत्कण्ठा सैवमभिधीयते' इति आवृत्त्यधिकरणभाष्ये । यदि च परमहंसपरिव्राजकैरप्येवं तीव्रकामत्ववर्णनं भक्तेः, किमपरमपेक्ष्येतास्मिन्विषये प्रमाणतया । महायोगिनां श्रीशुकपराङ्कुशपरकालादीनामेवमेवानुभवोऽभूदिति सुप्रसिद्धमेव । 'अन्यत्र भीष्माद्गाङ्गेयादन्यत्र च हनूमतः' इति श्लोके, इन्द्रियनिग्रहे हनुमत्समत्वेन वा, अर्वाचीनत्वेऽपि तत्पूर्वपठितत्वेन ततोऽप्यधिकत्वेन वा परिगणितः कुरुवृद्धो भगवान्भीष्मस्त्रिभुवनकमनीयभगवद्विग्रहलावण्याकृष्टस्तत्र रतिमेव प्रार्थयते 'रतिरस्तु मेऽनवद्या' इति । भगवानाञ्जनेयोऽपि 'रामः कमलपत्राक्षः सर्वसत्त्वमनोहरः' इत्यादिना पुंसां दृष्टिचित्तापहारिभगवद्विग्रहलावण्यसागरे आत्मनो निमग्नतां ख्यापयति तत्पत्नीसंनिधौ । कामस्य सोपानमित्यत्र कामशब्देन मन्मथो वा मान्मथः शृङ्गारभावो वा अभिप्रेतः स्यात् । चरमोऽर्थ एव उचिततरः । तत्र विग्रहैकदेशस्य वलित्रयस्य चारुत्वात्सोपानत्वं रूपितम् । आचार्यैस्तु सर्वाङ्गसुन्दरस्य भगवतो विग्रहं कृत्स्नमपि ध्यानारोहसोपानत्वेन अतिसुन्दरं वर्ण्यते । भगवद्विग्रहविषययोगदृष्टिवैशद्यसाधने यथा भगवन्मूर्तिरेवाञ्जनं भवति, तथा तस्या एव तद्विषययोगारोहसोपानत्वरूपणं न्याय्यमेव स्यात् । अनन्यभावेनापादचूडमनुभूतस्य दिव्यविग्रहस्य दिव्यात्मस्वरूपसाक्षात्कारसमर्थदिव्यदृष्टिसाधकत्वं सर्वसंमतम् । प्रणिहितधियां योगारूढावस्थामारुरुक्षोः अत्रोपदिष्टक्रमेण तत्तदवयवसौन्दर्याद्यतिशयानुभवे

अतिशयेन रञ्जितं चित्तमैकाग्र्येण भगवति लग्नं स्यात्। अलौकिकाद्भुतसौन्दर्यानुभवेन स्वरसतो वस्तुन्यक्लेशेन चित्तलयः संपद्येत पटुप्रत्याहारप्रभृतिपुटपाकक्लेशायासं विना। अक्लेशेन खलु योगारोहः खिषाधयिषित इति स्पष्टं निगद्यते आचार्यैरन्त्यश्लोके। सौन्दर्यानुभवः, तद्द्वारा चित्तलयश्च, सुलभः सुभगश्चोपायो योगसिद्धौ। यथा भगवद्विषयगानरसानुभवस्तस्मिंश्चित्तलयस्य क्लेशरहितमार्ग इति 'वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः। तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति॥' इति श्लोकेन प्रदर्श्यते तद्वदेव सौन्दर्यानुभवद्वारो लयः सुलभः स्यात्। तत्र गानरञ्जितश्रोत्रद्वारा मनोलयः अत्र रञ्जितचक्षुर्द्वारा तल्लय इत्येव विशेषः। प्राकृतसुन्दरीविषयेऽपि खलु 'लीनेव प्रतिबिम्बितेव' इत्यादि बहु वर्णयन्ति। तत्र को वा क्लेशोऽनुभूयमानविषयैकीभावे। न केवलं क्लेशरहिता उपायदशा, परं तूपक्रमक्षणादतिशयितसुखरूपा। अत एव 'निदिध्यासितव्यः' इति सन्निशिष्टध्यानविधिप्रयोगः। वर्ण्यमानतत्तदवयवस्य लोकोत्तरसौन्दर्यं प्रतिश्लोकं चित्तरञ्जकतया प्राधान्येन यथानुभवं प्रदर्श्यते आचार्यैः। हंसजुष्टकनकसरित्सिकताप्रादुर्भूतत्वेनापूर्वपरिमलवत्त्वेन देवीकरसरसिजलालितत्वेन स्वच्छचित्तादर्शप्रतिफलितत्वेन पादाम्भोजवर्णनं, चारुवृत्तानुपूर्वत्वेन, कान्तिलीलाकलाचितत्वेन जानुच्छायाद्विगुणसुभगत्वेन जङ्घावर्णनम्, कामारामस्थिरकदलिकात्वेन कमलाभूमिनीलोपधानत्वेन लाव-

ण्यौघत्वेन च ऊरुवर्णनम्, रम्यावर्तद्युतित्वेन नाभिवर्णनम्, श्रीवत्सकौस्तुभालंकृतत्वेन श्रीपदन्यासधन्यत्वेन वक्षस्थलवर्णनम्, लीलोपहितत्वेनाजानुलम्बित्वेन बाहुद्वयवर्णनम्, साक्षिप्रायस्मितविकसितत्वेन चारुबिम्बाधरोष्ठत्वेन कान्तत्वेन कनकतिलकालंकृतत्वेन स्वागतोदारनेत्रत्वेन वक्त्रवर्णनम्, अन्तःस्थिरपरिमलवल्लभास्पर्शमान्यमाल्यैर्वासितत्वेन कुप्यच्चोलीवघनकुटिलत्वेन मौलिबन्धवर्णनं च, उपासकचित्तस्य बलात्सुखेन चाकर्षणे भगवद्विग्रहस्य सामर्थ्यं प्रदर्शयन्तीव । उपासकचित्तरञ्जकगम्भीरमधुरान्तरगुणगणवर्णनमप्यत्र भूयसा क्रियते चित्तलयाय ।

श्रीरङ्गनाथस्याष्टाङ्गयोगविषयत्वं सुतरां संगच्छेत । प्रणवजपेन तदर्थभावनेन चाक्लेशेन योगसिद्धिर्भवतीति भगवता पतञ्जलिना स्पष्टं सूत्र्यते । 'ईश्वरप्रणिधानाद्वा' 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः' 'तस्य वाचकः प्रणवः' 'तज्जपस्तदर्थभावनम्' 'समाधिसिद्धिरीश्वरप्रणिधानात्' इति खलु पारमर्षाणि सूत्राणि । 'तीव्रसंवेगानामासन्नः' इति सूत्रेण संपूर्णवैराग्याणां द्वेपीयसी योगसिद्धिरित्यभ्यधायि । वैराग्यवतोऽधिकारिणः उत्तरसूत्रेण मृदुतीव्रो मध्यतीव्र अधिमात्रतीव्र इति त्रेधा विभज्य तेषामुत्तरोत्तरं सिद्धिशैघ्र्यं च कथयित्वा, तदनन्तरं तीव्रवैराग्यसंपादनाशक्तानाम् 'ईश्वरप्रणिधानाद्वा' इति सुकरोपायमुपदिशति सूत्रकारः । 'किमेतस्मादेवासन्नतमः समाधिर्भवति । अथास्य लाभे भवत्यन्योऽपि कश्चिदुपायो न

वेति ' एतत्सूत्रमवतार्य, ' प्रणिधानाद्भक्तिविशेषादावर्जित ईश्वरस्तमनुगृह्णात्यभिध्यानमात्रेण । तदभिध्यानमात्रादपि योगिन आसन्नतमः समाधिलाभः समाधिफलं च भवतीति ' व्यासभाष्ये एतत्सूत्रं व्याख्यातम् । योगिनः प्रणवं जपतः प्रणवार्थं च भावयतश्चित्तमेकाग्रं संपद्यते । तथा चोक्तम् ' स्वाध्यायाद्योगमासीत योगात्स्वाध्यायमामनेत् । स्वाध्याययोगसंपत्त्या परमात्मा प्रकाशते ॥ ' इति । स्वाध्यायशब्दः प्रणवपरत्वेन व्याख्यातः । श्रीरङ्गविमानस्य प्रणवाकारत्वं प्रणवतुल्यत्वं च सुप्रसिद्धम् । वाच्यस्य वाचकान्तस्थत्वं बहुलं व्यवह्रियते । श्रीरङ्गान्तस्थभगवान्प्रणवान्तस्थ एव । तथैव स्पष्टं निगद्यते आचार्यैस्तद्विषयद्राविडगाथायाम् । योगमारुरुक्षूणां प्रणवान्तस्थेश्वरभावनं खल्वासन्नतमोपायत्वेन सूत्रितम् । श्रीरङ्गविमानान्तस्थमूर्तिविषयकप्रणिधानं प्रणवान्तस्थेश्वरप्रणिधानाभिन्नत्वाद्योगं काङ्क्षमाणानां यमिनां सुलभोपायत्वेनोपादेयतमं भवति । अत एव ' अन्तर्ज्योतिः किमपि यमिनाम् ' ' दृश्यते रङ्गमध्ये ' इत्युपक्रम्यते । यद्यमिभिर्हृदयेऽन्विष्यते, अपरोक्षीक्रियते च तदेव प्रणवभूतरङ्गमध्ये दृश्यत इत्युभयोरभेदः प्रतिज्ञायते । श्रीरङ्गनाथविषये न हार्दार्चयोर्भेद इति व्यज्यते । ' योगिनां हृदये हरिः ' ' प्रतिमास्वप्रबुद्धानाम् ' इति भेदो नात्र । यदेव योगिनां हृदये दृश्यते प्रणवजपेन तदन्तस्थभावनेन च तदेव घनीभूतकरुणारसौघभरितत्वादवतीर्णं योग्ययोगिसाधारण्येन रङ्गान्तर्दृश्यते । इदमेवायोगिनामपि दृश्यत्वम् 'यमिनामन्तर्ज्यो-

विर्नः सुलभम्' इति नः-शब्देन व्यज्यते। उपसंहारे च 'मध्ये रङ्गं मम च हृदये वर्तते सावरोधः' इत्येतदेव विग्रहद्वयैक्यं ध्यानफलतयानुभूयते। उपक्रमे योगिहृदयान्तर्ज्योतिरुद्दिश्य तस्य रङ्गमध्यदृश्यत्वविधानम्। उपसंहारे तु प्रथमं रङ्गमध्ये दृष्टस्य ज्योतिषः पश्चात्तद्विषयभावनया प्रणिहितधीत्वावस्थामारूढेनारोहसमकालमेव हृदयसाक्षात्कृतत्वेन बोधनम्। अत एवोपसंहारे 'मध्ये रङ्गम्' इति प्रथमं निर्दिश्यानन्तरं 'मम च हृदये वर्तते' इत्यभिधीयते। प्रणवान्तस्थत्वं च एतन्मूर्तेर्योगालम्बनत्वेन वरणे निमित्तम्॥

योगाङ्गसमसंख्याकैरष्टभिः श्लोकैर्योगसोपानपर्वभूतभगवदवयववर्णनं क्रियते। तत्तच्छ्लोके यथासंख्यं यथासंभवं तत्तद्योगाङ्गव्यञ्जकत्वं तत्र तत्र प्रदर्शयिष्यते। मौलिबन्धवर्णनश्लोके 'स्थितिमधिगता वृत्तयश्चेतसो मे' इति चित्तवृत्तिनिरोधलक्षणसमाधेः स्पष्टं संग्रह इति रसिकमनःसाक्षिकमेव स्यात्। 'प्रणिहितधियाम्' इति च सौत्रप्रणिधानं प्रत्यभिज्ञाप्यते।

उपनिषत्सु बहुश ओंकारालम्बनब्रह्मण उपासनं विधीयते। यथा प्रश्नोपनिषदि 'यः पुनरेतं त्रिमात्रेण ओमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत... स... परात्परं पुरिशयं पुरुषमीक्षते' इति। मुण्डके च 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते।' इति। यदि प्रणवरूपधनुष्येव लक्ष्यमन्तर्गतं

स्याद्यथा श्रीरङ्गे, शरप्रक्षेपरूपप्रयासोऽपि न स्यात्करधृतधनुर्गतत्वाल्लक्ष्यरूपफलस्य । माण्डूक्यं च 'ओमित्येतदक्षरमिदं सर्वं तस्य उपव्याख्यानम्' इत्युपक्रम्य 'एवमोंकार आत्मैव' इत्युपसंह्रियते । तच्च कृत्स्नमोंकारवर्णनपरमेव । तैत्तिरीये च ब्रह्मणः कोशोऽसि' इत्योंकारः परमात्मनो निधानस्थानत्वेन वर्ण्यते ।

अभिनवदशावतारभूता योगित्वेन प्रसिद्धाः श्रीशठकोपपरकालादयः सर्वेऽप्यमुमर्चामूर्तिं ध्येयत्वेनानुभवन्ति । तच्च सर्वयोग्यनुभूतत्वमन्यत्कारणं स्यात् । यदि भूयसामेव वलीयस्त्वम्, किं वाच्यं सर्वेषामैककण्ठ्ये ।

मुनिवाहन इति प्रसिद्धो योगी यद्यपि मध्ये मध्ये श्रीमद्वेङ्कटनायकमप्यनुभवति श्रीरङ्गनाथमेवार्चाभूमानमैकान्त्येन निश्चित्य भूमविद्योक्तानुभवप्रकारेण सर्वेतरविषयाद्रष्टृतां नयनयोः प्रतिजज्ञे । स च श्रीरङ्गनाथेन मदीय इति विशिष्याभ्यमानि । तस्य च नामकरणं कृतं तेन यथा आचार्याणाम् । तत्प्रणीतगाथानामेव व्याख्या कृता आचार्यैः । नामकर्तृत्वरूपपितृत्वरूपसंबन्ध उभयोः समः श्रीरङ्गनाथस्य । तद्गाथासंन्याप्याद्रियतेऽत्र भगवन्मूलविग्रहवर्णने ।

यद्यप्याचार्याः प्रपत्तिनिष्ठास्ते संपूर्णयोगानुभववन्त इति तद्ग्रन्थेभ्यः स्पष्टमवगम्यते । संकल्पसूर्योदये प्रथमाङ्के श्रीमन्नारायणे श्रुतीनां समन्वयः प्रदर्श्यते । द्वितीयाङ्के प्रथमोक्त-

समन्वयस्य बाधप्रतिरोधनिरसनं क्रियते। अनन्तरमष्टभिरङ्कैः साधनसाध्यनिरूपणम्। तत्राप्यष्टसंख्यैवादृता, योगसंख्यात्वात्। अत्यन्तवैपुल्येन भजनसुखमन्वभाव्याचार्यैरिति सुविशदमेव नवमदशमाङ्कपरिचयवतां रसिकानाम्। 'त्रिभुवनमिदं शान्तक्षोभं समाधिरनाकुला प्रसृमरसुधाधाराकारा प्रसीदति शेमुषी।' 'चिन्ता च द्रुतशर्कराप्रतिनिधिः शीताश्रुणी लोचने' 'स्वतः सिद्धस्वच्छस्थिरमधुरचिन्तासुरसरित्प्रवाहोपश्लिष्टात्प्रणिधिमुखभागादवतरन्। चिदानन्दोदन्वत्यनघगुणरत्नौघसुभगे निमज्जत्यन्यस्मिन्नयमपुनरुन्मज्जनमिह॥' इत्यादिभिर्भूयः स्वानुभव आवेद्यते। "तवाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभाः। मधुक्षीरन्यायस्वगुणविभवास्वञ्जनकनन्महानन्दब्रह्मानुभवपरीवाहा बहुविधाः।" इति खलु गुरुर्लक्ष्मणयोगी शिष्यं स्वात्मानमनुगृह्णाति द्वितीयाङ्के। 'परभक्तिपरज्ञानपरमभक्त्येकस्वभावं मां कुरु' इति खलु गद्ये प्रार्थना। 'भगवन्भक्तिमपि प्रयच्छ मे' इति अपि-शब्देन प्रपन्नत्वेऽपि भक्तिरपि याच्यते।

यद्यप्याचार्यैः समाधिजन्यानुभवस्य मुक्तानन्दादत्यन्तमवरत्वं वर्ण्यतेऽधिकरणसारावल्याम् 'प्रायः स्वस्मिन्स्वदेहिन्यनघगुणविधौ तद्विभूतिद्वये वा दृष्टं यत्स्यात्समाधौ भवति पृषतवत्तद्धि मुक्तानुभूतेः।' इति, यद्यपि पृथुगद्यभाष्ये 'परिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रियभगवदनुभवः' इत्यस्य व्याख्याने 'कंचित्कालं निरन्तरत्वेऽपि सारस्वतस्रोतो-

न्यायेन विच्छिन्नप्रवाहत्वम्, सामान्यतः सर्वविषयत्वे परोक्षरूपत्वम्, सावधिकरसत्वम, निःशेषनिवृत्तप्रतिबन्धापेक्षया' इत्यादिना न्यूनत्वं वर्णितम्, यद्यपि 'देहयोगाद्वा सोऽपि' इति सूत्रन्यायेन देहयोगनान्तरीयकतिरोधानेन कात्स्न्येन स्वरूपाभिव्यक्तिरूपमोक्षानन्दः शरीरमोक्षात्प्राग्दुष्प्राप इत्येव युक्तियुक्तम्, तथापि देहवद्भिरनुभूयमानेष्वानन्देषु समाध्यनुभूयमानभगवद्योगानन्दोऽत्यन्तविपुलो निःसमाभ्यधिकश्चेत्यभिप्रेत्य 'कश्चित्समाधिकदरिद्रः समाधिराधातव्यः,' 'भजनसुखमत्यन्तविपुलम्' 'स्वफलेन तुलारूढः समाधिर्मुक्तिसाधकः । न्यूनाधिकसमत्वेषु विकल्पायैव कल्पते ॥' 'फलार्थं तत्किं वा फलमिति वितर्कः श्रमफलः ।' 'मुनिर्मुक्तिद्वारं मुरमथनधीसंतविसुधानिधिप्रादुर्भावं भजति पुरुषः सत्त्वमनघम् ।' 'द्रवप्रवरशर्कराभरितदुग्धधाराकृतिः प्रतिक्षणविकल्पनाकलहलङ्घिनी वर्तते ।' इत्यादिभिराचार्यैः समाधिजानुभवस्य निरतिशयसुखत्वं वर्ण्यते । देहवतां यो निरतिशयानन्दः स योगसाध्य इति तात्पर्यम् ॥

अस्मदादिप्रत्यक्षं द्वेधा विभज्यते न्यायपरिशुद्धौ योगिप्रत्यक्षमयोगिप्रत्यक्षं चेति । 'योगिप्रत्यक्षं प्रकृष्टादृष्टविशेषजम्, दिव्यं प्रमाणमिति व्यवह्रियते पूर्वाचार्यैः, तच्चादिव्येन्द्रियानपेक्षम्, 'दिव्यं ददामि ते चक्षुः' इति भगवदनुगृहीतदिव्यचक्षुरपेक्षम्, न भावनाबलमात्रजम्,' इति च तत्रोक्तम् । 'अस्ति च योगिप्रत्यक्षमदृष्टविशेषसहकृतान्तःकरण-

जन्यमागमाधिगम्यमास्तिकानाम् । श्रूयते हि रामायणे 'तत्सर्वं धर्मवीर्येण यथावत्संप्रपश्यसि' इति । 'योगिप्रत्यक्षं फलमात्रमित्यस्मन्मतम्' इति च शतदूषण्यामुक्तमाचार्यैः । सर्वथा योगिप्रत्यक्षमभिमतमेवास्माकम् ।

वैश्वानरविद्यायां विश्वस्यापि प्रपञ्चस्य भुवनान्तर्यामिणो ब्रह्मणो विग्रहत्वेनोपवर्णनं कृतम् । तत्र स्वर्लोकादित्यवाताम्बरसलिलमहीरूपाः विश्वैकदेशा यथासंख्यं ब्रह्मणो मूर्धचक्षुःप्राणसंदेहवस्तिपादत्वेन कल्पिताः । एकैकावयवमात्रोपासने उपासकस्य तत्तत्स्वावयवहानिरूपानर्थ आपद्येतेत्युच्यते । सर्वविशिष्टोपासनेनैव फलप्राप्तिरित्यप्युच्यते । तत्क्रतुन्यायमप्युल्लङ्घ्य योऽवयव उपासनगोचरस्तस्यैवोपासकशरीरे विनाभाव आपाद्यते, उपासनस्याकृत्स्नत्वादुपासनस्वरूपस्यैवासिद्धेः, शास्त्रीयाविकलोपासनविषयत्वाच्च न्यायस्य ।

'यद्यत्पश्यामि ते गात्रं पूर्णेन्दुसदृशानने । तत्र तत्रैव सुश्रोणि चक्षुर्मम निबध्यते ॥' इति परमकामुकेन विंशतिचक्षुष्मता दशमुखेन प्रदर्शितरीत्यालोकातिशायिसौन्दर्यवत्त्वाद्दिव्यविग्रहस्य एकैकस्मिन्नेवावयवे पर्यवसितत्वमवयवान्तरभावनासामर्थ्यं च भावनाया नियतमापतेत् । तत्कथं संपूर्णविग्रहभावना संपद्येत । आपीठान्मौलिपर्यन्तं पुरुषोत्तमं पश्यतः खलु कुवासनादिनिरासः संभवेत् । अत्र रसिकसार्वभौमैः श्रीपराशरभट्टार्यैश्चतुर उपायः प्रदर्शितो भगवतो रङ्गनाथस्य

प्रत्यङ्गपूर्णसुषमासुभगवपुषः कार्त्स्न्येनानुभवे । "एकैकस्मिन्परमवयवेऽनन्तसौन्दर्यमग्नं सर्वं द्रक्ष्ये कथमिति मुधा मा मथा मन्दचक्षुः । त्वां सौभ्रात्रव्यतिकरकरं रङ्गराजाङ्ककानां तल्लावण्यं परिणमयिता विश्वपारीणवृत्तिम् ॥' इति । स एवोपायश्चारु प्रदर्श्यते आचार्यैरस्मिन्ध्यानस्तोत्रे । पर्वक्रमेण पूर्वपूर्वावयवानुभवकाल एवोत्तरावयवस्यानुभवगोचरता प्रत्यवयवं वर्ण्यते । कटकरुचिभिरिति पादजङ्घासंधिशोभिकटककान्तिभिः पादानुभवकाल एव जङ्घा ईषदनुभवगोचरा भवति, ततस्तद्दिदृक्षा जायते । एवं जानुच्छायाद्विगुणसुभगामित्यूरुजङ्घयोः संधिभूतजानुकान्त्यनुभववर्णनम्, न्यञ्चत्काञ्चीकिरणरुचिभिरित्यूर्वोरुपरि शोभमानकाञ्चीकिरणानुभववर्णनम्, मध्यं बाह्वोरिति वक्षःस्थलनिर्देशः, लीलोपहितमिति भुजवर्णनं च, उपर्युपर्यारुरुक्षासंभवसौकर्यं चारु समर्थयन्तीति रसिकैर्विभाव्यम् ।

सोपानक्लृप्तौ कोऽन्यो वेङ्कटेशात्कुशलतरः स्यात् । 'वेङ्कटेशेन क्लृप्तम्' इति निगमनश्लोके । 'वेङ्कटेशावतारोऽयम्' इति श्रीवेङ्कटेशो वा भवतु, बुधजनैरुपपत्तिभूम्ना उत्प्रेक्षितरीत्या पद्मापतेः परिचारविधौ प्रयुक्तघण्टाया अवतारो वा भवत्वाचार्यः । उभयथापि तस्य सोपानकल्पनकौशले न कोऽपि संशयीत । श्रीवेङ्कटाद्रिसोपानपङ्क्तेरपि गरीयसी सोपानपङ्क्तिः कुत्र वा दृश्येत । यदि वेङ्कटेशघण्टांश आचार्यः, नाद-

विषयेऽपि निरतिशयं कौशलं स्यात् । तच्च योगस्योपयुक्ततरम् । अनुभूयते च तत्कौशलं नादपद्धतौ ।

'कायवाग्बुद्धिविषया ये मलाः समवस्थिताः । चिकित्सालक्षणध्यानशास्त्रैस्तेषां विशुद्धयः ॥' इति वाक्यपदीये । शेषावतारभूतो महाभाष्यकर्ता भगवान्पतञ्जलिरेव योगसूत्रप्रणेता चिकित्साशास्त्रकर्ता चेति प्राचीननिबन्धनकाराणामभिप्रायः । 'मृदुं तृणमथक्षणं शिरसि यद्वहन्वक्ति तद्विवादविषये नृणां भवति साधु निर्णायकम् । भुवं सविपिनां सदा शिरसि संवहन्वक्त्यहो प्रभुः पवनपायिनां श्वसिति कः पुनः संशयः ॥' इत्यतिसुन्दरमुक्तं शेष एव योगप्रणेता इति । यदि शेषस्य वचन एव तादृशी श्रद्धा स्यात्, कीदृशी श्रद्धा स्यात्तस्य स्वात्मनो भगवत्पर्यङ्कीकरणरूपानुष्ठाने यथा श्रीरङ्गे पश्यामः । योगसूत्रप्रदर्शितसमाधेः श्रीरङ्गनाथो भूमिरिति स्वानुष्ठानेन प्रदर्शयति शास्त्रप्रणेता शेषः । यद्यपि शेष एव निवासस्थानं श्रीमद्वेङ्कटनायकस्यापि, तत्र गिरिमेव पश्यामः । तस्य शेषत्वम् 'विष्णोर्वासादवनिवहनाद्बद्धरत्नैः शिरोभिः' इत्यादिहेतुभिरुन्नेयं खलु ॥

सल्लयरूपसुषुप्तिः सन्निकृष्टा योगावस्थायाः । योगनिद्रया शयानो देवः उचितो विषयः स्याद्योगभावनायाः ।

अन्तर्ज्योतिः किमपि यमिनामञ्जनं योगदृष्टे-
श्चिन्तारत्नं सुलभमिह नः सिद्धिमोक्षानुरूपम् ।

दीनानाथव्यसनशमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुतिपरिषदां दृश्यते रङ्गमध्ये ॥

अन्तर्ज्योतिः किमपि यमिनाम् ।[1] 'अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयो वीतरागाः' 'हृद्यन्तर्ज्योतिः' 'भारूपः सर्वगन्धः सर्वरसः एष म आत्मान्तर्हृदये, 'इदं वाव तद्यदिदमन्तः पुरुषे ज्योतिः' इत्यादिश्रुतयः, 'अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते' आत्मारामाविहितरतयो निर्विकल्पे समाधौ सत्वोद्रेकाद्विघटिततमोग्रन्थयः सत्त्वनिष्ठाः । यं वीक्षन्ते कमपि तमसां ज्योतिषां वा परस्तात्तं मोहान्धः कथमयममुं वेत्तु देवं पुराणम् ॥' इत्यादिमहाकविवचांसि च प्रत्यभिज्ञाप्यन्ते ।

वाङ्मनसातीतं चक्षुराद्यगोचरं सर्वान्तरं योगिहृद्ध्यानगम्यं प्रत्यग्ज्योतिः भगवत्करुणापरिणामविशेषान्निखिलभूतनिशाम्यतया रङ्गमध्ये बहिर्दृश्यते । द्रष्टृ दृश्यते । दृक् दृश्यते । य आत्मा सर्वान्तरः स साक्षादपरोक्षाद्भवति । यत्तद्रेश्यमग्राह्यं तदेव वयं धीरा अधीराः सर्वेऽप्यत्र परिपश्यामः । 'सत्वोद्रेकसमप्रनन्दथुभुवः सालम्बनध्यानतः शुद्धे चेतसि यद्यपि प्रभुरिहादृश्यो दरीदृश्यते ।' इत्याचार्याः । प्रभूणां दृश्यत्वं दुर्लभमेव । अयं प्रभुः वस्तुस्वभावाददृश्यश्च । तथापि पौनःपुन्येन दृश्यते सालम्बनध्यानशुद्धयोगिचेतसि । योगेन भग-

वन्तमन्तर्हृदये साक्षात्कृतवन्तः श्रीरङ्गे तमेव बहिर्दृष्ट्वा विस्मिता भवन्ति । यज्ज्योतिः प्रणवान्तस्थत्वेन यमिभिरन्तर्हृदये ऽनुभूयते तदेवात्र प्रणवाभिन्नरङ्गमध्ये दृश्यते । तच्च ज्योतिः 'रमासखं किमपि महः ।' 'तत्कल्याणं किमपि यमिनां योगलक्ष्यं समाधौ पूर्णं तेजः स्फुरति भवतीपादलाक्षारसाङ्कम्' इति खलु यमिनामनुभवः । 'वर्तते सावरोधः' इति खल्वन्ते वक्ष्यते । तत्पतित्वेनैव खलु भगवत्तेजस अप्रमेयत्वं भवति । ज्योतिरनुभव एवानुस्यूतं परिवर्तते आचार्यबुद्धौ । ज्योतिरिति प्रथमपादे, रत्नमिति द्वितीये, दैवतं दैवतानामिति तृतीये, दिव्यं चक्षुरिति तुरीये । यथा श्रीमद्गकुलभूषणानां श्रीसुन्दरबाहुविषये । 'चयस्त्विषाम्' इतिवत्प्रथमं ज्योतिष अनिरूपणीयत्वेन सामान्यानुभवः । क्रमाच्छ्रीरङ्गनाथशुभविग्रहत्वेन बोधनम् । माघश्लोके 'सः' इति परामृष्टप्रसिद्धतत्पदार्थतेजसा भक्तनारदतेजोनुभवः, अत्र भक्तैर्भगवत्तेजोनुभवः, उभयत्रापि द्रष्टा दृष्टतेजसोऽप्रमेयत्वम्, अद्भुतत्वं चानुभूयते । यदिदमन्तःपुरुषे ज्योतिरिति कौक्षेयकज्योतिषोऽपि स्मरणं स्यात्, अन्तःशब्दसामर्थ्यात् । अस्य स्तोत्रस्य भोजनारम्भे पठनं वैश्वानरं ज्योतिः स्मारयतीति रसिकैर्विभाव्यम् । वैश्वानरस्मरणेन प्राणाग्निहोत्रत्वसंपादनरूपमदृष्टप्रयोजनं भोक्ष्यमाणस्यान्नस्य सुलभपचनं दृष्टप्रयोजनं च सिद्ध्येताम् । यमिनामन्तरिति तद्धृदयान्तस्तज्जप्यप्रणवान्तरिति च । किमपि । उपासितुः फलकाले हार्दज्योतिःप्रकाशे

जायमानेऽद्भुतरसावेशो निरतिशयोर्जितवेजोदर्शनाक्षमता च स्यातामेव। 'आश्चर्यवत्पश्यति कश्चिदेनम्' इति स्वस्वरूपदर्शनारम्भ एव विस्मयावह इति खलु सर्वाश्चर्यमयेन भगवता प्रदर्श्यते। 'श्रवणायापि बहुभिर्यो न लभ्यः, आश्चर्यो वक्ता आश्चर्यो लब्धा' इत्यादिकठश्रुतिरिममेवाश्चर्यत्वं प्रदर्शयति भगवद्विषये। ज्योतिषां ज्योतिः खलु ब्रह्मज्योतिः। 'फलपरिणतौ विस्मयमपि' इति प्रारम्भे विस्मयरसः। 'अद्यत्वे पुनरद्भुतप्रणयिनीदृष्टिस्त्वया पात्यतामन्तर्द्रष्टुमनन्यदृष्टमनघं त्यक्तावधिं शेवधिम्।' इत्यप्याश्चर्यरसो द्योत्यते। 'तादिदमहो तमेकमनुभूय रसातिशयात्स्वपिति मनो मदीयमवलिम्पति मुह्यति वा' इति च। एष एवाद्भुतरसावेशः पित्रोर्भगवद्दवतारक्षणे 'तमद्भुतं बालकम्' इत्यादिना दर्शितः। इदमित्थमिति परिच्छेद्यत्वं न्यूनत्वाभिप्रायकम्। अत एव नैवं नैवमिति 'नेति नेति' श्रुतिः। प्रकृतैतावत्सर्वसदृशत्वं प्रतिषिध्यते तच्छ्रुत्या। इदमित्थंत्वप्रसंख्यानपराङ्मुखं वस्तु खलु रङ्गदृश्यं भवति।

यमिनाम्, किमपि, अञ्जनं योगदृष्टेः— (१) दुर्दर्शस्य गूढमनुप्रविष्टस्य गुहाहितस्य गह्वरेष्ठस्य दर्शने किं वाञ्जनमन्तर्दृष्टिसामर्थ्यं दद्यात्तदेकं विहाय। केवलेन प्रवचनेन, केवलया मेधया, केवलेन बहुश्रुतेन न लभ्यं तद्दर्शनम्। यमेव प्रियतमं तद्वृणुते तस्यैव तत्स्वां तनुं विवृणीत। वरणमन्तरा न विवरणसंभव इति चारु निरूप्यते श्रुत्या। वरणाभावे कथं विवरणं साध्येत। भगवन्माया खलु महायवनिका तं तिरो-

धत्ते । तद्वशीकरणतत्प्रपदनं विना कथं तस्यास्तिरस्करिण्या अपसारणम् । तदनपसारणे कथं तद्दर्शनम् । २ प्रत्यक्षयोग्यस्यापि निधेरञ्जनं विना करणस्य न दर्शनसामर्थ्यम् । 'अदृश्यो न हि दृश्यते' इति वस्तुस्वभावादेवातीन्द्रियस्य तेजसः अघटितघटनासमर्थं लोकोत्तरमञ्जनं विना कथं दर्शनसंभवः । 'प्रजनयति समाधिं स्वात्मनैव' 'विभूषिताक्षाः । पश्यन्ति मायानिगूढमनपायमहानिधिं त्वाम्' इत्यादिना तद्दर्शने तस्यैवाञ्जनत्वमुपपाद्यते । गिरिप्रमाणं गिरिवद्धनीभूतं चाञ्जनमञ्जनाद्रौ निरवधिकदयया । ३ ज्योतिरित्युक्तम् । अञ्जनवर्णं खलु विग्रहं निभालयामहे । तिमिराकारस्य निरतिशयतेजस्त्ववर्णनं कथमभ्रान्तं भवेत् । अत्रोच्यते । अञ्जनं विम्बमिति यदुक्तं तत्तथैव । परं त्वतीन्द्रियवस्तुदर्शनसाधनं सिद्धाञ्जनमिदम् । अप्राकृतस्य भगवद्विग्रहस्याञ्जनवर्णत्वेऽपि ज्योतिष्ट्वं नापैति । 'तस्य यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपं यथाग्न्यर्चिः' इत्यादिश्रुत्या बहुरूपत्वं वर्ण्यते नेति नेति प्रकरणे । यथा नीलतोयदाभस्यापि चक्रवर्तितनूजस्य हेमसमानवर्णाननत्वं वर्ण्यते सुन्दरे सीतया, यथा तद्विषय एव 'शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा' इति प्राचेतसानुभवः, तथात्रापि सर्वाश्चर्यमये भगवद्विग्रहे नायं विरोधः शक्यशङ्कः । 'सत्त्वानीव विरुद्धजातिजनुषा सिद्धानि सिद्धाश्रमे वैरं यत्र मिथस्त्यजन्ति विषयः सर्वे निषेधैः सह' इत्युक्तरीत्या यथा सर्वकारणे सर्वकार्यात्मके भगवति सहजविरो-

धिनामविरोधेन समवायस्तथा भगवद्विग्रहेऽपि 'अणुर्बृहत्कृशः स्थूलः' इत्यादिविरोधसमाधिः । एकस्यैव भगवन्मूलरूपस्यानेकावताररूपत्वेन भासमानत्वमभ्युपगच्छन्त्यस्मत्संनिकृष्टाः श्रीमदानन्दतीर्थार्याः । ४ निरञ्जनत्वेन प्रसिद्धं ज्योतिरस्मदर्थमञ्जनं भवतीत्यघटितघटना द्योत्यते । अञ्जनविग्रहचक्षुःसंयोग एव निरञ्जनस्वरूपविषयसूक्ष्माग्र्यबुद्धिसाधकः ।

चिन्तारत्नम् । १ ज्योतिष्ट्वमेव पुनरनुभूयते । मध्योक्ताञ्जनत्वं पूर्वोक्तज्योतिषानन्तरोक्तरत्नज्योतिषा च संदष्टं ज्योतिष्येव पर्यवस्येत् । 'चिन्तामणिमिवोद्धान्तमुत्सङ्गेऽनन्तभोगिनः' इति श्रीमद्भट्टार्याणां विचित्रोऽनुभवः स्मार्यते । अञ्जनसहायेनापि स्वल्पायामपि चिन्तानुवृत्तावसमर्थानां सकृच्चिन्तनमात्रेण काङ्क्षितानुग्राहकम् । 'स्मृतो यच्छति शोभनम्' 'स्मृते सकलकल्याणभाजनम्', 'स्मरतः पादकमलमात्मानमपि यच्छति' इत्यादिप्रमाणान्यनुसंधेयानि । 'प्रणतजनचिन्तामणिगिरिः' इति न्यासतिलके । २ ज्योतिः प्रकरणाद्योगप्रकरणाच्च रत्नशब्दश्चिन्ताशब्दश्चात्र सुश्लिष्टौ । ३ मा भूच्चिन्तानुवृत्तिः, मा भूच्चाञ्जनाक्तेनान्तरावृत्तचक्षुषा प्रत्यग्ज्योतिर्दर्शनम्, दिदृक्षितं ज्योतिश्चिन्तामात्रेण सौलभ्याद्रत्नत्वेन भासेत, काङ्क्षितं सर्वं सद्यो दद्याच्च ।

सुलभमिह नः । [1]अयोगिनामप्यस्माकमिह हृदयाद्बहिरिदंत्वेन निर्देश्ये पुरोदेशे दृश्यम् । यमिनामिति स्थाने नः

इति प्रतिनिर्देशः । [2]तज्ज्योतिरस्माकं सुलभम् । वयं तु तस्य सुदुर्लभा इति व्यज्यते । 'स महात्मा सुदुर्लभः' इति खलु तस्याक्रन्दनम् । 'त्रिषु लोकेषु किंचन । नानवाप्तमवाप्तव्यम्' इति उच्चैर्येनोद्घोषितं तेनैव खलु तदपवादेनेदमुच्यते । अत्रापि 'प्रणयिनि जने दूरदत्ताभिमुख्यम्' इत्याचार्याः । [3]पूर्वोदाहृतयोगभाष्योक्तं सुलभतमोपायत्वमत्र सुलभशब्देन प्रत्यभिज्ञाप्यत इव, योगप्रकरणात् । [4]'न रत्नमन्विष्यति मृग्यते हि तत्' इति न्यायमुल्लङ्घ्यान्वेष्टव्यतया श्रुत्युपदिष्टं रत्नमेवास्माननिन्वष्यदत्र प्राप्तम् । [5]'अन्तर्यो मृग्यते स स्थिरभक्तियोगसुलभः' इति महाकविः । स्थिरभक्तियोगं विनैवान्वमृग्यतेजसोऽत्र सुलभसंदृश्यत्वम् ।

सिद्धिमोक्षानुरूपम् । [1]'योगप्रकरणे सिद्धिशब्दस्य मुख्यर्वाचीनाणिमादिसिद्धिविषया प्रसिद्धिर्ग्राह्या । 'ते समाधावुपसर्गा व्युत्थाने सिद्धयः' 'जन्मौषधि मन्त्रतपः समाधिजाः सिद्धयः' इत्यादियोगसूत्रेषु तथैव प्रयोगो दृश्यते । [2]'यत्साध्यते तत्सिद्धिरिति यौगिकार्थाश्रयणेऽपि तदर्थपौष्कल्यवतीषु साध्यैकान्तासु तादृशसिद्धिष्वेव सामान्यतः पर्यवस्येत्, न सिद्धसाध्योभयाकारवन्तं मोक्षं गृह्णीयात् । [3]योगशास्त्रे सिद्धिः कैवल्यं चेति पृथगेव वर्णनं भवत्युभयोः फलयोः । [4] ज्योतिरनुभवप्रकरणे रूपपदघटितानुरूपशब्दप्रयोगः स्वनुरूपः ।

दीनानाथव्यसनशमनम् । १ इष्टप्राप्तिरुक्ता, आर्तना-

मार्तिनिवृत्तिरुच्यते । २ व्यसनमिति विषयेषु सक्तता । सा च योगस्यात्यन्तपरिपन्थिनी । परमानन्दघनभगवत्संस्पर्शजन्यसुखेन विषयाशा सुलभं निवर्तेत । अशक्तानामनाथानां विषयसंगनिरासकम् । ३ तेषामेव योगासिद्धिजन्यदुःखनिवर्तकं च । दीर्घकालादरनैरन्तर्यासेवनेन बहुतरक्लेशसाध्यो योगः कथं साध्येतेति शोचतां तद्दिव्यविग्रहदर्शनेन तदालम्बनध्यानसौकर्यापादनेन क्लेशमयदुःखादिव्यसनशमनम् । ४ सर्वदुःखशमनं वा ॥

दैवतं दैवतानाम् । १ सर्वाधिकदेवतात्वाभावे न सर्वदुःखभयनिवर्तकत्वसिद्धिः । 'ब्रह्मा स्वयंभूश्चतुराननो वा' इति श्लोकेन दाशरथेरतिलङ्घितद्रुहिणशंभुशक्रत्वमुक्तम् । तस्यापि दैवतं खलु रङ्गमध्यं तेजः । यो जगदेकवीरः, यं सर्वे वीरा नेमुः, यश्च केनाप्यपराजितः, केनापि न नमितः, यश्चावतारान्तरदशायां स्वेनैव 'रामः शस्त्रभृतामहम्' इति सर्वोत्कृष्टधन्वित्वेन गीयते, सोऽपि इदं महो ननाम सह पत्न्या विशालाक्ष्या, जितस्तत्तेजोलावण्यादिभिः । ब्रह्मादीनां तदुपरिभूतरामस्यापि दैवतम् । २ किमेकं दैवतमिति युधिष्ठिरेण सामान्येन पृष्टे 'दैवतं दैवतानाम्' इति भगवद्विषयनिर्धारणस्य भीष्मोत्कृष्टमतत्वात्तस्यैव सर्वोत्कृष्टदैवतत्वम् । भीष्मवचनं प्रत्यभिज्ञाप्यत इव । वक्ष्यमाणश्वेताश्वतरस्थस्य 'दैवतानां परमं च दैवतम्' इति खण्डस्य भीष्मवचनमर्थनिर्णायकमिति भावः । 'स्मर्यमाणमनुमानं स्यादिति' इति वैश्वानराधिकरणसूत्रन्यायो

ऽत्र द्रष्टव्यः । भीष्मेण दैवतं दैवतानामिति स्मर्यमाणं श्रौत-वचनविवक्षितविशदीकरणं भवति । ३ योगसूत्रेषु ईश्वर-शब्द एव प्रयुज्यते । योगस्य संपूर्णोपपादनं श्वेताश्वतरोपनि-षद्येव श्रूयते । तदुपनिषद्वाक्यान्येव परामृश्यन्ते 'यत्रैकाग्रता तत्राविशेषात्' इति योगविषयकशारीरकसूत्रेणेति सर्वसंमतम् । तत्र च शिवो, महेश्वरो, रुद्र इत्यादीश्वरवाचकाः शब्दा एव श्रूयन्ते । 'विश्वाधिको रुद्रो महर्षिः' इत्युच्यते । 'तमीश्व-राणां परमं महेश्वरं तं दैवतानां परमं च दैवतम्' इति च । एवं योगध्येयत्वमीश्वरस्यैव श्रुतियोगसूत्रसिद्धमिति प्राप्ते दैवतं दैवतानामिति श्रुतिपदे उपादीयेते । यथा 'दैवतानां परमं दैवतम्' इत्येतावन्मात्रेण न देवताविशेषनिर्णयस्तथैव तत्पूर्व-खण्डेन 'तमीश्वराणां परमं महेश्वरम्' इत्यनेनापीति भावः । उभयत्रैकरूप्येणार्थवर्णने सापेक्षत्वान्न निरपेक्षसमुदायशक्तिरू-परूढिरिति भावः ।

दिव्यं चक्षुः श्रुतिपरिषदाम् । १ शिवरुद्रादिशब्दा न रङ्गनाथपरत्वेन नीता इति पुनराक्षेपे— प्रत्युच्यते सर्वश्रुतीना-मयमेव तात्पर्यभूमिरिति । 'मनोऽस्य दैवं चक्षुः' इति श्रुत्या 'दिव्यं चक्षुः' इति मन उच्यते । श्रुतिपरिषदां दैवतदैवतत्वेन मनोगतम् । एकदेशमात्रावलोकनापातप्रतीयमानो वेदार्थोऽन्यः, अन्यश्च कृत्स्नपरामर्शप्रतिपन्नोऽर्थ इति प्रसिद्धं खलु । शास्त्र-संशये शास्त्रविवादे च परिषद्भिरेव शास्त्रार्थनिर्णयः स्यात् । 'आम्नाय एव भगवानुपासनीयः, पौर्वापर्यपरामर्शादाम्नायो

यदक्षरा वदेत् । जगद्बीजं तदेवेष्टं चेतने च स आश्रयः', इति श्रीवाचस्पतिमिश्रा ईक्षत्यधिकरणे । श्रुतीरेव परिषद्रूपेण संकल्प्य ताः पृच्छामः । यत्र तासां मनस्तदेव वयमपि श्रद्धीमहि । मिलितानां तासां सर्वासामिदमेव मनः । यथा सर्वश्रुतीनां विभागकर्ता शारीरकप्रणेता पाराशर्यो महति सूरिसमाजे स्वभुजमपि चोद्धरन् 'सत्यं सत्यं पुनः सत्यं, न दैवं केशवात्परम्' इति त्रिः शपथयति, तथैव तद्विभक्तास्तद्व्याख्याताः श्रुतयोऽपि परिषत्सु मिलितास्तद्वदेव भगवत्परत्वं शपथयेयुः । 'सर्ववचसामवसानसीमां तमेव सर्वकारणमुशन्त्यनपायवाचः ।' पण्डिताश्चेत्पारिषदास्ते पक्षपातिनः स्युरभिनिवेशवत्पुरुषत्वात् । मूलप्रमाणभूताः पुरुषत्वतत्प्रयुक्ताभिनिवेशरहिताः श्रुतीरेव पृच्छामः । तासामेव स्वनाथविषयनिष्कृष्टविशेषज्ञानसंभवः । पतिदेवतानां श्रुतीनां कथं स्वपतिविषयसंशयः । 'निःसाधारण्यनारायणपदविषये सर्वाः श्रुतयो निश्चयं यान्त्यबाधे । सर्ववेदप्रपठनमहितं पुंसूक्तं यत्परत्वैकतानं तस्यैव श्रीपतित्वं वदत्युत्तरानुवाकः ।' पुंसूक्तस्य भगवत्परत्वमभ्युपगम्यते श्रीमता कालिदासेन । पुरुषोत्तमशब्दस्य तस्मिन्नैकान्त्यं च तेन स्पष्टमुच्यते । अत एव 'पुरुषोत्तमः कः' इति । 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' इति वदन्तं युष्मत्पक्षपातिनं महाकविं पृच्छेत्यर्थः । 'स्मृतः' इति गीतावचनस्मरणम् । यद्येकवारं मिलितश्रुतिपरिषन्निर्णये न प्रत्ययः, ताः पुनः पुनः मेलयित्वा पृच्छ । सहस्रकृत्वः पृष्टा अपि तास्तदेव ब्रूयुः ।

पुनः पुनरालोच्यापि न प्रथमनिर्णयविरुद्धं कदापि ब्रूयुः । परिषच्छब्देन बहुवचनेन च एते भावा व्यज्यन्त इति भाति । यदि कपिञ्जलाधिकरणन्यायेन बहुवचनस्य त्रित्वपरिश्रान्तिस्ति-ष्ठ एव परिषदः । ता अपि त्रिः शपथयेयुर्न दैवं केशवात्परम्' इति तद्विभक्तृवत् । २ यदुक्तं योगसूत्रेषु ईश्वरनाम्न एव ग्रहणमिति, तदपि नास्मत्पक्षविरुद्धम् । योगसूत्रव्याख्यातारः सर्वेऽपि 'यथाभिमतध्यानाद्वा' इति सूत्रव्याख्याने शिवं विष्णुं वा ध्यायेदिति वदन्ति, नेश्वरध्यानं निर्बध्नन्ति । 'यदेवा-भिमतं हरिहरमूर्त्यादि तदेव ध्यायेत्' इति शेखरकर्तारो ना-गेशभट्टाः । उदाहरन्ति च ते साङ्ख्ययोगसंप्रदायपूर्वाचार्यवचनं 'उक्तं च पञ्चशिखाचार्यैरादिविद्वान्स्वयंभूर्भगवान्विष्णुर्योग-बलेन स्वनिर्मितं चित्तं प्रविश्य कपिलाख्यपरमर्षिर्भूत्वा कारु-ण्याज्जिज्ञासमानायासुरये साङ्ख्यसूत्राख्यं तन्त्रं प्रोवाचेति' इति । पञ्चशिखश्च तत्संप्रदायप्राचीनाचार्य इति सुप्रसिद्धम् । य ईश्वरः प्रोच्यते योगसूत्रे 'पूर्वेषामपि गुरुः कालानवच्छे-दात्' इति स एवादिगुरुरिति स्पष्टमुच्यते । स च भगवान्वि-ष्णुरिति कण्ठरवेणोच्यते पञ्चशिखाचार्यैः । तस्माद्योगसंप्रदा-यरीत्या स एवेश्वरशब्दाभिप्रेतः । स्वयंभूरित्युक्ते हिरण्यगर्भ-प्रतीतिः स्यादिति तद्व्यवच्छेदार्थं भगवान्विष्णुरित्युच्यते । ३ श्रुतयः परिषदि संघीभूताः पृष्टाः प्रतिब्रुवन्ति 'जनानां चक्षु-रिव प्रसिद्धा वयं लोके वेदे च । अस्माकं तु भगवानेव चक्षुः । तं विना वयमक्षिहीना अन्धा एव । प्रमातृचक्षुर्भूता-

नामस्माकमेव यद्यान्ध्यं भवेदन्धेन नीयमाना अन्धा इव प्रमातारो विपद्येरन्निति । श्रुतयोऽमुमेव दिव्यं चक्षुरित्याद्रियन्ते । ४ प्रमाणान्तराप्राप्ताल्लौकिकातीन्द्रियविषय एव वयं श्रुतिं प्रमाणीकुर्मः । तथा च श्रुतिरस्माकमलौकिकं दिव्यं चक्षुः । भगवांस्तु अस्मद्दिव्यचक्षुर्भूतानां श्रुतीनां दिव्यं चक्षुः । चक्षुषश्चक्षुः खलु भगवान् । ५ श्रवणं मननं निदिध्यासनमिति प्रसिद्धं साधनत्रिकमध्यात्मशास्त्रे । तैश्च ब्रह्मापरोक्ष्यं साध्यं स्यात् । श्रुतिर्नाम श्रवणम् । श्रुतिमतिध्यानानि श्रुतिपरिषच्छब्देन गृह्यन्ते । श्रुत्यादित्रयाणामित्यर्थः । तेषां दिव्यचाक्षुषत्वरूपफलपरिणतिभूतमित्यर्थः । यच्छ्रुत्यन्तेषु श्रुतम्, यच्छ्रीभाष्ये मतम्, यद्धृदम्बुजे ध्यातम्, तदेव श्रीरङ्गधामनि चक्षुर्विषयं दृष्टं भवति । चक्षुरिति चाक्षुषम् । 'श्रुत्यन्तरेषु श्रुतं भाष्ये मतं ध्यातं हृदम्बुजे । लक्ष्मीधरं प्रपद्येऽहं दृष्टं श्रीरङ्गधामनि ॥' इति श्लोकानुसारेणात्र वर्णनं क्रियत इति रसिकसंमतं स्यात् । ६ श्रुतिपरिषदां सकलश्रावणज्ञानानाम् । ब्रह्मविषयसकलश्रावणज्ञानानां श्रीरङ्गनाथोऽपरोक्षताभूमिः । अपरोक्षावगतिपर्यन्तं ज्ञानमेव मुमुक्षुभिरीप्स्यते । 'चक्षुर्वै सत्यम्' इति श्रुतिश्चाक्षुषज्ञानस्य विशदतमत्वं संशयरहितत्वं सुनिश्चितार्थत्वं ज्ञानकाष्ठात्वं च बोधयति । यद्यपि चक्षुःशब्दे लक्षणाश्रयणम्, फलमुखं गौरवं नात्यन्तं दोषायेति लक्षणा सह्या । दिव्यं चक्षुरिति तन्मात्रादिसूक्ष्मप्राकृततत्त्वसाक्षात्करणसमर्थस्य योगसंपाद्यस्य लोकातीतचक्षुषः पारिभाषिकं नाम

योगशास्त्रे । योगप्रकरणात्तस्यैव ग्रहणं स्यात् । तद्व्यवच्छेदार्थं श्रुतिपरिषदामित्युच्यते । न योगप्रसिद्धदिव्यचक्षुः, किन्त्वौपनिषददिव्यचक्षुः ।

दृश्यते । १ आन्तरं प्रत्यग्ज्योतिर्बहिर्दृश्यते निरतिशयदयया । 'य एषोन्तरक्षिणि पुरुषो दृश्यते' इत्यादाविव न योगिप्रसिद्धया दृश्यत इत्युक्तिः । किं तु योग्ययोगिसाधारण्येन सर्वदृश्यम् । प्रत्यक् प्रत्यक्षयितुं समर्था भगवद्दया वा तत्प्रवाहभूतशठरिपुभणितिर्वा । वकुलामोदवासितस्य तस्य सारस्वतस्रोतसस्तत्सामर्थ्यमस्तीति 'प्रत्यक्प्रत्यक्षयेन्नः' इति तद्विषयश्लोके आचार्यैरुच्यते । 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' इति श्रुतिः । अधीरैर्दीनानाथैरस्माभिरपि तद्दृश्यते । सूक्ष्मामग्र्यां बुद्धिं विना असूक्ष्मदर्शिभिरस्माभिर्दृश्यते । २ भावनाफलं तु दर्शनम् । सा च भावनानन्तरश्लोकमारभ्य खलु प्रवर्तयिष्यते । 'उदेति पूर्वं कुसुमं ततः फलं...तव प्रसादस्य पुरस्तु संपदः' इति न्यायेनोपायप्रारिप्साक्षण एव फलसंकीर्तनम्, चिन्तारत्नत्वान्निदिध्यासितस्य । ३ दर्शनरूपफलकामनायाः काम्यरूपोपायाधिकारान्तर्भूतत्वात्फलस्य पूर्वमेव संकीर्तनम् ॥

रङ्गमध्ये । १ नास्य रङ्गदर्शनस्य द्रविणव्ययाद्यपेक्षा । सर्वदृश्यहरिश्चन्द्रनाटकवीथीरङ्गवदिदमकिंचनसुलभं रङ्गम् । २ रङ्गमध्येऽवश्यं ज्योतिरपेक्ष्येत । रङ्गमध्ये किमपि ज्योतिर्दृश्यते । ३ प्रणवमध्ये । 'तस्योंकारः स्मृतो नाम तेनाहूतः

प्रसीदति ' इति प्रमाणेनोंकारेणाह्वाने श्रेपीयसी दर्शनसिद्धिः । न प्रणवसमानं भगवत्तोषकरं स्तोत्रम् । प्रकर्षेण नूयतेऽनेनेति प्रणवः । ४ रङ्गस्य प्रणवस्य वाच्यापेक्षा, रङ्गिणो विमान-रूपनिवासापेक्षा वाचकापेक्षा च । तथाचोभयोः परस्परापे-क्षा । नित्यश्च वाच्यवाचकयोः संबन्ध इति नित्यवासः सिध्य-ति । ५ 'रंगशालायां मायायवनिकान्तस्थं ज्योतिस्तिरस्कारिणी-मपसार्य वहिर्नृत्तरङ्गे दृश्यते ।' अत्र पूर्वार्धे शेषिप्रतिपादनम्, उ त्तरार्धे शेषप्रतिपादनमित्यस्ति काचिद्विचित्रा व्याख्यानभङ्गी या श्रीमद्दीक्षितैः प्रदर्शितेति कदाचिद्वयमश्रौष्म । तेषामभिप्राय एवं स्यादित्युन्नीयते, दीनानाथ इति बृहन्मूषिकः यो गृहेषु प्रतिनिशं भूखननेन गृहिणां पीडामापादयति । मूषिकादय ईतिबाधासु परिगणिताः । दीनानाथकृतं दीनानाथरूपं वा व्यसनं तत्सहजशत्रुभिः सर्पैः शाम्यति । चक्षुःश्रुतिरिति प्रसिद्धं सर्पनाम । चक्षुःश्रुतिपरिषदां दिव्यं सर्पाणां मध्ये दिव्यसर्पः । ' अनन्तश्चास्मि नागानाम् ' इति गीता । ' तस्मै देवा बलिमावहन्ति ' इति तस्य दैवतानां दैवतत्वम् । दीनाना-थरूपव्यसननिरासकं देववृन्दप्रहितबलि दैवतदैवतभूतं दिव्य-सर्पभूतशेषज्योतिरपि दृश्यते । शेते भुजङ्गशयने स महाभुजङ्गः । एकादशश्लोके ' भुजगशयन ' इत्युच्यते । यदि शेषावतारः पत-ञ्जलिः योगप्रकरणे योगप्रवर्तकमहायोगिभूतशेषस्य प्रथमश्लोके विशिष्य वर्णनमत्यन्तमुचितं स्यात् । श्रीरङ्गे परस्य ब्रह्मणः शे-षित्वं स्फुटमीक्ष्यते शेषोपरिशयानत्वाद्भगवतः । उभयोः शेषशे-

षिणोर्दर्शनं विना कथं शेषित्वस्य स्फुटमीक्षणम् ।

वेलातीतश्रुतिपरिमलं वेधसां मौलिसेव्यं
प्रादुर्भूतं कनकसरितः सैकते हंसजुष्टे ।
लक्ष्मीभूम्योः करसरसिजैर्लालितं रङ्गभर्तुः
पादाम्भोजं प्रतिफलति मे भावनादीर्घिकायाम् ॥

योगसोपानमारभ्यते । शुभवासना संचेतव्या । अनादिकालसंचितदुर्वासना दूरतो निरसनीयाः । वासनारेणुभिरेव भगवद्योगोपरोधः । स्वर्गादिवासना अपि दुर्वासनात्वेन 'स्वर्वासदुर्वासना' इत्यादिना आचार्यैर्गण्यन्ते । अनादिकालसंचिता भूयस्यो निबिडा दुर्वासनाः निरतिशयपरिमलवद्वस्तुसंयोगरूपयोगेनैव निरसितुं शक्याः । निरतिशयसुगन्धिभगवत्पादाम्भोजं विना किं वा तादृशदुर्गन्धं क्षेप्तुं प्रभवेत् । घनीभूतदुर्वासनादूषिते मनसि तदेव संयग्योजयितव्यम् । तद्योगं विना न दुर्वासना विलयमीयुः । ता अदृष्टरूपाः धर्माधर्मत्वात् । अतिनिबिडापूर्वरूपो दुर्गन्धो यक्षानुरूपो बलिरिति न्यायेन प्रबलतमेनापूर्वेणैव गन्धेनापोह्येत । भगवद्दिव्यमङ्गलविग्रहस्य सर्वगन्ध इत्यपूर्वः कश्चिद्गन्धः प्रतिपाद्यतेऽपूर्वार्थबोधिन्या श्रुत्या । सर्वगन्ध इति सुगन्धा गृह्यन्ते । सर्वे सुगन्धास्तत्रान्तर्भवन्ति । सर्वे सुगन्धास्तस्य मात्रामुपजीवन्ति । नित्यश्च स गन्धः । यो गन्धो नित्यः सर्वश्च, स एवानादिसंचितं दुर्गन्धं जेतुं शक्नु-

यात् । अनिरस्तासु दुर्वासनासु कथं मनसः स्वच्छता, कथं च भगवत्पादाम्भोजस्य तत्र प्रतिफलनम् ।

वेलातीतश्रुतिपरिमलम् । १ वेलातीतं निरतिशयं यत्सर्वगन्धत्वेन श्रुतिबोध्यमपूर्वं परिमलं तद्विशिष्टं योगारोहप्रथमपर्वभूतं भगवत्पादाम्भोजम् । अयमर्थ आचार्यैरेव प्रदर्शितो यादवाभ्युदये 'अव्यासङ्गं जलधिशयनादुत्थिते शार्ङ्गपाणौ पत्युः पुण्यं प्रथमनयनस्पन्दनं प्राप्तुकामा । नित्यापूर्वश्रुतिपरिमलं न्यस्तलीलारविन्दा पादाम्भोजं सह वसुधया धारयामास धन्या ॥' इति श्लोके । भूयश्च साहश्यमुभयोः श्लोकयोः । २ वेलातीतश्रुतिः श्रीशठकोपमुनिदृष्टा त्रैवर्णिकत्वमर्यादामतीता सर्ववर्णार्हा । सैव संस्कृतश्रुतितोऽपि भगवत्पादाम्भोजमहिमानमैदम्पर्येण प्रकाशयति । आद्यगाथायामेव तत्प्रणामः स्वमानसं प्रति विधीयते गाथिना । तत्र च भगवान्विशेषणतयैव वर्ण्यते, तदुज्ज्वलचरणं च विशेष्यत्वेन । यद्यपि त्रिभिः पादैर्भगवद्वर्णनं क्रियते, विधेयप्रणत्यन्वयिपादाम्भोजोपसर्जनतयैव तत्क्रियत इति स्पष्टमेव । त्रैवर्णिकमात्राधिकारता त्रिवेद्याः प्रसिद्धा मर्यादा वेलाशब्देन गृह्यते । तामतिक्रान्ता आम्नायानां प्रकृतिरपरा शठजिद्दृष्टसर्वीयशाखा । संस्कृतवेदमर्यादाभूतत्रैवर्णिकत्वनियममतिक्रान्तो द्राविडवेदसागरः । शठजिन्मुनेः सारस्वतस्रोतसो वकुलामोदवासितत्वं प्रसिद्धम् । वेलातीतश्रुतिर्द्राविडीब्रह्मसंहिता । तस्याः परिमलं वकुलसुमनोवासना । द्राविडश्रुतेर्भगवत्पादाम्भोजनिरन्तरसक्तत्वात्पादाम्भोजे तत्सौरभसं-

क्रान्तिः। द्राविडभाषाचागस्त्यप्रणीता 'विष्वगाचान्तसिन्धोः कुम्भीसूनोरसुरकवलप्राखिनी स्वैरभाषा' इति वर्ण्यते। तद्भाषासंहिताग्रन्थः सिन्धुभूतमपि दुर्गन्धं सुलभं चुलकयेत्। दुर्वासना अपोह्य शठस्यास्मच्चित्तस्य विजये श्रीशठारेरेव प्रभुता स्यात्। 'यथार्था शठजित्संज्ञा मच्चित्तविजयाद्वयोः' इत्याचार्याः। चित्तविजय एव योगनिर्वर्त्यः। ३ आमोदितोऽपि निगमैर्विभुरङ्घ्रियुग्मे, इत्यन्यत्रापि भगवच्चरणयोर्निगमवासितत्वं वर्ण्यते। उत्कृष्टवाचि सौरभ्यास्तित्वं भूयः प्रदर्श्यते आचार्यैरन्यैश्च कविभिरिति प्रसिद्धम्। 'सायं संफुल्लमल्लिकापरिमलमुचा वाचा' इत्याचार्यैः स्ववाचो वर्णनं स्वात्यन्तसुहृद्भूतश्रीमद्विद्यारण्यमुनिसकाशप्रेषितप्रतिपत्रिकायाम्। लोकोत्तराया वेदवाचः स्वतः सौरभं स्यादेव। सर्वगन्धभगवन्निश्वसितरूपत्वाच्च तस्यां तदसाधारणसर्वगन्धसंक्रमो नियतः। स च श्रुतिसंक्रान्तो गन्धस्तत्स्तूयमानपादाम्भोजेन संवर्ध्येत। ४ 'भारूपः सर्वगन्ध एष म आत्मान्तर्हृदये' इति शाण्डिल्यविद्याश्रुतिः प्रथमश्लोक एव प्रत्यभिज्ञापितेत्युक्तम्। तत्र च भारूपसहपठितः सर्वगन्ध इति ज्योतीरूपत्वं प्रथमश्लोकेनोपपाद्य तदनन्तरपठितसर्वगन्धत्वगुणप्रदर्शनमनन्तरश्लोकोपक्रमे संगतमिति सहृदयैर्भाव्यम्। यस्य श्रुतिपरिमलस्य सर्वसुगन्धान्तर्भावयितृत्वं तस्य वेलातीतत्ववर्णनं स्वारसिकमेव। 'वेलातीतश्रुतिपरिमलैर्व्यक्तिमभ्येति काव्ये विन्यासैस्ते विबुधपरिषन्मौलिविन्यासदृश्यैः' इति पादुकाश्लोकोऽत्र भाव्यः।

वेदात्मनो गरुडस्य भगवत्पादाम्भोजसंमर्दात्तदीयवासनासंक्रा-
न्तिसंभवः प्रादर्शि यादवाभ्युदये 'श्रुतिरूपेण वाहेन शेषकङ्कण-
शोभिना । स्वाङ्घ्रिसौरभदिग्धेन दत्तसंग्रामदोहलम् ॥' इति । ५
दृश्यत इति पूर्वश्लोकान्ते 'द्रष्टव्यः' इति श्रुतिखण्डः प्रत्यभि-
ज्ञापितः । तदनन्तरं 'श्रोतव्यः' इति खलु श्रुत्यक्षराणि ।
द्रष्टव्यश्चेच्छ्रोतव्य एव । दृश्यत इत्युक्त्वानुपदमेव श्रुतिशब्द-
ग्रहणाच्छ्रवणं चोत्यत इव । ६ अतीन्द्रियदिव्यगन्धानुभवे ना-
स्मत्प्राकृतश्रोत्रस्य सामर्थ्यं स्यात् । प्राकृतगन्धग्रहण एव घ्रा-
णग्राह्यत्वनियमः । इन्द्रियसामान्यात्यन्तागोचरदिव्यगन्धग्रह-
णविषये कुत्रेन्द्रियव्यवस्थावकाशः । भगवदनुग्रहलब्धाद्दिव्यज्ञा-
नेन खलु तदापरोक्ष्यं संभवेत् । दिव्यज्ञानवतः श्रोत्रस्य दिव्य-
गन्धानुभवो वाननुभवो वा घ्राणेन समान एव । मनागपि
तेषां न सामर्थ्यवैषम्यमुभयोरप्यविषये गन्धे । उपचरितमेव
स्याद्घ्राणेन दिव्यगन्धग्रहणवर्णनम् । अलौकिकस्य श्रुत्येकसम-
धिगम्यस्य सर्वविलक्षणगन्धस्य श्रुतीन्द्रियग्राह्यत्ववर्णनमुपच-
रितमेव स्यान्नासंगतम् । उभयोरसामर्थ्ये तुल्ये किमर्थं श्रुत्यनु-
भाव्यं परिमलविशिष्टमित्युच्यत इति चेत्—प्रथमातिक्रमे मा-
नाभावादिति न्यायादिति ब्रूमः । श्रुतीन्द्रियमेव खलु
प्रथममपूर्वगन्धबोधिनीं श्रुतिं गृह्णाति । कर्णविवरैः खलु
सोऽपूर्वगन्धोऽस्मान्प्रविशति । प्रथमद्वारं खलु श्रोत्रं
तद्गन्धप्रवेशे । प्रविशन्नेव स गन्धः वेलातीतमुद्वेलं श्रुतिं
(श्रोत्रम्) वासयति । 'स्रग्धरा दुग्धराशिः श्रवणरसनया

सेव्यः' इत्याचार्यैरुच्यते खलु । उद्वेलं श्रोत्रेणाप्यनुभाव्यं परिमळं भगवत्पादाम्भोजस्येति भावः । ७ 'वकुलधरतनुस्त्वं संहितां यामपश्यः श्रुतिपरि।दि तस्याः सौरभं योजयन्ति' इत्याचार्याः पादुकासहस्रे श्रुत्युपबृम्हणरूपत्वात्तया निबिडसंगवत्यास्त्रय्यास्ततः सौरभ्यग्रहणमिति प्रदर्शयन्ति । स्वतो वा भगवन्निश्वासगन्धसंक्रान्त्या वा वकुलसौरभसंक्रान्त्या वा श्रुतेरुद्वेलं परिमळं स्यादेवेत्याचार्याणामाशयः । ८ अत्र वेलातीतापूर्वपरिमलेन योगोपक्रमः । 'स्थिरपरिमळैः, 'वहते वासनां मौळिबन्धे' इति योगोपसंहारः । हेयवासनानिरसनदक्षशुभवासनासंपादनमेव योगकार्यम् । अतः परिमलेनोपक्रम्य तेनैवोपसंह्रियते । इदं च रसिकमनोरञ्जकं स्यात् । ९ 'एतेन योगः प्रत्युक्तः' इति शारीरकप्रत्युक्तस्य वेदान्ताननुमतस्य योगसंप्रदायस्य श्रीरङ्गनाथविषययोगवर्णने तद्दत्तवेदान्ताचार्यसंज्ञैराचार्यैरादरणं न न्याय्यं स्यात् । संज्ञादातृविषय एव वेदान्तविरुद्धाचरणं कथं संज्ञादात्रा मृष्येत । कथं च तादृशयोगाराधितो भगवान्प्रीतः एनं प्रीणीयात् । १० श्रीरङ्गभर्त्रा दत्तां वेदान्ताचार्यसंज्ञामन्वर्थयामि' इत्याचार्योक्तमपि मृषा भवेत् । एवं प्राप्ते— वेदान्तविरोधशङ्कानिवृत्त्यर्थं योगे आरभ्यमाणे आचार्यैः श्रुतिवासितोऽयं योगो न श्रुतिविरुद्ध इति व्यंक्तुमादावेव श्रुतिपरिमलसंकीर्तनमिव ; तस्य परिमलस्योद्वेलत्वसंकीर्तनमपि । ११ दूराद्गन्धग्रहणम् । अनन्तरं कनकसरित्सैकतम्, तत्र हंसाश्च, अनन्तरं लालयितृमातृकरसरसिजानि च क्रमेण दृष्टिगोचरी-

भवन्ति । अनन्तरमम्भोजप्रतिफलनम् ॥

वेधसां मौलिसेव्यम् । १. श्रुतिपरिमलोत्कर्षं परमपुरुषाद्गृहीतवेदसंप्रदायचतुर्मुखवत्को वा जानीयात् । स एव तत्र निरतिशयरसिकः । चतुर्भिरपि मुखैः सदा चतुरोऽपि वेदानधीयानस्तद्वासनामनुभवन्नेवास्ते । निरतिशयसुरभिनाभीकमलसमुत्पन्नस्य पद्मयोनेः पद्मे सहजैव रुचिः । पद्मे रासिक्यम्, परिमले च रासिक्यम् । स्वापरिचितवकुलसुमनोवासितत्वान्नवत्वमपि स्यात्पादाम्भोजगन्धस्य । २. स्वेन सर्वदाधीयमानाः श्रुतयोऽनिशं भगवत्पादाम्भोजं शिरसा धारयन्ति । कथं तत्संप्रदायप्रवर्तकस्तदनुष्ठानविपरीतमाचरेत् । यथा श्रुतयः, सोऽपि स्वयं मूर्ध्नि धारयति । प्रथमं श्रुतिशिरोधार्यत्वव्यञ्जकश्रुतिपरिमलवत्ववर्णनम्, अनन्तरं श्रुतिप्रवर्तकहिरण्यगर्भशिरःसेव्यत्ववर्णनं चैतद्व्यञ्जयतीव । श्रुतिः खल्वनुष्ठापिका ब्रह्मणोऽपि । ३. यद्यपि कदाचिद्धिरण्यगर्भेण 'प्रतिफलनकल्पं भगवदैश्वर्यगुणविग्रहादि' इति तत्प्रवर्तितयोगदर्शने उपदिष्टं स्यात्, न तावता तस्यावैदिकत्वं भाव्यम् । तस्योपदेशो यो वा को वा भवतु योगशास्त्रे । तस्यानुष्ठानं तु भगवत्पादाम्भोजस्य मौलिसेवनमेव । किमुपदेशं श्रद्दध्याम, अनुष्ठानं वा । अनुष्ठानमेव प्रबलं प्रमाणम् । यदि भगवत्पादाम्भोजस्य प्रतिबिम्बकल्पत्वं हार्दम्, कथं तेन स्वशिरो भूषयेत् । प्रतिबिम्बत्वस्य स्वाभिप्रायत्वे खपुष्पकृतशेखर इत्युप-

हास्यः स्यात् । पादाम्भोजं शिरसा सेवमानो विग्रहगुणानां गन्धादीनामपि सत्यत्वमस्मान् दृढं ग्राहयति । विग्रहगुणगन्धादीनामेव सत्यत्वाभ्युपगमे कः संशयः स्यादैश्वर्यज्ञानत्वादीनां सत्यत्वे । 'प्रजल्पन्त्यैश्वर्यं प्रतिफलनकल्पं भगवतः' इति योगदर्शनानुवादः संकल्पसूर्योदये । यद्यपि कदाचित्किञ्चिदपराद्धं स्यादनुपदमेव क्षालयेत्तदपराधं मूर्ध्नि भगवत्पादाम्भोजमारोप्य । यथा वत्सापहारानन्तरं मोहात्यये त्रिः परिक्रम्य भगवत्पादयोरभिष्टौति भूमानम् 'नौमीड्यतेऽभ्रवपुषे तटिद्म्बराय' इत्यारभ्य । तत्रापि दिव्यमङ्गलविग्रहानुभवरसमेव ख्यापयति । सगुणमूर्त्यनुभवं च श्लाघते 'श्रेयः स्रुतिम्' इति । विगर्हते च केवलनैर्गुण्यनिष्ठां स्थूलतुषावघातौपम्यवर्णनेन । 'मृदुपदे पशुपाङ्गजाय' इति खलु प्रथमश्लोक एव तस्य भगवत्पादसौकुमार्यानुभवः । 'पांसुलपादस्य हालिकस्य' इतिवत्प्रसिद्धकठिनपाङ्किलपादपशुपाङ्गसंभवत्वेऽपि सहजं सरोजसौकुमार्यमीषदपि नापैतीति विस्मितो भवति ।

४. वेधाः खलु श्रीरङ्गनाथस्य प्रथमाराधकश्चिराराधकश्च । 'सर्गानिव बहून्कमण्डलुगलद्गङ्गाप्लुतोऽपूजयद्ब्रह्मा त्वाम्' इति खलु श्रीभट्टपादाः । सत्यलोकाच्छ्रीरङ्गमागत्य चिरानुभूतमम्भोजं शिरसि निवेशयेदेव ॥

प्रादुर्भूतम् । १. न कृत्रिमं ब्रह्मसृष्टमम्भोजमिदम् । तथा चेत्— नात्यन्तादरबहुमानादि स्यात् । 'वेधसोऽज' इत्यौ-

पचारिकं रूढं नाम । इदं तु मुख्यमजं स्वयं व्यक्तम् । ९. 'देवकीपूर्वसंध्यायां प्रादुर्भूतं महात्मना' इति भगवदवतारव-दस्य प्रादुर्भाव इति व्यव्यते । तत्र यथात्ममाययैव प्रादुर्भाव-स्तथास्यापि । स्वेच्छया वा स्वात्मत्वेन स्वमतस्य ज्ञानिन इच्छया वा भगवत्प्रादुर्भावः । 'संभवाम्यात्ममायया' इति गीतावचनस्थात्मशब्दो भगवन्तं वा 'ज्ञानीत्वात्मैव मे मतम्' इति तच्छास्त्रोक्तप्रसिद्धया भगवदभिमत्या स्वात्मभूतज्ञानिनं वा गृह्णीयात् । ये ये ज्ञानिनो यथा यथा रोचयेयुस्तथा तथा-त्मानं सृजेदिति प्रसिद्धमेव ॥

कनकसरितः सैकते । १. अन्तर्ज्योतिरिति 'य एषो ऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते, आप्रणखात्सर्व एव सुवर्णः' इति छन्दोगश्रुतिरपि प्रत्यभिज्ञापिता । आदित्यमण्ड-लान्तर्वर्तिपुरुषस्य हृदयगुहान्तर्वर्त्यानन्दमयस्य चैक्यं प्रसि-द्धम् । अन्तर्ज्योतिषो हिरण्मयपुरुषस्य कनकसरिन्मध्यस्थत्व-मेव शोभनम् । यादृशः पुरुषस्तादृशी सरित् । यथा श्रीनट-राजस्य हाटकसभा, तथा श्रीरङ्गनटस्य हेमापगा प्रादुर्भावस्था-नम् । सह्यजासिकतास्वतिसूक्ष्माः कनकांशा दृश्यन्त इति प्रसिद्धम् । अत एव सैकतस्य विशेष्यत्वेन ग्रहणम् । श्रीमच्छ-ङ्कराचार्यैः प्रणखादारभ्य भगवद्विग्रहवर्णनं कृतम् । २. कनक-सरित्कनकसिकतासु प्रादुर्भूताम्भोजस्य हेमत्वमपि संभावना-र्हमेव । कार्यं निदानाद्धि गुणानधीते' इति न्यायमुदाहृत्य नैष-

धीयहंसस्य हेमत्वमुपपादितं कविना श्रीहर्षेण। तथा च हैमाम्भोजं सुरभि इत्यनुभवः । आप्रणखात्सर्व एव सुवर्ण इति चोपपादितं भवति। रमणीयत्वं सौगन्ध्यमित्युभयमप्यपेक्षितमेव । 'कटकरुचिभिः' 'न्यञ्चत्काञ्चीकिरणरुचिरम्' 'कनकतिलकालंकृतम्' 'रत्नापीडद्युतिशबलिते किरीटे' इत्यनुस्यूतः कनकानुभवः । ३. कनकसरिन्मध्यपुलिने भगवान् शेते । अहो! भाग्यं सह्यजायाः। 'मन्मध्यगतः कृष्णः' इति दृप्तगोपिका वदन्ति। सर्वदा भगवानस्या मध्ये शेते। 'मध्ये कवेरदुहितुर्मुदितान्तरात्मा' इति खलु कावेरीमध्यस्थत्वविशिष्टो योग्यनुभवः। यथा तस्या मध्ये शेते तथा मदात्मान्तरपि शयीतेति मनोरथः । एतदेव महाभाग्यमृषिणा प्रशस्यते 'कावेरी च महाभागा' इति । ४. 'सत्याल्लोकात्परममहितात्स्थानतो वा रघूणां मन्ये मातः समधिकगुणं सैकतं सह्यजायाः । पूर्वं पूर्वं चिरपरिचितं पादुके यत्त्यजन्त्या नीतो नाथस्तदिदमितरन्नीयते न त्वयासौ ॥' इति निवृत्तिकथोज्झितभगवन्निरतिशयप्रीतिवर्णनं कनकसरित्सैकतविषये ॥

हंसजुष्टे । १. हंसैः प्रीतिसेविते । परमहंसा आचार्याः । विशेषतः 'पत्युः संयमिनां प्रणम्य चरणौ तत्पादकोटीरयोः संबन्धेन समिध्यमानविभवान्धन्यांस्तथान्यान्गुरून् । ' इति मध्यमणिभूतस्य यतिपतेर्ग्रहणम् । 'अत्रैव श्रीरङ्गे सुखमास्व' इति श्रीरङ्गनाथेनादिष्टो यतिपतिरिति प्रसिद्धम् । २. वेधस आग-

-मनस्योक्तत्वात्तद्वाहभूतहंससाहचर्यमप्यत्रास्तीति द्योत्यते। ३. स-र्वपुरुषकारपौष्कल्यमुच्यते, दीनानाथानामस्माकं तद्बलेनैव फलसिद्धिसंभवात्। प्रथमं हंसाः। अनन्तरं जगन्मातरः। ४. आचार्यसंनिधावारब्धो योगः प्रशस्तः स्यात्। तत्कटाक्षसुधा-प्लवेन योगः सुसाधः। ५. 'योगप्रथमाङ्गभूतयमा अत्र व्यज्यन्ते। 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' इति योगसूत्रम्। हंसानां योगिनां संनिधौ हिंस्राणामपि हिंसारुचिर्नोदियात्। 'तत्संनिधौ वैरत्यागः' इति योगसूत्रम्। 'सिंहैः सार्धं विह-रति गणः सैन्धुरः शान्तवैरः' इत्याचार्या अगस्त्याश्रमवर्णने। 'सत्यं वद' इति खलु प्रथममनुशासनमाचार्यस्य। सत्यास्ते-यादिव्रतस्खलने स एव शासिता। ब्रह्मचर्यं गुरुकुले सुलभ-मेव। त्यक्तसर्वपरिग्रहाणां संनिधावपरिग्रहाभ्यासः सुकरः। बाह्याभ्यन्तरशौचतपःस्वाध्यायरूपा नियमा अपि गुरुसं-निधौ सुलभाः॥

लक्ष्मीभूम्योः करसरसिजैर्लालितम्। १. आस्तां नाम भ-गवाननुजिघृक्षारहितः। त एव मातरौ करुणारूपिण्यौ वात्स-ल्यनिर्भरे करसरसिजैर्भगवत्पादाम्भोजं गृहीत्वा लालयित्वा कु-लिशकठिनेऽस्मन्मनसि निवेशयितुम्। 'कथङ्कारं लक्ष्मीकर-कमलयोग्यं निजपदं निदध्याद्रङ्गेशः कुलिशकठिनेऽस्मिन्मनसि नः। न चेदेवं मध्ये विशति दयया देवि भवती निजाक्रान्ति-क्षुण्णस्मरशरशिखाकण्टकतति:॥' इति पादुकाश्लोकोऽत्रानुसं-

धेयः । तत्र पादुकया पुरुषकारः, मानसे निवेशनम् , न वयं पादाम्भोजस्य मनसि साक्षान्निवेशनमभिलषामः, किं तु तत्र प्रतिफलनार्थं तदुपरिदेशे आनाय्य क्षणकालं स्थापनमेव । ध्रुवमेव तत्क्रियेत मातृभ्याम् । यथा पादुकाश्लोके 'एवम्' इति पादुकाविशिष्टपादानुभवोऽनुसंधीयते, तथात्रापि लालयितृमातृकरसरसिजविशिष्टपादाम्भोजप्रतिफलनम् । यथा पादुकाया मध्यपातित्वं तथात्रापि मातृकरपद्मानां मध्यपातित्वं प्रतिबिम्बे । २. पद्मानि संघश एव दृश्यन्त इत्यनुभवसिद्धम् । भगवत्पादस्याम्भोजस्वरूपणेऽवश्यं बहुपद्मसाहचर्यं वर्णनीयम् । भगवत्पादाम्भोजाभ्यां सह चत्वारि पद्मानि वर्ण्यन्तेऽम्भोजरूपकसामञ्जस्याय । अजपद्मस्याजान्येव पद्मानि सहचारीणि स्युः । ३. पद्मयोनयो वेधसः, पद्मप्रिया हंसाः, पद्मवनालया पद्मा, देव्योः करसरसिजानि, हृदयपुण्डरीकम् , इत्येतत्सर्वं पद्मरूपके चारु संगतम् । ४. श्रीमच्छङ्कराचार्या भक्तिपरीवाहभूते हरिपादादिकेशान्तस्तोत्रे 'आक्रामद्भ्यां त्रिलोकीमसुरसुरपती तत्क्षणादेव नीतौ याभ्यां वैरोचनीन्द्रौ युगपदपि विपत्संपदोरेकधाम । ताभ्यां ताम्रोदराभ्यां मुहुरहमजितस्याञ्चिताभ्यामुभाभ्यां प्राज्यैश्वर्यप्रदाभ्यां प्रणतिमुपगतः पादपङ्केरुहाभ्याम् ॥' इति भगवत्पादपङ्केरुहेऽन्वभूवन् । तत्र 'अञ्चिताभ्यामुभाभ्याम्' इत्यस्य श्रीभूमिभ्यां लालनेन पूजिताभ्यामिति कविहृदयवर्णनं स्वारसिकम् । सामानाधिकरण्यावलम्बनेन द्वाभ्यामित्यर्थो वर्ण्यते कविहृदयावेदिभिः । जङ्घाद्वयवर्णने 'करपरि-

मलनानन्दहृष्टे रमायाः, जङ्के नारायणीये' इत्युक्तं तैः । स्तोत्रारम्भ एव लक्ष्मीः स्तुता— 'कुन्देन्दुस्वच्छमन्दस्मितमधुरमुखाम्भोरुहां सुन्दराङ्गीं वन्दे वन्द्यामशेषैरपि मुरभिदुरोमन्दिरामिन्दिरां ताम् ।' इति । भूमिश्च स्तुता 'धात्रीं स्थात्रीं जनित्रीं प्रकृतिमविकृतिं विश्वशक्तिं विधात्रीं विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि ॥' इति ॥

रङ्गभर्तुः । यद्यप्ययं नटाग्रेसरः, अस्य ताम्रोदरौ पादावम्भोजवत्सुकुमारावेव, न काठिन्यवन्तौ ॥

प्रतिफलति मे भावनादीर्घिकायाम् । १. योगारुरुक्षोरारम्भदशायां विम्वस्याधोभागस्य पादस्य स्पर्श एव चिरप्रयत्नसाध्यः स्यात् । यदि संयोगः संपाद्येत, न स्पर्शादधिकः स्यात् । अत एवैतच्छ्लोकवृत्तस्य संग्रहानुवादे 'पादाम्भोजं स्पृशति' इत्युच्यते । स च स्पर्शो न साक्षात्स्पर्शोऽपि । किंतु विम्वप्रतिविम्वभावरूपसंवन्धमात्रम् । २. यद्यपि 'भगवान्' 'रूपं रूपं प्रतिरूपो वभूव' इति प्रतिवस्तु जलसूर्यकादिवदन्तरवस्थितो भवतीति श्रूयते, मद्भाग्यविपर्ययादेतत्क्षणपर्यन्तं भगवतः प्रतिवस्तुप्रतिविम्वितस्वरूपव्याप्तिनियमो मदेकवर्जं एवाभूत्, इदानीमेवोक्तपुरुषकारमहिम्ना मन्मानसे प्रतिफलनम् । संचितदुर्वासनानिःशेषक्षालनेन स्वच्छे चेतस्येव प्रतिफलनं संभवेत् । तदर्थमेव भूयस्यः सुवासना मिलिताः श्लोके । भगवन्निश्श्वसितरूपवेदगन्धः, वकुलकुसुमगन्धः, नि-

त्यापूर्वसर्वगन्धः, अनेकपद्मयोनिमौलिगन्धः, श्रीभूमिकरसरसिजयोः 'गन्धद्वाराम्' इति प्रसिद्धो गन्धः, भगवत्पादाम्भोजगन्ध इत्यनुभूयमाना गन्धपरम्परा अवधेया। परिमलरङ्ग इत्याबालगोपालं प्रसिद्धे श्रीरङ्गनाथे आपादचूडं लोकोत्तरपरिमलपरम्परावर्णनं सुसंगतमिति सहृदयैर्भाव्यम्। एतेन 'वहुरपि लघुः प्रत्यक्चिन्तावहिर्विषयाटवीविहृतिचटुलं चेतो रोद्धुं कथं प्रभविष्यति। अनिभृतनटक्रीडोत्कण्ठाविजृम्भितसंभ्रमे कलभचरणे लूतातन्तुः कथं निगलायते॥' इति श्लोकोद्भाविता शङ्का शान्ता भवति। ४. प्रतिफलति चित्तादर्शे। दर्पणप्रतिविम्बितभगवद्विग्रहानुभवो भक्तचित्तरञ्जक इति प्रसिद्धमेव। आलयेषु दर्पणप्रतिफलनं विचित्रतया सर्वजनैरनुभूयते। विम्बतोऽपि प्रतिविम्बस्य चारुता। योगारम्भे प्रतिफलनेनारुरुक्षुचेतस आवर्जनं व्यज्यते। ५. प्रतिफलनं च श्लोकोक्तसर्वविशिष्टं स्यात्। यथा शकुन्तलाविम्बस्य चित्रार्पणे दुष्यन्तस्य विशिष्टलेखनमनोरथः 'कार्या सैकतलीनहंसमिथुना स्रोतोवहा मालिनी पादास्तामभितो निषण्णहरिणा गौरीगुरोः पावनाः। शाखालम्बितवल्कलस्य च तरोर्निर्मातुमिच्छाम्यधः शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्॥' इति दृश्यते। अत्रापि सैकतम्, सरित्, हंसाः, योगगुरुः, जगन्मातृकरसरसिजानि, तल्लालितनटपादाम्भोजं चेति वैचित्र्यपरम्परा मनसि लिखितेव भवति। ६. प्रतिफलनपदं च योगप्रकरणे सुसंगतम्, तच्छास्त्रे वहुलं प्रयोगात्। उपाधौ प्रतिविम्बनं च विम्बाकारो

बुद्धेः परिणाम इति योगसंप्रदायः । ७. 'स्वान्तसङ्क्रान्तबिम्ब-च्छायापत्त्यापि नित्यं सुखयति यमिनो यत्तदव्यान्महो नः ॥' इति श्रीमच्छङ्कराचार्याः । तच्चैतस्यात्यन्तसन्निकृष्टमिति स्पष्टमेव । रङ्गमहस उज्ज्वलचरणस्यैवात्र प्रतिफलनम् । ८. दीर्घिकापदम् 'दीर्घकालादरनैरन्तर्यसत्कारासेवितो दृढभूमिः' इति योगसूत्रप्रत्यभिज्ञापकम् । मम भावनायाः सरित इव नाविच्छिन्नप्रवाहत्वमस्ति । दीर्घिकारूपवापीमात्रत्वं संपादितं भावनायाः । ९. श्रीमल्लोकदेशिकैरर्चाया ह्रदसादृश्यं वर्णितम्' अत्रार्चाहार्दयोरैक्यान्महद्वर्णनानुसारेण दीर्घिकात्वं निरूप्यत इव भावनायाः । १०. निषद्वरदीर्घिकातौल्येनान्यत्र वर्णितं मम मनः शुभभावनादीर्घिका भवति । ११. प्रतिफलनक्रियाकार्य-प्रतिबिम्बस्यासत्त्वमौत्सर्गिकम् । तत्त्वदर्शनफले योगेऽसत्यफलवर्णनमनुचितम् । अत्र त्रेधा समाधिः । प्रतिफलनं नाम बिम्बरूपपरिणाम एव । स च सत्यः । यद्यपि मुख्यमेव प्रतिफलनमिष्येत, 'विवृणुते तनूं स्वाम्' इति भगवदनुग्रहैकलब्धभगवद्विग्रहप्रतिबिम्बस्य नासत्यत्वशङ्का । 'मायोदन्वत्यपारे प्रतिफलति मृषावीचिषु ब्रह्मचन्द्रश्छायांशास्तस्य जीवाः' इति वर्णितरीत्यान्तःकरणेषु प्रतिफलितबिम्बभूतब्रह्मणः प्रतिबिम्बाश्चिदाभासा जीवाः प्रतिबिम्बसामान्यन्यायेनासत्या अचेतनाः स्युरित्याक्षिप्ते 'अचिद्वस्तुप्रतिबिम्बानामेवासत्यत्वाचेतनत्वनियमो न चित्प्रतिबिम्बानाम्, चित्प्रतिबिम्बाश्चित एव स्युः' इति प्रतिवदन्ति । यदि नीरूपस्य चितः प्रतिबिम्बः संभवेत्तत्प्रति–

विम्बस्यासत्यत्वमचेतनत्वं च न कुत्रापि दृष्टचरम् । श्रुतिस्मृतयो जलसूर्यकादिदृष्टान्तैर्जीवानां प्रतिविम्बत्वं वर्णयन्ति । तेषां च दृष्टं सत्यत्वं चेतनत्वं च नाचित्प्रतिविम्बासत्यत्वाचेतनत्वनियमेनापन्होतुं शक्यमिति तेषामाशयः स्यात् । वस्तुतस्तु— प्रतिबिम्बग्रहणमपि स्वच्छद्रव्यप्रतिहतेन नयनमहसा विम्बग्रहणमेव । सर्वथा भगवत्प्रदर्शितभगवत्पादाम्भोजप्रतिफलनस्य नासत्यत्वम् ॥

चित्राकारां कटकरुचिभिश्चारुवृत्तानुपूर्वां
काले दूत्यद्भुततरगतिं कान्तिलीलाकलाचीम् ।
जातुच्छायाद्विगुणसुभगां रङ्गभर्तुर्मदात्मा
जङ्घां दृष्ट्वा जननपदवीजाङ्घिकत्वं जहाति ॥ ३ ॥

अनन्तरं जङ्घारोहः । प्रथमं पादप्रतिफलनवर्णनेन मनसस्तन्मयतापत्तिः । 'कटकरुचिभिः' इति पादजङ्घासन्धिस्थितकटककान्तिभिः पादस्य भूषितत्वं व्यज्यते । पादानुभवकाल एव तद्भूषणभूतकटकरुच्यनुभवः स्यात् । कटकरुचयश्च जङ्घामपि चित्तं भूषयन्ति । कटकरुचिदर्शने तद्भूषितजङ्घादर्शनं स्यादेव । अतो न पादमात्रे विश्रान्तिः । पादाम्भोजादुपरि जङ्घां प्रत्याकर्षन्ति मानसं विचित्राः कटककान्तयः ।

चित्राकारां कटकरुचिभिः । पादजङ्घे उभयत्र प्रसरत्कटककान्त्या सुसंगतत्वप्रदर्शनमुपरि संचाररुचिजननार्थम् ।

कटकरुचयो जङ्घारुचिं जनयन्ति । चित्रशब्देनाद्भुतरसानिमग्नत्वं व्यज्यते । कटकश्च रत्नखचितः सौवर्णः स्यात् ।

चारुवृत्तानुपूर्वाम् । 'वृत्तानुपूर्वे च नचातिदीर्घे जङ्घे शुभे सृष्टवतस्तदीये । शेषाङ्गनिर्माणविधौ विधातुर्लावण्य उत्पाद्य इवास यत्नः ॥' इति कुमारसंभवे श्रीपार्वतीजङ्घावर्णने । 'श्रीमत्यौ चारुवृत्तौ' इति श्रीमच्छङ्कराचार्या भगवज्जङ्घानुभवे । तदुभयं संकलय्य 'चारुवृत्तानुपूर्वाम्' इत्यत्रानुभवः । न केवलमनुपूर्ववर्तुलत्वं सौन्दर्यम्, किं तु भक्तमनोरञ्जनदूत्यदुकूलहरणदैत्यानुधावनादिसुन्दराचरणरूपवृत्तमपि सौन्दर्यावहमिति चारुवृत्तशब्देन व्यज्यते । न केवलं रूपसौन्दर्यम्, वृत्तसौन्दर्यमपीत्याशयः । एतदेव द्वितीयपादे स्पष्टं विव्रियते । व्यञ्जितस्य मध्यमकाव्यत्वापादकस्पष्टप्रतिपादनं जङ्घासुभगवृत्तान्तेष्वादरातिशयेन । एष एव क्रमः श्रीशंकराचार्याणां श्लोकेऽपि दृश्यते । तत्रापि 'चारुवृत्ते' इति प्रथममुक्त्वानन्तरं 'सूरीन्द्रैः स्तूयमाने सुरकुलसुखदे सूदितारातिसङ्घे जङ्घे नारायणीये' इति जङ्घासंबन्धीन्यद्भुतानि वर्णितानि ॥

काले दूत्यद्भुततरगतिम् । अत्यद्भुतः पाण्डुतनयदूत्यवृत्तान्तो न वर्णितः श्रीशंकराचार्यैः । वर्णितस्त्वस्मदीयैः श्रीभट्टार्यैः 'दूत्यप्रसङ्गोत्सुकम्' इति पादवर्णने । गतिव्यापारस्य पादजङ्घसाधारणत्वादत्र जङ्घाविषये तद्वर्णनम्, द्रुतधावनादेर्जाङ्घिको जङ्घाल इति जङ्घाप्रयुक्तत्ववर्णनरूपलोकव्यवहारोप्यनु-

स्तुतो भवति। शेते रङ्गशायीति न मन्तव्यम्। यदि पाण्डवसमानभक्तास्तत्प्राणभूताः, यदि च तादृशोऽवसरः, शयनादुत्थाय धावेदेवेति 'काले' शब्देन व्यज्यते। रङ्गनटस्य जङ्घा लोकोत्तरैव स्यात्। तस्य महानटस्य जाङ्घिकत्वे द्रुततरगतौ वा कः संशयः। यद्यपि पाण्डवदौत्ये नाधिको जङ्घाव्यापारः, न तरां द्रुतगतेर्वा द्रुततरगतेर्वा संभवः, द्रुततरगतित्ववर्णनम् 'दूत्यप्रसङ्गोत्सुकम्' इत्युक्तोत्कटौत्सुक्यरूपमनोरथसंरम्भेण वा, दूत्योपलक्षितदुकूलहरणदैत्यानुधावनादिविधौ साक्षाद्वृत्तत्वेन वा निर्वाह्यम्।

कान्तिलीलाकलाचीम्। उदाहृतकुमारसंभवश्लोके स्रष्टा ब्रह्मा कृत्स्नामपि स्वबुद्धिसंचितां लावण्यसामग्रीं जङ्घायां विनिवेश्य संचितलावण्यस्य निःशेषमुपयुक्तत्वाच्छेषाङ्गनिर्माणार्थं लावण्यान्वेषणे सप्रयत्नोऽभूदित्युक्तम्। तत्र स्रष्टृरूपप्रजापतिव्यापारत्वात्तथा प्रयत्नकर्तव्यता। अत्रानन्यसृष्टं भगवद्भिग्रहं स्वयं व्यक्तम्। तस्मान्नावयवान्तरसौन्दर्यसंपादनप्रयत्नावश्यकता। यदि सृष्टिः, न प्रथमशिल्पिचतुर्मुखसृष्टिः। किं त्वखण्डब्रह्माण्डप्रथमतरशिल्पिना पद्मजानिना स्वयमिच्छामात्रसिद्धा स्वात्मनः सृष्टिः। 'इच्छामात्रं प्रभोः सृष्टिः' इति न तत्र प्रयत्नदशावकाशोऽपि। इच्छामात्रेणाभीष्टे साधिते किमर्थमनन्तरदशाभूतप्रयत्नाश्रयणम्। यद्यपीयं जङ्घा लोकोत्तरा लावण्यपूर्णा च, एतदुपर्यवयवानां न मात्रयापि लावण्यन्यू-

नता । ऊर्वादीनामूर्ध्वावयवानां पूर्णं प्रतिक्षणं वर्धमानं लावण्यं बिन्दुरूपेण वा ओघरूपेण वा अधः पतदेवास्ते । अतिशयितला-वण्यवद्वस्तुविषये लावण्यं बिन्दुरूपेण स्यन्दत इति लोकव्य-वहारः । उपर्यवयवेभ्यो निष्यन्दमानलावण्यस्य ग्रहणार्थं नि-र्मितपतद्ग्रहत्वेनोत्प्रेक्ष्यते जङ्घा । लीलाकलाचीमित्यत्र लीला-शब्देन नेयं कलाच्युपभोगेन रजोधूसरा भवति । सदा जङ्घा-त्वेन रजः संबद्धापि निर्लेपस्वभावत्वादलंकारार्थं सुरक्षि-तकलाचीवन्निर्मलैवास्ते । क्रीडाकलाच्यलंकारार्था मलापनय-नेन मुहुर्मुहुः संस्क्रियेत ॥

जानुच्छायाद्विगुणसुभगाम् । अत्रावयवद्वन्द्वसन्धिभूत-जानुसौन्दर्यवर्णनं हृद्यम् । द्रुततरगतिजङ्घाभावनेन तद्धावना-नुधावनेन परिश्रान्तमेव स्यान्मानसम् । जङ्घाभावयितृ मनस्तां धावन्तीमनुधावेदेव । इतरथा भावनाविच्छेदः स्यात् । श्रान्तं च मनश्छायां विश्रमं चापेक्षेत । छायाकाङ्क्षायां जानुच्छायेति कान्त्यर्थकछायाशब्दप्रयोगः । अस्त्येव भूयो विश्रमसंभव ऊ-रुद्वन्द्वे ॥

रङ्गभर्तुः । लोकातिशायिनी जङ्घा, रङ्गभर्तृजङ्घात्वात् ॥

मदात्मा । अत्र मनःप्रकरणे आत्मनोऽपि वाचकात्मशब्दः प्रयुज्यते, जननपदवीजाङ्घिकत्वहानरूपमुक्तेर्मुख्यतोऽन्वयाय । मनसो बन्धमोक्षयोः कारणत्वेऽपि, आत्मन एव तत्फलभा-क्त्वम् ।

जङ्घां दृष्ट्वा जननपदवीजाङ्घिकत्वं जहाति । १. दृष्ट्वा इत्यस्य भजनं कृत्वा इत्यर्थः । 'भजते रङ्गनाथस्य जङ्घाम्' इत्यनुवादात् । निदिध्यासनप्रकरणान्मध्य एव मुख्यदर्शनवर्णनमनुचितं स्यात् । दर्शनसमानाकारोपासने दर्शनस्यौपचारिकः प्रयोगः । निदिध्यासने वैशद्यरूपाविशेषसमर्पकत्वं द्रष्टव्यशब्दस्य 'द्रष्टव्यः' इत्यादिविधिवाक्ये । 'सारथ्यपारिषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामैः । स्निग्धेषु पाण्डुषु जगत्प्रणतस्य विष्णोर्भक्तिं चकार नृपतिश्चरणारविन्दे ॥' इति दूत्याद्यद्भुतचरित्रानुसंधानेन भक्त्युत्पत्तिर्भागवतानां सहजैव । जङ्घानुभवे भक्त्युपचयो द्योत्यते । भक्त्युपक्रम एवोत्तरपूर्वाघयोरश्लेषविनाशरूपामृतत्वस्य संभवः । अत एव जननपदवीयातायातविरतिरूपामृतत्वफलस्यात्र संकीर्तनम् । 'क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति श्रुतिर्दृष्ट्वाशब्देन प्रत्यभिज्ञाप्यते । दर्शनाव्यवहितोत्तरं फलं यथा 'सेतुं दृष्ट्वा' इत्यत्र जङ्घाभावनादुपासकजङ्घानिवृत्तिरिति चारु प्रदर्श्यते । भगवज्जनिचेष्टितयोर्दिव्यत्वज्ञानेनैतद्देहावसानेऽस्मज्जनेरात्यन्तिकनिवृत्तिरिति भगवदुक्तानुसारेण दिव्यजङ्घास्वरूपचेष्टिताद्यनुभवेन संसारपदवीजाङ्घिकत्वनिवृत्तिः स्यादेव । मात्रा दाम्ना बद्धत्वभावनेन निःशेषकर्मबन्धविच्छेदः, पूतनास्तनन्धयत्वज्ञानेन पुनः स्तनन्धयत्वाभवनमिति च वैचित्र्यप्रदर्शनशैल्याचार्याणां श्रीमच्छङ्कराचार्याणां च । उभयोरपि मार्गदर्शी महर्षिः शुकः । २. शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ।

'दृष्ट्वा' इति भजनग्रहणेनेश्वरप्रणिधानरूपनियमो द्योत्यते। चित्राकारां कटकरुचिभिरिति संतोषः, चारुवृत्तेति बाह्याभ्यन्तरे शौचे च संगृह्यन्ते। ३. न जाङ्घिकत्वहानस्य सार्वभौमत्वम्। जननपदवीसंसरणविषय एव तद्धानम्। 'सर्वान्लोकान्कामान्नी कामरूप्यनुसंचरन्' इत्युक्तभगवदनुसंचरणानुधावनादिकं जाङ्घिकत्वं महत्तरमेव स्यात्। शुभान्यूर्ध्वाङ्गानि द्रुततरमारोहेदेव। ४. वासनारेणुगुण्ठितत्वाज्जगदटवीमहाजाङ्घिकत्वम्। भगवज्जङ्घाभजनसंपादितशुभवासनाभिस्तान्वासनारेणूनपोह्यानेकजन्मसाहस्रीरूपसंसारपदवीव्रज्याया निवर्तनम्॥

कामारामस्थिरकदलिकास्तम्भसंभावनीयं
क्षौमाश्लिष्टं किमपि कमलाभूमिनीलोपधानम्।
न्यञ्चत्काञ्चीकिरणरुचिरं निर्विशत्यूरुयुग्मं
लावण्यौघद्वयमिव मतिर्मामिका रङ्गयूनः॥ ४॥

'आकर्षन्द्विजराजमपि' इत्यादिवद्रक्षणसंरम्भेण द्रुतंतरगतिना भगवता सहानुधावनेन श्रान्ता मनीषा विश्रान्त्यर्थिनी स्यात्। भूयसी विश्रमसामग्री प्रदर्श्यतेऽत्र॥

कामारामस्थिरकदलिकास्तम्भसंभावनीयम्। १. मन्मथोद्यानं प्रदर्शयिष्यते। तत्रात्यद्भुतं नाभीसरश्च। इदानीं कामोद्यानद्वारस्य कदलिकास्तम्भत्वेन भगवदूर्वोरुत्प्रेक्षणम्। श्री-

मच्छङ्कराचार्याः भगवद्वक्षस्स्थलमुपवनत्वेन वर्णयन्ति 'वक्षः श्रीवृक्षकान्तं मधुकरनिकरश्यामलं शार्ङ्गपाणेः संसाराध्वश्रमार्तैरुपवनमिव यत्सेवितं तत्प्रपद्ये ।' इति । ऊरुद्वन्द्वं मन्मथोद्यानस्य द्वारभूतमित्याचार्यानुभवः । यद्यपि 'वृत्तावन्योन्यतुल्यौ चतुरमुपचयं बिभ्रतावभ्रनीलावूरू चारू हरेस्तौ मुदमतिशयिनीं मानसे मे विधाताम् ।' इति श्रीमच्छाङ्करीयवर्णनरीत्यास्मद्वर्णनरीत्या चाद्भुतसौन्दर्यवदूरुयुग्मम्, तथापि ततोऽप्यतिशयितत्वादुपर्यनुभविष्यमाणसौन्दर्यस्य द्वार एवास्मद्देकामोद्यानस्येत्याचार्या व्यञ्जयन्ति । २. मदननगरतोरणस्तम्भविभ्रममिव बिभ्राणा जङ्घाद्वितयमिति भट्टबाणाः सरस्वतीवर्णने । नगररूपणादप्युपवनत्वरूपणं सुन्दरमित्याचार्याः, श्रीशंकराचार्याश्चाभिप्रयन्तीव । ३. 'तं देशमारोपितपुष्पचापे रतिद्वितीये मदने प्रपन्ने । काष्ठागतस्नेहरसानुविद्धं द्वन्द्वानि भावं क्रियया विवव्रुः ॥' इति रतिवसन्तसहचरितमन्मथप्रवेशे ईश्वराश्रमस्थचेतनद्वन्द्वानां परस्परभावसमुदयवर्णनारम्भः कुमारसंभवे । अत्र मन्मथमन्मथस्योरुद्वन्द्वमुद्यानद्वारं भवति । तत्र द्वन्द्वानां परस्परं भावाः । अत्रोरुद्वन्द्वविषयेऽचेतनक्षौमस्य भावः नायिकानां भावश्च । यथा तत्रात्राप्युद्दीपनसामग्रीपौष्कल्यमालम्बनविभावपूर्तिश्च प्रदर्श्येते । ४. 'एकान्तशैत्यात्कदलीविशेषा जातास्तदूर्वोरुपमानवाह्याः' इति कदलीनामुपमानकक्ष्याया दूरोत्सारणं कालिदासेनैकान्तशैत्यहेतोः । एकान्तशैत्यमत्रोत्कटमपेक्ष्यते तापत्रयगाढतप्तैः संसाराध्वपरिश्रा-

न्तैः । ' एष ब्रह्म प्रविष्टोऽस्मि ग्रीष्मे शीतमिव ह्रदम् ' इति खलु ब्रह्मावगाहे शैत्यानुभवः । यत्कदलीनां हेयत्वे कारणमुक्तं तदेवात्र तदुपादाने कारणं भवति । शीतलमुद्यानद्वारं कदलिकास्तम्भाभ्याम् । ५. अत्रासनरूपं योगतृतीयाङ्गं स्थिरशब्देन व्यज्यते । 'स्थिरसुखमासनम्' इति खलु योगसूत्रम् । तत्प्रत्यभिज्ञाप्यते स्थिरशब्देन । 'प्रावेपत वरारोहा प्रवाते कदली यथा' इति कदलीनां प्रसिद्धं कम्पवत्त्वम् । चलत्वं योगासनविरुद्धम् । देवीनां चेदं द्वन्द्वं स्वापहेतूपधानम् । भूयः कम्पमाने उपधाने तायां कथं स्वापसंभवः । अतः कदलिकायाः स्थिरत्वं कल्पयित्वा तदुत्प्रेक्षणं क्रियते । ६. संयग्भावनीयमित्यर्थकस्य संभावनीयशब्दस्यास्मिन्भावनाप्रकरणे सुश्लिष्टता रसिकैः संयगनुभाव्या । भावनीयमिदं युग्मम्, संयक् च भावनीयम् । ७. आत्मारामाणामेतदात्मनीनमारामम् ।

क्षौमाश्लिष्टम् । १. कुमारसंभवश्लोके चेतनानां द्वन्द्वानां परस्परभावस्य क्रियया विवरणम् । अत्राचेतनस्य क्षौमस्योरुविषयकभावस्तदाश्लेषक्रिया च । पल्वलानां सारसामप्युपतापः प्रदर्शितो ऋषिणा रामविरहे । २. सौकुमार्यातिरेकाद्दृढाश्लेषस्यारुन्तुदत्वभयात्स्पर्शमात्र आश्लेषः । आङ् ईषदर्थे । ३. नायकनायिकानामुत्तमत्वाद्देवीभिः सह शयानस्याप्यूर्वोर्न मनागप्यनावृतता । ४. सावरणमेवोपधानं स्याल्लक्ष्मीवतीनां स्त्रीणाम्, किमुत लक्ष्मीनाम् ।

किमपि । स्थिरकदलिकास्तम्भत्वेन विशिष्योत्प्रेक्षणमेव साहसम् । महाकविरीतिमनुसृत्य सर्वोपमानबाह्यत्ववर्णनमेवो-चितं स्यात् । अनिर्देश्यत्वैकस्वरूपस्योरुद्वन्द्वस्य निर्देश्यत्वापादिका विशेषोत्प्रेक्षैवानुचिता । किमपीत्यनिर्देश्यत्ववर्णनमेव वरम् । यथा 'नमस्तस्मै कस्मैचन' इति 'तस्मै' इति सर्वसमानाधिकरणं वस्तु सर्वनामशब्दतत्पदार्थत्वेन निर्दिश्यानुपदमेव 'कस्मैचन' इत्यनिर्देश्यत्वस्य कथनम् ।

कमलाभूमिनीलोपधानम् । १. तिस्रोऽपि देव्य ऊरुयुग्मे सहैव शेरते । 'स्वापहेतुरनुपाश्रितोऽन्यया रामबाहुरुपधानमेष ते' इति प्रसिद्धं खलु भगवदङ्गस्य देव्युपधानत्वम् । २. विभक्तव्यं युग्मम् । विभक्तयस्तिस्रः । सर्वाः सुखं स्वपन्ति । अत्यद्भुतमिदं स्वापनम् । कमलाभूमिनीलानां तिसृणां देवीनां किमप्यद्भुतमुपधानम् । ३. पादाम्भोजे लक्ष्मीभूम्योः साधारणे । ऊरुद्वन्द्वं तिसृणां साधारणम् । केशपाशमाल्यसमर्पणं नीलाया असाधारणम् ॥

न्यञ्चत्काञ्चीकिरणरुचिरम् । अधःप्रसरत्काञ्चीमयूखा ऊर्वनुभवकाल एव काञ्चीस्थानं प्रदर्शयन्ति । काञ्चीकान्तिरज्जुभिरूर्ध्वमाकृष्यते मनः । गौर्याः काञ्चीगुणस्थानस्य निरतिशयशोभावत्त्वेनानुमेयत्वं वर्णितं हेतूपन्यासपूर्वकं महाकविना । तन्न रोचयन्ते विमर्शकाः । आचार्यैरूरुयुग्मे पततां

काञ्चीकिरणानामेव निर्देशः कृतः, न काञ्चीस्थानं वर्णितम्, नापि काञ्ची मुख्यत्वेनेति रसिकैर्विभाव्यम् । श्रीमच्छङ्कराचार्यैर्यद्यपि जघनं वर्णितं तत्पीताम्बरावृतमेवानुभूतं यथा श्रीसुन्दरबाहोः कटिद्योतिः श्रीवकुलभूषणैः । 'पीतेन द्योतते यच्चतुरपरिहितेनाम्बरेणात्युदारम्' इति श्रीशंकराचार्याः । पृथक्त्वेन मुख्यत्वेन च वर्णिता काञ्ची तः 'काञ्ची सा काञ्चनाभा मणिवरकिरणैरुल्लसद्भिः प्रदीप्ता ।' इति ॥

निर्विशत्यूरुयुग्मम् । निर्वेशशब्दः पूर्णानुभवद्योतकः । पूर्णानुभवविषय एव तत्पदप्रयोग आचार्याणाम् । यथा 'निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिर्यौवनम्' इति सारस्वतदुग्धसागरसुधाविषये । यथा च 'शुभसविधगिरिस्थानतो निर्विवेश' इति श्रीसुन्दरबाहुवासस्थानभूतवृषाचलयात्रामनोरथविषयगाथादशकसंग्राहकश्लोके । 'मुदमतिशयिनीं मानसे नो विधाताम्' इति च श्रीमच्छङ्कराचार्याणामनुभवपूर्णिमावर्णनमूरुविषये । 'ऊरुद्वन्द्वे विलगति शनैः' इति चोर्वनुभवोऽनूद्यते आचार्यैः । श्रान्तस्य शनैः शनैर्लावण्यामृतं निपीय निपीय पूर्णा विश्रान्तिर्भवेत् । ऊर्ध्वप्रदेशगमनयोग्यता च संपद्येत ॥

लावण्यौघद्वयमिव । १. रम्यावर्तवतो नाभीसरसः प्रसरन्ती लावण्यनिम्नगा द्वेधा विभक्तौघद्वयरूपेण प्रवहतीव भाति । २. प्रतिक्षणं नवा नवा भवत्यक्ष्णोः । क्षणे क्षणे नवतोपगमनमेव रमणीयताया रूपम् । नदीप्रवाहस्य प्रतिक्षणं

नवनवत्वं प्रसिद्धम् । ३. कान्तिप्रवाहमेव पश्यामः । न वस्तु किंचिदपीदन्तया । ४. एकावयवशोभायाः सौन्दर्यशब्देन निर्देष्टुमुचितत्वे लावण्यशब्दग्रहणमुपर्यवयवेभ्यः प्रवहत्समुदायशोभौघयोरेवोरुत्वान्नानुपपन्नम् । ५. उपर्यवयवेषु प्रतिक्षणोपचीयमानलावण्यपरीवाहा अधः पतन्त एवासते । निम्नायां गम्भीरायां नाभौ पतन्तस्तत्राप्यमान्तस्तदधः प्रदेशे पतन्ति निर्झरद्वयरूपेण । त एवोरू इत्युत्प्रेक्ष्यते । अविच्छिन्नत्वाल्लावण्यप्रवाहस्य कदाचिदपि न प्रवाहोपरत्या ऊर्वोरुपरतिशङ्का कार्या ॥

मतिर्मामिका रङ्गयूनः । सापत्न्यप्रयुक्तविरोधगन्धरहितानेकनायिकावत्त्वम्, तासां स्वेन सहशयनम्, तच्छयनार्थं स्वस्यैवोपधानीकरणमित्यादिदक्षिणनायकदत्तव्यापारा रसिकस्य यून एव संभवेयुर्न वृद्धस्य जडस्य विषयव्यावृत्तकौतूहलस्य । 'पुराणो मुनिः' 'वेदाभ्यासजडः' 'विषयव्यावृत्तकौतूहलः' इत्याद्या बह्वी गर्हा प्रोक्ता विक्रमेण नारायणमुनिविषये विक्रमोर्वशीये । तदूर्वोः स्त्रीरत्नकारणत्वनिरासार्थमेव तस्य वृद्धत्वेनारसिकत्वेन च गर्हा । तदूरुवर्णनप्रकरण एव तस्य युवत्वं जोघुष्यते आचार्यैरिति रसिकमनोरञ्जनमेव । रङ्गयून इत्यस्मिन्नेक एव श्लोके युवत्वसंकीर्तनं कृतम् । युगपदनेकपत्नीनां तुल्यभोगप्रदत्वम्, क्षौमस्याचेतनस्यापि स्वविषयकरातिभावजनकत्वम्, प्रतिक्षणं नवं नवं प्रवहल्लावण्यौघत्वम्, इत्यादिभि-

युवत्वं सम्यक्स्थाप्यते विक्रमपूर्वपक्षस्य महाकविपूर्वपक्षस्य वा निरासेन । यद्यप्यन्येषां मतिर्नारायणोरू गर्हेत मदीया मती रम्यजामातृरङ्गयून ऊरुयुग्मं निर्विशत्येवेति 'मतिर्मामिका' इत्यनेन व्यज्यते । अत्र स्थिरसुखासिका भवतीति योगाङ्गभूतासनसमाधिः ॥

संप्रीणाति प्रतिकलमसौ मानसं मे सुजाता
गम्भीरत्वात्क्वचन समये गूढनिक्षिप्तविश्वा ।
नालीकेन स्फुरितरजसा वेधसो निर्मिमाणा
रम्यावर्तद्युतिसहचरी रङ्गनाथस्य नाभिः ॥ ५ ॥

नाभीप्रदेशं प्रत्यूर्ध्वं गच्छति मनः । ऊर्ध्वप्रदेशारोहे उच्छ्वासनिश्वासयोर्दीर्घत्वविच्छिन्नत्वकुम्भितत्वाद्यवस्थासंभवः सहजः । अनेन प्राणायामरूपरेचकपूरककुम्भकाद्यवस्थाः सूच्यन्ते ॥

संप्रीणाति प्रतिकलमसौ मानसं मे । १. कामोद्याने गम्भीरं कान्त्यम्भःपूरपूर्णं रम्यावर्तद्युतिमन्नाभीसरः । बहूनि सन्त्याश्चर्याण्यदृष्टपूर्वाणि क्षणे क्षणे विस्मयमादधानानि । २. असौ भगवान्भाव्यमानः प्रतिकलं प्रत्यवयवं मे मानसं निरतिशयं प्रीणातीत्यपि मध्यागमने चारु द्योत्यते । ३. ऊरुद्वन्द्वविषयचिरसुखासिकारूपविलगनेन प्रीतो भगवान् 'तमेनं प्रीतः प्रीणाति' इति श्रुत्यनुसारेण नाभीप्रदेशाद्भुतप्रदर्शनेन प्रतिक्षणं

हर्षमादधाति ।

सुजाता । यद्यप्यजसंज्ञितानन्ता वेधसोऽस्यावयवभूतेन नालीकेनोत्पाद्यन्ते, इयं संयग्जन्मवतीति चारु विरोधः स्फोर्यते ॥

गम्भीरत्वात्क्वचन समये गूढनिक्षिप्तविश्वा । 'नालीकाक्षस्य नाभीसरसि वसतु नश्चित्तहंसश्चिराय ।' इति नाभीसरोवर्णनम्, 'गम्भीराकारनाभीचतुरतरमहावर्तशोभिन्युदारे' इत्युदरवर्णनं च कृतं श्रीमच्छङ्कराचार्यैः । कविद्वयानुभवोऽत्यन्तं सुसदृश इति भाति । क्वचन समयेति प्रलयापत्संकटस्य निर्देशानर्हत्वम् । 'तथाभूतां दृष्ट्वा नृपसदसि पाञ्चालतनयाम्' इतिवत् । निर्हेतुकसहजकृपयान्योन्यसंघर्षरूपपीडां विनैव सर्वमपि पृथक्पृथगेव न्यस्य रक्षति । यद्यपि विश्वं कृत्स्नं न्यस्तं तदल्पमिव गूढं भवति गम्भीरे नाभौ । ईदृशं विश्वनिगरणानुगुणपरिमाणवदेकैकावयवं वस्तु निरतिशयसूक्ष्मायां कलेवरान्तर्हृदयगुहायां गूढं निहितं वर्तत इत्यतोऽपि परं किमाश्चर्यम् । ईदृशबृहद्विग्रहविशिष्टेनैवानेन रङ्गशायिना मम हृदयेऽन्तर्वर्तिष्यते । यद्यपि व्यष्टिसृष्टिरूपव्यापारो वेधसः सृष्ट्वा तद्द्वारा कारयिष्यते, प्रलयापदि विश्वस्य स्वस्मिन्निक्षिप्य रक्षणस्य अन्यैरशक्यत्वात्साक्षात्स्वयमेव तत्करणम् । यस्यां विश्वमभिसंविशति, तयैव सृष्टिरपि कार्यते स्रष्टृसृष्ट्या । १. दामोदरीयोदरवर्णने 'गम्भीराकारनाभीचतुरतरमहावर्तशो-

भिन्युदारे' इति श्रीशंकराचार्याः । गाम्भीर्यं विश्वगूढनिक्षेपेण सम्यगुपपादितं भवतीत्याचार्याणामाशयः । तैरनुभूतं चतुरतरमहावर्तशोभित्वं चानुभूयते आचार्यै रम्यावर्तद्युतिसहचरीति । ३. गम्भीरत्वान्नाभेरावर्तवत्त्वाच्च तस्याः परित एव गमनमिति 'ऊर्ध्वमभ्येति नाभिम्' इत्यनुवादः ॥

नालीकेन स्फुरितरजसा वेधसो निर्मिमाणा । १. यद्यपि शुद्धसत्त्वमये भगवन्मूर्तौ न रजोगुणसंभवः, पद्मत्वान्नाभीनालीकस्य पद्मस्वभावप्रयुक्तपरागमात्रं स्यादेव । रजस एव रजोमूर्तीनां चतुर्मुखानां संभवः स्यात् । रजःस्फुरणं विना न सर्गारम्भः संपद्येत । रजोगुणाभावेऽपि सन्त्येव नालीकरजांसि, येषां स्फुरणात्स्रष्टारः सृज्येरन् । २. 'भूयाद्भूयस्त्वयम्भूमधुकरभुवनं...नालीकं नाभिपद्माकरभुवमुरु तन्नागशय्यस्य शौरेः' 'गीर्वाणपूज्यं कमलजमधुपस्यास्पदं तत्पयोजम्' इति श्रीशाङ्करानुभवः ॥

रम्यावर्तद्युतिसहचरी । १. कान्त्यम्भःपूरपूर्णं नाभीसरः । निम्नत्वाद्गम्भीरत्वाच्च नाभेरुपर्यवयवेभ्यः प्रतिक्षणं प्रवहन्तो लावण्यौघाः नाभौ वेगेन पतन्ति । अतो लावण्यावर्ताः सततं तत्र परिदृश्यन्ते । रम्यावर्तानां नयनहारित्वाद्दिदृक्षा जायेतैव । भयमप्युत्पद्येतातिसमीपगमने । अतः परितो गमनम् । २. आवर्तत्वेऽपि नाशुभदुःखावर्तत्वम्, किं तु परमशुभरम्यावर्तत्वम् । तस्मादेतदभिगमनरूपावर्तने शुभमेव

स्यात् ॥

रङ्गनाथस्य नाभिः । १. नाथशब्दोऽत्र श्लिष्टतरः । नाभेरेव सर्वलोकैकनाथत्वं स्पष्टं भवति । 'त्रयो देवास्तुल्यास्त्रितयमिदमद्वैतमधिकं त्रिकादस्मात्तत्त्वं परमिति वितर्कान्विघटयन् । विभोर्नाभीपद्मो विधिशिवनिधानं भगवतस्तदन्यभ्रूभङ्गीपरवदिति सिद्धान्तयति नः ॥' इति श्रीभट्टारकाणां विचित्रो नाभ्यनुभवः प्रत्यभिज्ञाप्यते सर्वस्मात्परत्वबोधकेन विभुशब्दपर्यायेण नाथशब्देन । तिष्ठतु शारीरकप्रणेता वेदाचार्यः केशवपरत्वसिद्धान्तयिता । तिष्ठतु श्रीमल्लक्ष्मणमुनिः । इयं नाभिरेव प्रत्यक्षप्रदर्शनेन भगवत्परत्वं सिद्धान्तयति । एतदेकदेशभूतास्पद्माद्वेधस उत्पद्यमाना दृश्यन्ते । तत उत्पद्यन्ते सर्वे इतरेऽपि । २. विश्वस्यात्मभूतो भगवान् 'भुवनस्य नाभिः ।' विश्वनाभेस्तस्यापि मध्यस्था नाभिः । परममध्यस्थया निर्णायं प्रदर्शितः सिद्धान्तः साधुरेव स्यात् ॥

श्रीवत्सेन प्रथितविभवं श्रीपदन्यासधन्यं
मध्यं बाह्वोर्मणिवररुचा रञ्जितं रङ्गधाम्नः ।
सान्द्रच्छायं तरुणतुलसीचित्रया वैजयन्त्या
सन्तापं मे शमयति धियश्चन्द्रिकोदारहारम् ॥६॥

रम्यावर्तद्युतिसहचरीत्युपरिभागात्पतल्लावण्यप्रवाहा व्यञ्जिताः । ततो वक्षस्थलं प्रति नीयेतैव भावुकं मनः । ऊर्ध्वारोहेण

गम्भीरविशालनाभीपर्यन्तप्रदेशपर्यटनेन च नितान्तश्रान्तं मनः भूयो विश्रमार्थि स्यादेव। अत एव वक्षःस्थले वस्यौकर्यबाहुल्यं प्रदर्श्यते । आस्ते तत्र माता भर्तुर्वल्लभतया तत्प्राणेश्वरी वात्सल्यनिर्भरा । सन्ति च तत्रास्मत्सजातीया असंख्याश्चेतना मणिवर इव भगवतो हृद्या नित्या मुक्ताश्च ॥

श्रीवत्सेन प्रथितविभवम् । '१. लक्ष्मीपद्लाक्षैकलाञ्छनम्' 'श्रीपदन्यासधन्यम्' इति च विरुदाङ्कितत्वमास्तां नाम। ऋद्धभृगुपदन्यासधन्यंमन्यत्वमेवास्य नितान्तशोभावहमिति व्यज्यते । अस्मत्सजातीयचेतनपदन्यासं यद्यप्यात्मनो धन्यतावहं मन्यते भगवान्, नास्माभिस्तात्त्विकमपि प्रकाशतया वाच्यमिति गूढतया व्यञ्जनं भृगुपदताडितवृत्तान्तस्य । तत्ताडनकृतचिन्हस्यैव लक्ष्मीपदकमलन्यासादपि भूयस्या बहुमत्या माननं व्यज्यते तत्प्रथमोपादानेन । २. भगवद्वक्षःस्थलनित्यवासरसिका खलु श्रीस्तत्क्षान्तिसंवर्धनार्थम् । क्षान्तिकाष्ठापरीक्षैव कृता देवतापरत्वं जिज्ञासमानेन ब्रह्मपुत्रेणेश्वरकनिष्ठभ्रात्रा भृगुणा । तत्परीक्षोत्तीर्णत्वाद्भगवतस्तदेव सर्वोत्कृष्टबिरुदतया प्रथमं प्रशस्यते । श्रियाध्युषिते वक्षसि पादकठिनताडनरूपो महत्तमोऽपराधोऽपि न केवलं क्षान्तः, परं तु स एव निरतिशयगुणत्वेन भोग्यतया भूषणतया च सततं हृदये निवृत्तिकथागन्धरहितं लाल्यते । श्रीसान्निध्यसिद्धभगवत्क्षमाया अनुष्ठानकाष्ठालक्षणप्रामाण्यं प्रथमं प्रदर्श्यतेऽस्मद्विश्वासहेतोः, निः-

संकोचं निःशङ्कं भृगुपदादपि कठोरतरस्य कुलिशकठिनस्यास्म-न्मनसः संचरणसंपादनार्थं च । ३. मलिनः क्षामो द्विजो धम-निसन्ततः कुचेलः 'दोर्भ्यां पर्यग्रहीन्मुदा' 'पर्यङ्कस्थां श्रियं हित्वा परिष्वक्तोऽग्रजो यथा' इति स्वयंग्रहेण भगवता श्लिष्टो 'यद्दरिद्रतमो लक्ष्मीमाश्लिष्टो बिभ्रतोरसि' इत्यात्मनो भगव-त्परिष्वङ्गानर्हतामेव मेने । 'शयानं श्रिय उत्सङ्गे पदा वक्षस्य-ताडयत्' इति भृगुपदताडितः स्वतल्पादवरुह्य वक्षोमात्रस्य भागवतपादरेणुपवित्रतायामनलंबुद्धया उत्तमाङ्गस्य शिरसो-ऽपि पवित्रतास्त्विति शिरसा तत्पादयोः प्रणम्य 'अद्याहं भगव-ल्लक्ष्म्या आसमेकान्तभाजनम् । वत्स्यत्युरसि मे भूतिर्भवत्पा-दहतांहसः ॥' इति खलु प्रणयवागुत्सृष्टा भगवता । ४. परत्व-काष्ठाप्रदर्शनं कृतं नाभीवर्णने । अनुपदमेव न तादृशपरत्वेन वि-भवप्रथा, किं तु नैच्यकाष्ठया क्षान्तिकाष्ठया च विस्तीर्णप्रसि-द्धविभवम् । ५. 'श्रीवत्सोल्लासि' इति वक्षोऽनुभवः श्रीशंकरा-चार्याणाम् । पृथगेकेन श्लोकेन श्रीवत्सशोभानुभूयते तैः । 'श्रीवत्सः श्रीपतेः स श्रिय इव दयितो वत्स उच्चैः श्रियं नः ।' इति वत्सभूतभक्तपदताडनाङ्के वत्से इव श्रियः स्नेह इत्यति-चारु प्रदर्श्यते तैः । श्रियो वत्सवत्प्रियत्वाच्छ्रीवत्स इति समा-ख्या । न केवलं भगवद्बहुमतः, स्वसमवेतकान्तवक्षस्ताडनेऽपि तच्चिन्हस्य तथापि वत्सवत्प्रीतिलालितत्वम् । 'श्रीरङ्गराजकम-लापदलालितत्वम्' बहु मन्यन्ते श्रीभट्टपादाः । तावुभौ तु क्रुद्धभृगुपदताडनचिन्हं बहु मन्येते ॥

श्रीपदन्यासधन्यम्। १. भृगुपदन्यासधन्यत्वमुक्तम्। इदानीं वल्लभाचरणन्यासधन्यत्वमुच्यते। भृगुपदन्यासधन्यत्वं तद्बुद्ध्या। श्रीपदन्यासधन्यत्वं तद्बुद्ध्यास्मद्बुद्ध्या च। तेनैव चिन्हेन वेदान्तैरपि तत्त्वचिन्तातरणं क्रियते। तच्चिन्हेनैव तत्परत्वनिर्णयः। यथा रघुपतिपदानि पुंसां धन्यत्वेन संकीर्त्यन्ते तद्वक्षः श्रीपदन्यासधन्यं भवतीति संकीर्त्यते। २. नायकपादाम्भोजं यया करकमललालितमभूत्, या नायकोरुद्वन्द्वमुपधानीकृत्य सुखं सुष्वाप, तस्या एव पादाम्भोजमादरेण स्ववक्षसि विन्यस्य भगवता बहु मन्यते। भगवत्पादाम्भोजलालनेनास्माभिरपि भगवद्वक्षसि नियतवासः संपाद्येतैव। तदेव प्रदर्श्यते मणिवररुचा रञ्जितमिति॥

मध्यं बाह्वोः। १. विद्युल्लतावच्छोभमानलक्ष्मीकान्तिभूषितत्वादप्यतिसुन्दरबाहुमध्यस्थत्वं भूयः शोभावहमिति व्यज्यते। २. वक्षोदर्शने परिष्वङ्गाशा जायेतैव। अपराधचक्रवर्तिभिरस्माभिर्भीतभीतैर्न परिरम्भणे प्रयत्येत। तादृशसंकटे स्वयं परिरम्भेच्छां प्रदर्शयन्तावखिलप्रार्थनापारिजातौ बाहू दृष्टिपथं प्राप्य परिष्वङ्गप्रत्याशां जनयन्त इति व्यज्यते॥

मणिवररुचा रञ्जितं रङ्गधाम्नः। १. श्रीपदन्यासेनापि न तादृशं रञ्जनं भगवतः, यादृशं मुक्तचेतनसंनिधिना। शुद्धचेतना एव नारीणामुत्तमवधूभूतात्स्त्रीरत्नादप्युत्कृष्टा मणिवराः।

क्षीरनाज्जीवरत्नमुत्कृष्टमिव । नित्यवल्लभाया यन्निवासस्थानं तदेव दीयते तदानीमेव मुक्तानामपि । 'त्वयि किंचित्समापन्ने किं कार्यं सीतया मम' इति खलु तस्य बहुमानो नूतनेष्वाश्रितेषु । २. यावच्चेतना न रक्षिताः सज्वरोऽकृतकृत्यश्च सः । यदा एकोऽपि चेतनो मुच्यते तदानीमेव तस्य तद्विषयचातुर्थिकज्वरनिवृत्तिस्त्वद्रक्षणप्रयुक्तचित्तरञ्जनं च । ३. यथाशेषाणामस्माकं चित्तं रज्यते रङ्गधाम्ना, तथा मणिवरांशभूतैरस्माभिस्त्वद्धृदयं रञ्जितं भवति । अस्माभिस्तत्समीपगमने तदुपासने तच्चित्तं रञ्जितं भवति । ४. य आनन्दमयः सर्वानानन्दयत्यन्येषां सर्वेषां य आनन्दहेतुः सोऽपि चेतनमोक्षात्पूर्वं दुःख्यन्नेव तन्मोक्षेण तदागमनेन चानन्दितो भवति । अत एव तदतिशयाधायकत्वरूपशेषत्वस्यास्माकं संभवः । इतरथा कमतिशयं वयं तस्य निष्पादयेम । ५. यद्यपि महातेजस्वी रङ्गधामा, सोऽपि कौस्तुभरुचाधिकं शोभते । रक्षितचेतनज्योतींषि विशेषशोभाधायकानि ॥

सान्द्रच्छायं तरुणतुलसीचित्रया वैजयन्त्या । शैत्यसुखानुभवः । भ्रान्त्यपक्रान्तिः । वैजयन्ती यद्यपि भूतमाला भवति, तत्संबन्धेनैव धीसन्ताप इति च 'वैजयन्त्या सन्तापम्' इत्यव्यवहितसहपाठेन द्योत्यते, तथापि भगवद्विभूषणत्वेन तस्या एव पञ्चभूतमालाया अनुभवे तस्याः परमानुकूल्येन भोग्यत्वमेव । यदेव भगवत्पृथक्त्वेनानुभूतं तापकमभूत्तदेव

तद्भूषणत्वेन तद्विशेषणतैकस्वरूपेणानुभूयमानं तत्तापशमनं सञ्जातम् ॥

सन्तापं मे शमयति धियः । १. बाह्यसन्तापो बाह्यशैत्यसामग्र्या निवर्त्येत । आन्तरोऽयं संतापः भगवद्धृदयप्रसत्तिं विनापरिहार्यः । तत्प्रसादश्च वर्णितसामग्रीसंपत्त्यैव संपाद्यः । २. अनुदिनं प्रत्यूषसमये उद्यन्तमादित्यं वीक्ष्य न वयं बाह्यान्धकारनिवृत्त्या बाह्यचक्षुःप्रचोदनेन तृप्यामः, किं तु तन्मण्डलान्तर्वर्तिपरमात्मानमान्तरतमोनिवृत्त्या धियो विकासयित्वा तत्प्रचोदनं प्रार्थयामहे इति खलु गायत्रीमन्त्रेण वदामः । धीसन्तापशान्तिरेवास्माभिरन्वेष्टव्या । ३. 'दोर्भ्यां स्तनान्तरगतं परिरभ्य कान्तमानन्दमूर्तिमजहादतिदीर्घतापम्' इति खलु कुब्जाया भगवदाश्लेषेण सकलतापनिवृत्त्यनुभवः । ४. धियः संतापस्तापकविषयसङ्गादेव । तापके च रजस्तमसी । 'अश्रान्तसंसरणघर्मनिपीडितस्य श्रान्तस्य मे विषयभोगमरीचिकासु' इत्याचार्याः । अशुभविषयेभ्यो मनसः प्रत्याहरणे एव धीसंतापनिवृत्तिः । तद्वर्णनेन प्रत्याहाररूपयोगाङ्गनिष्पत्तिर्व्यज्यते । इन्द्रियाणां स्वविषयासंप्रयोगः प्रत्याहारः ॥

चन्द्रिकोदारहारम् । तापनिवृत्तिवर्णने चन्द्रिकाप्रस्तावोऽतीव शोभनः । प्रसन्नभगवद्धृदयादेव चन्द्रमसां प्रसूतिः । हृदयप्रदेशवर्णने तदुत्पद्यमानचन्द्रिकाग्रहणं हृद्यम् । 'जगदाह्लादनो जज्ञे मनसस्तस्य चन्द्रमाः । परिपालयितव्येषु प्रसाद इव

मूर्तिमान् ॥' इति यादवाभ्युदये । विपश्चिद्भूतभगवद्धृदयसतत-संसर्गाद्धारस्यापि चन्द्रिकोत्पादेन तद्वात्तत्वरूपौदार्यमपि स्यादिति व्यज्यते । हारमुक्ताः चन्द्रिकाप्रभामुत्पादयन्ति । आरोक्ष्यमाणस्य योगस्य फलवत्त्वव्यञ्जनोपक्रमोऽपि सूच्यते हृदयदेशवर्णनप्रयुक्तोदारशब्देन । एतदेवानन्तरश्लोके पारिजातमिति, तदनन्तरश्लोके उदारनेत्रमिति च दृढीक्रियते । करिष्यमाणमस्युदारभुजवर्णनं सम्यगवतार्यते एतच्छ्लोकान्तस्थोदारशब्देन ॥

एकं लीलोपहितमितरं बाहुमाजानुलम्बं
प्राप्ता रङ्गेशयितुरखिलप्रार्थनापारिजातम् ।
दृप्ता सेयं दृढनियमिता रज्जुभिर्भूषणानां
चिन्ताहस्तिन्यनुभवति मे चित्रमालानयन्त्रम् ॥

मध्यं बाह्वोरित्यवतारितबाहुवर्णनम् । कथं प्रत्याहारसिद्धिः संभवेत् । हस्तिनी खलु मम चिन्ता । 'कलभचरणे लूतातन्तुः कथं निगडायते ।' 'स्वबलेन हन्त मनसो निवर्तनं बिसतन्तुनेव सुरदन्तियन्त्रणम्' इति च दुर्दान्तायाः कथं निरोधः । अतिचपला मम चिन्ता क्षणे क्षणे प्रवृद्धकामा स्त्री या हस्तिनीति व्यवह्रियते । यद्यपि सा विषयेभ्यः क्षणं प्रत्याह्रियेत पुनस्तानेव धावेत् । अतः कथं धारणसंभव इत्याशङ्कायां स्वबलेन धारणं खलु दुःसाधम्, भगवतो बलेन बद्धाहुभिर्बलादस्मन्मनो बद्ध्वा स्वस्मिन्धारणे को वा धारणप्रयासोऽस्माकम् ॥

एकं लीलोपहितम् । १. 'श्यामः श्रीरङ्गेशयितुरुपधानीकृतभुजम्' इति श्रीभट्टपादानामनुभवः प्रत्यभिज्ञाप्यते । २. न मायोपहितो बाहुः, किं तु लीलोपहित इति च व्यज्यते । ३. न तत्त्वतो निद्राति, नोपधानमपेक्षते, किं तु नाटयति निद्राम् । ४. प्रणतबहुफले एकैश्वर्ये स्थितोऽपि बाहुमेव लीलयोपधानीकरोति भक्तमनोरञ्जनार्थम् । को वा भावो भगवतो भुजस्य लीलोपधानीकरणे । 'भवार्तानां वक्त्रामृतसरसि मार्गः प्रदर्शितो भवति' स्वयं हस्तेन । यथाध्वपरिश्रान्तानामातपतप्तानां तृष्णाशमनार्थं मार्गसमीपवर्तितटाकमार्गं दर्शयितुं हस्तचिन्हवन्तो दारुस्तम्भा निवेश्यन्ते राज्यनिर्वाहकैस्तथा परमोदारः परमवत्सलो रङ्गराजः साक्षात्स्वहस्तेनैवोत्फुल्लपङ्कजतटाकमिव सर्वतापहरामृतसरोभूतं वक्त्रं स्पृष्ट्वा तत्प्रदर्शयति तापत्रयघर्मतप्तानां भविनाम् । किं च हस्तस्य 'वरदत्वं स्वयं वक्त्रेण संदर्शितं भवति ।' अर्चायां मौननियमाद्वक्त्रेण हस्तं स्पृष्ट्वा 'अयं वरदः' इति संदर्शयति । मुख्यार्थैकैकशब्देन दक्षिणहस्तोऽभिप्रेतः । अत एव दाक्षिण्याभिमुख्यं भवति ॥

इतरं बाहुमाजानुलम्बम् । जानुपर्यन्तं बाहुं प्रसार्य 'पादद्वन्द्वमिदं शरण्यमभयं भद्रं च वो हे जनाः' इति पादौ प्रदर्शयतीव । पूर्वमनुभूतमेव जानूर्ध्वगतया मनीषया पुनरप्यनुभूयते आजानुलम्बिभुजदर्शनेन । तत्प्रादिदर्शयिषितपादावप्यनुभूयेते । वृत्तस्याप्यनुभवस्य पुनरनुभवेन धारणं क्रियते ।

धारणं ह्यस्मिन्श्लोके प्रतिपिपादयिषितम् । बाहुच्छायासंवलिता जानुच्छाया द्विगुणसुभगा भवति ॥

प्राप्ता रङ्गेशयितुः । शयानो भगवान्निद्रातीति कृत्वा तद्बाहुसमीपं सौन्दर्यानुभवाय निर्विशङ्कं याता । 'सुप्तस्य मुखमवलोकयन्त्या' इति कामसूत्रोक्तवत्, 'निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्' इतिवच्च सुप्तभर्तृशोभानुबुभूषा सहजैव ॥

अखिलप्रार्थनापारिजातश्च । १. अत्र वृक्षत्वरूपणं 'बाहुच्छायामवष्टब्धो यस्य लोको महात्मनः' इति छायाप्रदानेन प्रसिद्धं शीतलोदाररक्षणमपि द्योतितं भवति । उपसन्नमात्रस्य काङ्क्षितदानमपि सूच्यते । २. केयमखिलप्रार्थना । सर्वस्वप्रार्थना । दातुः सर्वस्वं प्रार्थ्यते । किं च भगवत्सर्वस्वम् । तत्परिष्वङ्गः । 'एष सर्वस्वभूतो मे परिष्वङ्गः' इति खलूक्तं तेन । तथैव 'धनं मे भूरि नाददत्' इत्युक्तप्रकारेण यस्मै कुचेलमुनये धनं भूरि वाभूरि वा न साक्षाद्दत्तम्, धानामुष्टिमोचनात्प्रागेव तस्मै सर्वस्वं दत्तम् 'दोर्भ्यां पर्यग्रहीन्मुदा' इत्युक्तसानन्दपरिरम्भणेन । यद्यपि 'दास्यति द्रविणं भूरि सीदते ते कुटुम्बिने' इति वित्तविवित्सां प्रदर्शितवत्यै क्षुत्क्षामायै धनं भूरि कुचेलागमन एव दत्तम्, 'अयं हि परमो लाभ उत्तमश्लोकदर्शनम्' इति दर्शनमात्रं परमलाभं मन्वानस्य परिष्वङ्गदानं वाञ्छितादधिकमेव । यद्यपि कुचेलोऽपि

भार्याधनभागी वा तत्स्वामी वा भवति 'यस्यैते तस्य तद्धनम्' इति वचनेन, तद्धनमानुषङ्गिकमेव तस्य । तेनानुद्दिष्टत्वात्, पत्न्या एव प्रथमं संप्रदानीकृतत्वाच्च । अत्रापि 'अखिलप्रार्थनापारिजातम्' इत्युक्त्वानुपदमेव 'त्वद्बाहुभिर्मम दृढं परिरभ्यते धीः' इतिवत्स्वयं बाहुभ्यां बद्ध्वा परिरम्भणमेव फलतया प्रदर्श्यते ॥

दृप्ता । न केवलं प्रपत्त्यारोहे दृप्तता । निदिध्यासनारोहेऽपि दृप्तता, दृप्तस्वभावत्वात् ॥

सेयम् । या पूर्वं परमदुर्दान्ताभूत्सैवेयम् ॥

दृढनियमिता । १. वध्यते दृढं सर्वबन्धमोचनाय । भगवत्सनुप्रवेशो सर्वबन्धविगलनम् । २. 'चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्' इत्याद्यर्जुनप्रश्ने 'असंशयं महाबाहो मनो दुर्निग्रहं चलम्' इत्यादिभगवत्प्रतिवचनम् । यन्मनो दृढं प्रमाथि तत्स्वकीयमपि महाबाहुनार्जुनेन दुर्निग्रहम् । भगवद्बाहुभ्यां त्वस्मदीयं मनो दृढं बद्ध्यते । मनसो दृढमेव बन्धनमुचितम् । ३. प्रत्याहृतस्य मनसो लक्ष्ये धारणं नाम योगाङ्गमत्र विवक्ष्यते । तच्च भगवता कार्यते । 'देशबन्धश्चित्तस्य धारणा' इति धारणालक्षणं योगसूत्रे । 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरम्' इति स्वयंग्रहेण भगवत्परिष्वक्तस्य मनसस्तस्मिन्धारणं सुकरमेव । ४. धारणाध्यान-

समाधिसंघातस्य 'त्रयमेकत्र संयमः' इति संयमसंज्ञा । सोऽपि संयमः प्रत्यभिज्ञाप्यत इव नियमितशब्देन । अत्रैव हि संयमप्रारम्भः ॥

रश्मिभिर्भूषणानाम् । १. भूषणानां कान्तयः सूक्ष्माः स्युः । ताभिः कथं हस्तिनी बद्धयेत । 'कलभचरणे लूतातन्तुः कथं निगडायते, ' 'बिसतन्तुनेव सुरदन्तियन्त्रणम्' इति तस्य दुःसाधताचार्यैरेव प्रदर्श्यते । बन्धनस्यैवासंभवे कथं दृढनियमनम् । चिन्ताहस्तिनी खल्वियम् । अतिसूक्ष्मं मनः । तद्वृत्तिभूतचिन्ता सूक्ष्मतरैव स्यात् । सौक्ष्म्यादेव तस्याः स्वैरगतिरतिद्रुतगतिः कुत्राप्यप्रतिहतगतिश्च । अतिसूक्ष्मायास्तस्यास्ततोऽपि सूक्ष्मतराभी रज्जुभिरेव बन्धनं स्यात्, न स्थूलाभिः । न हि सूची रथरज्जुभिर्बध्येत । अतः सूक्ष्मतराः कान्तयः सूक्ष्मां चिन्तां बद्धुं प्रभवेयुः । बद्धापि ततो गलनार्थमितस्ततो वलत इति 'वलति भुजयोः' इति वक्ष्यते । २. हस्तिनीसंज्ञिता स्त्री स्त्रीस्वभावाद्विचित्रभूषणकान्तिभिरेव संमोहैकत्र बध्येत । निरतिशयः खलु संमोहः स्त्रीणामाभरणेषु । भूषणलाभादूनं सर्वं सुखं तासाम् । भूषणैर्बन्धनं निगडनं च तासां परमभोग्यमेव । अत एवालानयन्त्रबन्धनस्याप्यनुभाव्यतोक्तिः 'अनुभवति' इति । ३. यद्यपि स्वबलेन मनसो बन्धनं दुःशकम्, भगवद्बलेन बन्धनं सुशकमेव ॥

चिन्ताहस्तिन्यनुभवति मे । 'आशागजेन्द्रानपि' इति

श्लेषेण मानसकल्पितगजेन्द्रान्दिग्गजांश्च वर्णयति भट्टबाणः। अत्र चिन्तैव हस्तिनी । हस्तिनीपदं च 'स्थूलाधरा स्थूलनितम्बबिम्बा स्थूलाङ्गुलिः स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितान्तभोक्त्री खलु हस्तिनी स्यात् ॥' इति लक्षितं स्त्रीजातिविशेषमप्याचष्टे । इभीसाम्यार्थं सर्वावयवस्थौल्यप्रदर्शनं लक्षणश्लोके ॥

चित्रमालानयन्त्रम् । १. 'सर्वाश्चर्यमयो देवः' किमस्य न चित्रं भवति । मद्हस्तिनी भूषणरश्मिभिरालानयन्त्रे बद्धा । २. 'बध्वा गृहाण वृषशैलपतेर्दये मां त्वद्वारणं स्वयमनुग्रहशृङ्खलाभिः' इत्यादि स्मार्यते । ३. यन्त्रारूढानयोगिनः संसारिणो भ्रामयेद्देवेश्वरो मायया । भ्रामणार्थमेव तत्र यन्त्रारोपणम् । अत्र संसरणरूपभ्रमणात्यन्तिकनिवृत्तये स्वबाहुयन्त्रे वा तद्भूषणयन्त्रे वा बन्धः । न मायायन्त्रे बन्धः, किं तु मायातारयितृबाहुयन्त्रे ॥

साभिप्रायस्मितविकसितं चारु बिम्बाधरोष्ठं
दुःखापायप्रणयिनि जने दूरदत्ताभिमुख्यम् ।
कान्तं वक्त्रं कनकतिलकालंकृतं रङ्गभर्तुः
स्वान्ते गाढं विलगति मम स्वागतोदारनेत्रम् ॥

लीलोपश्लिष्टबाहूनुभवे वक्त्रानुभवोऽपि स्फोरितः । बाहुभ्यां दृढं परिरब्धालानयन्त्रे बद्धा तत्र वलिता धीस्तृषितैव स्यात्

वक्त्राभिख्यापानेन पिपासा शममेष्यति ॥

साभिप्रायस्मितविकासितम् । १. 'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम् । ततोऽनुकुर्याद्विशदस्य तस्यास्ताम्रोष्ठपर्यस्तरुचः स्मितस्य ॥' इति कुमारसंभवे । तत्रोष्ठस्मितयोर्विशिष्टानुभवः । इह तयोः सहपाठेऽपि पार्थक्यानुभवः समप्राधान्येन । भगवदभिप्रायोऽनुकूलो वा न वेति जिज्ञासोत्कटैव स्यात् । तदनुकूलत्वनिर्णयश्च ध्यानारम्भ एव कार्यते स्मितप्रदर्शनेन । २. 'पादादि यावद्धसितं गदाभृतः' इति श्रीशुकमुनयो भावनामार्गोपदेशे । पादावारभ्य हस्तपर्यन्तं वर्णयेदिति वा, यावद्गदाभृद्भावनया प्रसन्नो मन्दहासं प्रदर्शयेत्तावत्पर्यन्तं भावनां कुर्यादिति वा अर्थः स्यात् । कामं गदां बिभर्तु भाव्यमानो भगवान् । भावनाप्रीतो मन्दं हसेदेव । मन्दहासरूपस्मितमेव तदानुकूल्यद्योतकम् । तदनुकूलसंकल्पोदय एवास्माभिर्दिदृक्ष्यते । ३. अतिशयाधायकतैकरूपशेषजनसंनिधौ शेषिवक्त्रस्य विकासरूपातिशयप्राप्तिः । विकसितशब्देन शेषकारितशेष्यतिशयो व्यज्यते । ईदृशोऽतिशयोऽस्माभिराधीयते । अस्मदुत्सवेषु सर्वेषु पितेव खलु स परितुष्यति ॥

चारुबिम्बाधरोष्ठम् । १. अधरशीधुनाप्यायनं मनोरथीक्रियते । २. रक्ततां प्रदर्शयतीवोष्ठम् ॥

दुःखापायप्रणयिनि जने दूरदत्ताभिमुख्यम् । १. मा-

स्त्वहेतुकः प्रणयो मद्विषये । स्वदुःखापायमुद्दिश्यापि मयि प्रणयेनालम् । १. मास्तु मद्विषये प्रणय एव, स्वदुःखापाये प्रणयवांश्चेदलमिति च भगवदभिप्रायः । सोऽप्यभिप्रेतः स्वा-द्भगवदभिप्रायत्वेनाचार्यप्रयुक्तस्वाभिप्रायशब्देन । स्वदुःखापाय-मपि न स्पृहयन्ति प्रायेण जनाः । 'सुखयाते दुःखमित्यत्रोद-यस्व माम्' इत्युक्तरीत्या दुःखमेव सुखं मत्वा तत्र सज्जन्ते-ऽविवेकिनः । 'दुःखमेव सर्वं विवेकिनः' इति योगसूत्रम् । ३. यद्यपि वयं पराङ्मुखा गोविन्दे, सोऽस्मदागमनदिशि वि-वृत्तवदनोऽभिमुखीभूय 'पिता ते सार्वभौमस्त्वां दिदृक्षुरास्ते ।' इत्युक्तप्रकारेणास्मदागमनप्रतीक्षो वर्तते । ४. यद्यपि वाग्वद्धा-र्चासमाधिनिर्बन्धेन, स्वाभाविकपूर्वभाषित्वनियमो न त्यज्यते परमदक्षिणेन । पूर्वभाषित्वव्रतभङ्गं तूर्णं परिजिहीर्षत्याश्रयि-जनोपसदनात्प्रागेवाभिमुखीभवनेन । यथाकथञ्चिदाश्रयिपूर्व-त्वं संपादितं स्यादिति । 'पूर्वभाषी च राघवः' 'स्मितपूर्वाभि-भाषी च ।' यद्यप्युपसत्तृपूर्वत्वं संभाषणविषये राघवस्य, तस्मा-दपि पूर्वत्वं तत्स्मितस्येति भावः । अत एवात्रापि प्रथमं स्मितव-र्णनम्, अनन्तरमभिभाषणस्थाननिविष्टाभिमुख्यवर्णनम् ॥

कान्तम् ! १. दूरादेवाभिमुख्यं दत्वास्मान्कामयमानमे-वास्ते । कमितृत्वात्कान्तम् । दूरदत्ताभिमुख्यं कान्तमिति सहपाठेनैषोऽर्थो व्यज्यते । २. 'चन्द्रकान्ताननं रामम्' इति चन्द्रवत्कान्तमिति वा चन्द्रात्कान्तमिति वा स्यात् । तस्यापि

गन्धर्वराजप्रतिमस्य रामचन्द्रस्य चक्षुष्यमिदम् । चन्द्रकान्ताद्रामाननादपि कान्ततरमिदम् । निरुपपदकान्तशब्देनासदृशकान्तिमत् ॥

वक्त्रम् । वक्तीव स्वस्योत्कटामुत्कण्ठाम् । वक्ति इदं वक्त्रम् । 'वाचं विनापि वदसीव मयि प्रसादम्' 'संभाषमाणमिव सर्ववशंवदेन मन्दस्मितेन मधुरेण च वीक्षणेन' इत्यादि स्मार्यते । लोकोत्तरनटस्य रङ्गनटस्य मुखाभिनयेनैव भावप्रदर्शनं सुलभमेव । अभिनयेनैव सर्वं वाक्कृत्यं निर्वहेत् । 'अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः' इति खलु नाट्यज्ञानां वचनकुशलता ॥

कनकतिलकालंकृतम् । १. हिरण्मयस्य पुरुषस्योत्तमाङ्गस्यानुरूपं भूषणम् । २. 'कनकसरितः' इति पादवर्णने, 'कनकतिलकालंकृतम्' इति मुखवर्णने । कनकेनोपक्रम्य कनकेनैवोपसंह्रियते । उत्तरश्लोकस्योपसंहारश्लोकत्वेऽपि मूर्धजानां कनकवर्णत्वानौचित्यात्तदुपश्लिष्टकनकमयकिरीटस्य विशेष्यतया मुख्यत्वेन तत्र प्रदर्शनं क्रियते कनकमयत्ववर्णनप्रक्रमभङ्गभीरुणा । ३. अत्र न पुण्ड्रग्रहणं क्रियते, 'त्रस्य ब्रह्मविदागसः' 'ब्रह्मविदपचारदूरगं पुरुषम्' इति ब्रह्मविदपचारभीरुतया । भगवद्रामानुजदयापात्राणां केषांचिदपि तापो नोत्पाद्य इत्याचार्याणां मुख्योऽभिप्रायः । श्रीमच्छङ्कराचार्यास्तटस्थत्वान्निःशङ्कं भगवत ऊर्ध्वपुण्ड्रमन्वभूवन् 'भूयाद्भूत्यै विभूत्यै मम

भुवनपतेर्भ्रूलताद्वन्द्वमध्यादुत्थं तत्पुण्ड्रमूर्ध्वं जनिमरणतमःखण्डनं मण्डनं च' इति । श्रीमद्भट्टपादैरप्यनुभूतमूर्ध्वपुण्ड्रम् 'आयत्किरीटमलिकोल्लसदूर्ध्वपुण्ड्रम्' इति । विभागपूर्ववृत्तित्वाद्वा, सर्वेषामपि रामानुजीयानां स्वस्य निरसूयबहुमानविषयत्वनिश्चयेन वा ते निर्विशङ्कं पुण्ड्रानुभवं प्राचीकशन् ॥

रङ्गभर्तुः । अङ्गयानुरूप्यमङ्गानाम् । अयं भर्ता बुभूषत्युपसत्तृमनीषाणाम् । अस्य वक्त्रमपि कान्तं बुभूषति ॥

स्वान्ते गाढं विलगति मम । १. 'रामभूतं जगत्सर्वं रामे राज्यं प्रशासति' इति तत्पूर्वं विष्णुमयत्वेन शास्त्राद्विदितं जगत्तदानीं राममयमभूदिति तन्मयतापादनदक्षे रामे योगिनां रत्यातिशयः प्रख्याप्यते 'रमन्ते योगिनः स्वान्ते' इत्यादिनिर्वचनश्लोकेन । अस्मत्स्वान्ते तथा रमते रामरतिविषयो रामाराधितो भगवानिति स्वान्तशब्दप्रयोगेण प्रत्यभिज्ञाप्यत इव । २. स्वयंप्रहस्वभावत्वात्सख्यकरणे प्रथमोपसदनशीलत्वाच्च स्वयमेव गाढविलग्नं भवति । उपस्थैर्यैरुपस्थितस्त्वेऽतुला ह्रीः खलु तस्य भवति । ३. 'गाढालिङ्गनसङ्गपीडितमुखम्' 'आसत्तियोगादविरलितकपोलम्' इति गाढालिङ्गने मुखस्य गाढविलग्नत्वं स्वारसिकम् । तदेव व्यज्यते गाढशब्देन । ४. उपासनीय एवास्मानुपसृत्य गाढं विलगति 'रामो राज्यमुपासित्वा' इतिवत् । ५. शिथिलविलगने गलेदिति भिया दृढं विलगति । 'वलति भुजयोः' इति विगलनप्रयत्नबाहुल्यं सूच्यत इव । ६.

गाढविलगनं च ध्यानं योगसप्तमाङ्गम् । तच्च भगवतैव निर्व-
र्त्यते । भगवता मनसि विलगने मनोऽपि तस्मिन्विलगेदेव ।
निरन्तरनिबिडसंयोगः संयुज्यमानयोरुभयोरपि नियतभावी,
द्विनिष्ठत्वात्संयोगस्य । ५. जीवेशयोः सामानाधिकरण्यमव-
श्यं संपाद्यम् । वयं तत्समीपं न गच्छामः । अस्माभिस्तदै-
काधिकरण्यं वा तेनास्मदैकाधिकरण्यं वा संपादनीयं सामा-
नाधिकरण्यसिद्धये । वयं कदाप्यात्मानं भगवति नान्तर्भाव-
यामः । वयं वयमेव स्वनिष्ठतया सदा पृथक्तिष्ठासामः ।
ब्रह्मनिष्ठा न कदापि बुभूषामः । 'लोकनाथोऽपि भगवानहं
बभूव' इति श्रीशठकोपमुनयः षष्ठशतकाद्वितीयगाथायां निरव-
धिककरुणया भगवान्स्वयमेवास्मदैकाधिकरण्यं निर्वर्तयतीति
विस्मयं प्रादर्शयन् । भिन्नप्रवृत्तिनिमित्तानामेकस्मिन्नर्थे वृत्तिः
सामानाधिकरण्यमिति लक्षणं वर्ण्यते श्रीमच्छङ्कराचार्यैः 'भि-
न्नप्रवृत्तिहेतुत्वं पदयोरेकवस्तुनि । वृत्तित्वं यत्तथैवैक्यं विभ-
क्त्यन्तकयोस्तयोः ॥ सामानाधिकरण्यं तत्संप्रदायिभिरीरि-
तम् ॥' इति ॥

स्वागतोदारनेत्रम् । १. ममेत्येतदत्राप्यन्वेति देहलीदीप-
न्यायेन । २. नेत्रशोभयैव मुखवर्णनमुपसंह्रियते । मुनिवाहनैर-
ष्टमश्लोके नेत्रौदार्यानुभवो विशेषतः प्रादर्शि । सोऽप्यत्र प्रत्य-
भिज्ञाप्यते उदारशब्देन । ३. आसन्ना योगसिद्धिः । फलदानं
भविष्यतीति सूच्यते उदारशब्देन । ४. उदारवीक्षणैः खलु

सेवारूपफलानुज्ञानं परमपदेऽपि । ५. नेत्रमुदारं स्वागतं प्रसूते । ६. 'ललाटे नाट्यरङ्गे' इति श्रीशाङ्करानुभवः । अभिनये मुखस्य प्रधानत्वान्मुखेङ्गितैर्भूयो भावप्रदर्शनं प्रदर्श्यतेऽस्मिन् श्लोके ॥

माल्यैरन्तःस्थिरपरिमलैर्वल्लभास्पर्शमान्यैः
कुप्यच्चोलीवचनकुटिलैः कुन्तलैः श्लिष्टमूले ।
रत्नापीडद्युतिशबलिते रङ्गभर्तुः किरीटे
राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे ॥

इदानीं केशपाशश्लिष्टकिरीटवर्णनम् । 'हिरण्यकेशः' इति श्रुतिः । अपर्यनुयोज्या सा । केशानामत्यन्तकार्ष्ण्यमेव शोभनम् । तथैव श्रीपरकालादीनामनुभवः । तथैव श्रीशंकराचार्यैः 'मालालीवालिधाम्नः कुवलयकलिता श्रीपतेः कुन्तलाली कालिन्द्यारुह्य मूर्ध्नो गलति हरशिरः स्वर्धुनीस्पर्धया नु ।' इति कार्ष्ण्यमवलम्ब्य विचित्रोल्लेखनम् । यथा श्रुतयो वा कवयो वा न कुप्येयुस्तथा वर्णनीयमस्माभिः । पूर्वार्धेन केशपाशवर्णनं विशेषणतया । किरीटस्य विशेष्यत्वेनैकेन पादेन वर्णनम् । वेलातीतपरिमलेनोपक्रान्तम् । स्थिरपरिमलैरेवोपसंह्रियते । स्थिरान्तःसुवासनैव प्राप्या योगसिद्धौ । 'स्नानार्द्रमुक्तेष्वधिधूपवासं विन्यस्तसायन्तनमल्लिकेषु । कामो वसन्तात्ययमन्दवीर्यः केशेषु लेभे रतिमङ्गनानाम् ॥' इति कामशास्त्ररीत्यापि भगव-

द्विषयकरतेस्तत्केशेषु चरमपर्वतावस्थापनं शोभनमेव ॥

माल्यैरन्तःस्थिरपरिमलैः। १. श्रुतिपरिमलस्यामर्यादं वेलातीतत्वम्। नीलामौलिमाल्यवासितपरिमलानामन्तःस्थिरत्वम्। २. अन्तःपरिमलैरन्तर्वासनाधीयेत। स्थिरान्तः परिमलान्यपेक्ष्यन्ते दुर्मोचोद्भटकर्मकोटिनिबिडदुर्वासनापनोदनाय। ३. यदि बहिर्दूरं प्रसरेयुर्वासनाः, गन्धवद्द्रव्यस्य सूक्ष्मावयवानामेव बहिर्निर्गमनात्कालक्रमेण विशीर्येत गन्धाश्रयं माल्यमेव। यद्यन्तरेव विष्टद्गन्धो न कदाचिदपि द्रव्यापायः शङ्क्येत। ४. भर्तृमात्रानुभाव्यः खलु पत्नीमाल्यगन्धः। तस्यान्तःस्थिरत्वमेवोचितम्। यद्यस्माभिः पुरुषोत्तमविषये प्राप्तव्यं न्याय्यं स्त्रीत्वं प्राप्येत, यदि च योगेनास्मन्मनीषा तन्मौलिबन्धान्तर्लीयेत तदा तस्यास्तदन्तर्गन्धपरिचयः स्यात्। स्थिरशब्देन चतुर्थपादे चेतोवृत्तिस्थितिकथनेन निरूप्यमाणस्य समाधेः स्थैर्थं सूच्यते। शुभवासनास्थैर्यमेवापेक्ष्यते ॥

वल्लभास्पर्शमान्यैः। १. अत्र गोदाभिप्रेता। यथा सा रङ्गभर्तुर्वल्लभा तथा वयमपि तन्मौलिमाल्यवासितभगवत्केशपाशपरिमलवासिताः प्रिया भूयास्म। रङ्गभर्तुरिति पदमपि श्लिष्टतरम्। योगारूढाया मनीषाया अपि भर्ता भवति यथा गोदायाः। नववधूर्भूयान्मनीषेति मनोरथः। यद्यपि समस्तजगतां पितृत्वेन सकललोकमान्यस्य भगवत उत्तमाङ्गस्य मान्यत्वं निरतिशयम्, गोदामौलिमाल्यभरसंभरणेन तस्य भूयो

मान्यत्वम् । २. गोदामौलिस्पर्शमात्रान्माल्ये सौरभसंक्रान्तिः । ३. विलक्षणसौरभाधानार्थमेव गोदा स्वमौलौ प्रथमं क्षणमात्रं माल्यं बध्नाति । तदर्थमेव तन्मात्रातिक्रमः सह्यते तथा । ४. तन्मौलिस्पर्शमात्रेऽपि तादृशो बहुमानो भर्तुः । ५. न धूपवासाद्यपेक्षा केशानाम्, सति पत्नीमौलिगन्धवासितमाल्ये । ६. परिमलरङ्ग इति प्रसिद्धपरिमलस्याप्यतिशयाधायकं पत्नीमौलिवासितं माल्यम् । परिमलरसिक इत्येव तस्य रसातिशयहेतोर्विचित्रवासनासंक्रान्तिः क्रियते वल्लभया पत्न्या । ७. 'त्वां स्पृष्ट्वा मामपि स्पृश' इति माल्यं प्रति वक्तीव भगवन्मौलिः । उभयत्र संबोध्यमानयोर्वातमाल्ययोर्गन्धवहत्वं समानम् ॥

कुप्यच्चोलीवचनकुटिलैः कुन्तलैः श्लिष्टमूले । १. चोलयुवतयः स्वकेशानां दैर्घ्येण कौटिल्येन च विस्मिता मुहुर्मुहुः स्वकेशविषयस्वविस्मयं प्रकटयन्ति कचभरं धरापर्यन्तमधः प्रसार्य साभिमानं सगर्वं शोषणेन, मज्जनकाले कावेरीसलिले दीर्घं प्रसारणेन च । तेषां केशसौन्दर्याभिमानः सूच्यते आचार्यैः संकल्पसूर्योदये कावेरीवर्णने 'खेलच्चोलवधूविधूतकवरीशैवालितामन्वहं पश्येम प्लवमानहंसमिथुनस्मेरां कवेरात्मजाम् ।' इति तत्केशाभिमानं वीक्ष्य कावेर्या हासः सूच्यते । एवं सोपहासं भाषत इव ताः कावेरी, 'मन्मध्ये मुक्तकेशं मज्जतां युष्माकं केशाभिमानो वृथा । कौटिल्यरूपकेशगुणे मन्मध्यस्थरङ्गना-

थस्य कुटिलकुन्तलैः सुकेशीनामपि युष्माकं केशपाशः न
स्पर्धितुं शक्नुयात् । युष्माकं सगर्वकेशप्रसारणेन शैवालरहि-
तत्वेन सुप्रसिद्धानि मत्सखिलानि वृथैव शैवालितानि' इति ।
भगवत्कुटिलकुन्तलैः स्वसमवेतयत्किञ्चित्पदार्थस्य तुलारोहे
यदि तासां निर्बन्धः, सन्त्येव तासां कोपावसरप्रयुक्तानि कुटि-
लकुटिलानि वचनानि यानि भगवत्केशवक्रिमाणमप्यतिश-
यीरन्नित्याचार्या व्यञ्जयन्तीव । २. अत्यन्तं 'ऋजुः' भग-
वान्सौन्दर्यभूमविघटनभयात्केशमात्रे कौटिल्यं सहते । ३. ज-
न्मसिद्धमौत्तराणां दाक्षिणात्यान्प्रति सावज्ञत्वमाचार्या अपि
नातिवर्तन्त इति कैश्चिदुच्येत । चोलीति चोलदेशस्त्रियो
विवक्षिता इति भाति । हंससंदेशे— 'याहि चोलान्' इति
पूर्वश्लोके उक्त्वानन्तरश्लोके 'संध्यारागं सुरभिरजनीसंभवै-
रङ्गरागैः केशैर्ज्योत्स्नाकलहतिमिरं पालिकापीडगर्भैः । आ-
बिभ्राणाः सरसिजदृशो हंसदोलाधिरोहा दाधास्यन्ते मदकल-
गिरस्तेषु नेत्रोत्सवं ते ॥' इति चोलदेशरमणीविलाससौन्दर्या-
दि वर्णितम् । तत्रापि तत्केशकार्ष्ण्यसौन्दर्यं वर्ण्यते ॥

रत्नापीडद्युतिशबलिते रङ्गभर्तुः किरीटे । १. प्रथमश्लो-
कारब्धज्योतिरनुभवस्यात्राप्युपसंहारेऽनुगतत्वं द्योत्यते रत्नशब्दे-
न । २. चिन्तारत्नं रत्नद्युतिशबलितकिरीटेनाभिषिच्यते । 'रत्नं
समागच्छति काञ्चनेन ।' ३. किरीटस्वर्णभासा संयुक्ताः
केशाः श्रुत्युक्तहिरण्यकेशत्वमपि कथञ्चिदुपपादयन्ति ॥

राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे। १. इतः पूर्वमराजकं तत एवामर्यादमभूच्चेतः। अन्यराजकं वा स्वातन्त्र्यावलम्बनेन स्वराजकं वाभूत्। इतस्ततो धावदेवासीत्। इदानीं सुराज्ञि रङ्गराजे चेतोवृत्तयो निरुद्धा भवन्ति। रङ्गराजे वयम् 'सुराजं भवमभिमनुमहे।' २. अत्र स्पष्टं चित्तवृत्तिनिरोधरूपसमाधेर्ग्रहणमिति पूर्वमेवोक्तम्। ३. स च समाधिः संप्रज्ञातो विग्रहविषयत्वात्। 'योगेन नाथ शुभमाश्रयमात्मवन्तः सालम्बनेन परिचिन्त्य न यान्ति तृप्तिम्।' इति शुभाश्रयविषययोगस्य सविकल्पकत्वमुक्तमाचार्यैः। तदनन्तरश्लोके 'मग्नास्त्रिसीमरहिते भवतः स्वरूपे' इति स्वरूपमज्जनं प्रदर्शितम्। तच्च निर्विकल्पकम्। तस्यापि कतिचिद्विशेषविशिष्टतैवेष्यते। न सर्वविशेषरहितता। स्थितिमधिगता इति वृत्तिस्थितिरूपनिरोधस्याप्यधिगम्यत्वं द्योत्यते। निरोधोऽपि ज्ञानविषयो भवति। न स्वरूपविषयकनिर्विकल्पसमाधावपि त्रिपुटीराहित्यम्। स्थितिः प्राप्यते, विषयीक्रियते चेत्यधिगतशब्देन बोध्यते। ४. 'चेतसो मे' इति निरोधवशीकृतचेतसि स्वकीयत्वाभिमानः। एवं भावनासाधके स्वस्मिन्नपि भावनापूर्तौ सत्तानुभवो द्योत्यते 'मे' इति योगोपसंहारेण। समाधौ ममापि भावमस्ति॥

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जङ्घां
ऊरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम्।

वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
वक्त्राभिख्यां पिबति वहते वासनां मौलिबन्धे ॥

आरूढः समाधिप्रासादः । तत्तदवयवानुभवाहितशुभवासनाश्च संकलय्य वृत्ततत्तत्खण्डानुभवानुस्मरणपूर्वकमखण्डभगवद्विग्रहानुभवः प्रदर्श्यते । आरूढेनारूढसोपानपर्वणामुपरितनदेशाद्वीक्षणं सुलभमेव । 'एकैकशोऽङ्गानि धियानुभावयेत्पादादि यावद्धसितं गदाभृतः । जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥' इति श्रीशुकोक्तरीत्या एकैकावयवाहितसंस्काराः पुनरुद्बोध्य सहानुभूयन्ते । श्रीमच्छङ्कराचार्याः प्रत्यवयववर्णनं विस्तरेण कृत्वान्त्यश्लोके सर्वावयवविशिष्टाखण्डानुभवं प्रदर्शयन्ति 'आ पादादा च शीर्षाद्वपुरिदमनघं वैष्णवं यः स्वचित्ते धत्ते नित्यं निरस्ताखिलकलिकलुषे सन्ततान्तःप्रमोदः । जुह्वज्जिह्वाकृशानौ हरिचरितहविः स्तोत्रमन्त्रानुपाठैस्तत्पादाम्भोरुहाभ्यां सततमपि नमस्कुर्महे निर्मलाभ्याम् ॥' इति । भगवति तेषां निरवधिकरतिव्यञ्जकमिदं वर्णनमिति सुस्पष्टमेव । भागवतविषयरत्यैव सातिशया तेषां भगवद्विषयरतिः । यथा ब्रह्मविषयपराविद्यां प्रदर्शयन्ती प्रक्रान्ता मुण्डकोपनिषत् 'तस्मादात्मज्ञं ह्यर्चयेद्भूतिकामः' इति ब्रह्मविदर्चनं विधत्ते, तथैव तेऽपि भगवत्पादादारभ्य स्तोत्रं रचयन्तः भागवतपादसततनमस्क्रिययैव तदुपसंजहुः । पुरुषार्थकाष्ठा तेषामपि संमतेव । अवयववर्णने भगवत्कर्तृक-

संयोजनादिव्यापाराः प्रायेण प्रदर्शिताः । पादाम्भोजस्य प्रतिफलनम्, नाभेः संप्रीणनम्, वक्षसो धीसन्तापशमनम्, बाह्वोर्यन्त्रनियमनम्, वक्त्रस्य स्वान्ते गाढं विलगनम्, मौलिबन्धस्य तदुपश्लिष्टकिरीटस्य वा चेतोवृत्तिस्थितिकर्तृत्वम्, इत्येतत्सर्वं निबिडसंयोगरूपयोगसंपादने भगवद्व्यापारस्य प्राथम्यमैकान्त्यं वा व्यञ्जयन्ति । जङ्घादर्शनेऽपि 'विवृणुते तनूं स्वाम्' इति स्वजङ्घाया दृग्विषयतापादनं भगवत्कर्तृकमेव यदि मुख्यं दर्शनं विवक्ष्येत । जङ्घानुधावनेन दिशं दिशं पतित्वा नितान्तश्रान्तं चेतः श्रमहरभगवदूरुद्वन्द्वे किञ्चित्कालमवशाद्विलीयेतैव । यथा दिवसपरिश्रमश्रान्ता अवशेनैव सति संपद्यामहे न विद्मश्च सति संपद्यामह इति । पूर्वं भगवद्व्यापारस्य प्राथिकत्वं सार्वत्रिकत्वं वा । इदानीमुपासकप्रतिव्यापारस्य सार्वत्रिकत्वम् । कृतम् च करिष्यति योगविमलीकृतस्य सत्त्वोत्तरत्वात् । पूर्वं भगवत्कारितसंयोजनानुभवमनु संजातरुचि स्वयमनुबुभूषति चेतः । योगारोह इति कामारोह एव । तच्छास्त्ररीतिश्च भूयोऽनुसृता । 'सुगन्धि मम नाथस्य' 'तस्याननं पद्मसमानगन्धि' इत्यादिवत्कान्तस्य सौगन्ध्यं निरतिशयभोग्यं कान्तायाः । तच्च प्रथमं प्रदर्शितम् । 'दृष्ट्वादर्शे मुखम्' इति कामसूत्रे नित्यकृत्यत्वेन वर्णनम् । मुख्यानायां मनीषायां नायकविग्रहदर्पणत्वारोपः । यदि नायक्येव शोभाविशेषान्नायकविग्रहप्रतिफलनसाधनमुकुरीभवति, तस्यां च नायकविग्रहस्य प्रतिफलनं भवेत्, ततोऽपि किं सुखकरं स्यात्तस्याः । 'प्रण-

थिनमिव प्राप्तं...प्रिया स्वयमन्वितं महति मुहुरामृष्टे मणिदर्पणे' इत्याद्यनुभवोऽप्यत्र स्मर्तव्यः । यदि च नायकविग्रहप्रतिफलनं पत्नीभिरेव लाययित्वा कार्येत, नववध्वा मनीषाया भर्त्रवयवारोहकाङ्क्षिण्याः किं ततोऽपि प्रेयः स्यात् । नायिकया कान्तार्थवास्तुनिर्माणे 'मध्ये दीर्घिकां खानयेत्' इति कामसूत्रम् । तदपि प्रत्यभिज्ञाप्यते दीर्घिकाशब्देन । जङ्घादर्शनेन दूरस्थितानस्मान्प्रति धावनमस्कामन्यत्र धावनत्यजनं चानुभूयेते । 'जननपदवीजाङ्घिकत्वं जहाति' इति जन्मस्थलभूतपितृगृहमार्गजिगमिषां त्यजतीत्यपि व्यज्यते । मातापित्रोर्न स्मरति । पदवीपदेन तद्दिशं प्रति न चलतीति व्यज्यते । मन्मथोद्यानद्वारस्तम्भभूते ऊरुद्वन्द्वे विचित्रभोगानुभवः पूर्वमेव प्रादर्शि । 'कामं च यौवने' इति वात्स्यायनसूत्रम् । कामोद्यानप्रदर्शनं तत्र स्पष्टं प्रदर्शितम् । 'स्थाविरे धर्मं मोक्षं च' इत्यनन्तरं सूत्रम् । मोक्षः खल्वीप्स्यतेऽनया । तदनुरूपवृद्धतमत्वमप्यस्त्यास्मिन्नित्ययूनि । मनीषायाः कान्तासमाधिरितरश्लोकेषु तत्र तत्र प्रदर्शितैव । 'रतिमुभयप्रार्थना कुरुते' इति रतिविषयप्रार्थनापि स्मार्यतेऽखिलप्रार्थनाशब्देन । 'कृते प्रतिकृतं कुर्यात्' इति कामसूत्रे नायिकाविषयिका विधिः । 'दैवतं दैवतानाम्' इति पतिदेवतायाः पतिव्रताया मनीषायाः कान्त एवोत्तमं दैवतम् । तथैव स्पष्टमुच्यते वात्स्यायनैः । यत्कृतं नायकेन तत्सर्वं प्रतिकर्तव्यम् । तच्च क्रियते इत्यस्मिन्श्लोके प्रदर्शयिष्यते । कामसूत्रे कामकला अष्टाष्टकत्वेन विभ-

ज्यन्ते । तत्र च योगसंख्याद्रियते । इदं चात्रावधेयम् । ऐकाग्र्यप्रधानत्वाद्योगस्य द्वन्द्वभूतमपि पादजङ्घमेकवन्निर्दिश्यते, पादाम्भोजमिति जङ्घेति च । द्वन्द्वानि योगं विघटयेयुरिति सुप्रसिद्धम् । कथं चोर्वोर्भुजयोश्च द्वन्द्वप्रदर्शनम् । ऊरुद्वन्द्वे द्वन्द्वप्रदर्शनं मङ्गलार्थमिति सोढव्यम । प्रविविक्षति नववधूर्मनीषा कामोद्यानम् । उद्वाहमङ्गलविधये तद्द्वारे कदलिकास्तम्भनिवेशे, कथमेक एव स्तम्भो निवेश्येत । एकः स्तम्भोऽमङ्गलाय । 'इदं द्वन्द्वमाचार्यस्य मङ्गलार्थं मृष्यताम् ।' आसनरूपयोगतार्तीयाङ्गं खलु तत्र प्रस्तूयते । कथमेकयासनसंभवः । उभयमप्यवश्यापेक्षितमासननिर्वृत्तये । तिस्रो देव्यस्तत्र स्वपन्ति । तदर्थमपि सिद्धं द्वन्द्वं न त्याज्यम् । 'स्थिरसुखमासनम्' इति लक्षितस्यासनस्यासनाधिक्यमनुकूलमेव । योगाङ्गानुकूलत्वाच्च द्वन्द्ववर्णनमूर्वोः । भुजद्वन्द्ववर्णनं तत्र प्रकृतधारणरूपयोगाङ्गस्य परमानुकूलमेव । बाहुद्वययन्त्रणेऽपि खल्वितस्ततो वलति । तद्द्वयं विना कथं परिष्वङ्गलाभः । कुन्तलेषु माल्येषु च बहुत्वं न योगविरोधि । तच्छिलष्टकिरीटस्यैव तत्र विशेष्यत्वम् । कुन्तलबहुत्वं माल्यबहुत्वं च शुभवासनासंचयरूपयोगनिर्वर्त्यप्रयोजनस्य साधकमेव । यावन्तः कुन्तलास्तावन्तः शुभवासनाः । वासनाभार एव काङ्क्षित इति स्पष्टमुच्यते 'वहते वासनां मौलिबन्धे' इति । भाराधिक्य एव वहनपौष्कल्यम् ॥

पादाम्भोजं स्पृशति । १. प्रतिफलनमनु तत्स्पृक्षति मनीषा । २. मुनिवाहनैर्भगवत्पादाम्भोजस्यान्तः प्रविश्य चित्तवशीकरणमनुभूयते । भगवतैव वैराग्यस्य कारितत्वात्तेषां तादृशं तीव्रमितरवैतृष्ण्यं समजनि । अन्तःप्रविश्य वशीकरणं प्रतिफलनकथनेन प्रत्यभिज्ञापितम् । वशीकृता च मनीषा तत्कामयमाना स्पृशति । ३. 'असमागतयोः प्रीतिलिङ्गद्योतनार्थं स्पृष्टकरूपालिङ्गनम् ' इति कामसूत्रे । असमागतयोरिति पदस्य ' असंघटितपूर्वयोः संघटितयोः ' इति व्याख्या तद्भाष्ये । प्रथमसंघटनारम्भभाविस्पृष्टकं स्पृशतीति प्रत्यभिज्ञाप्यत इव । ४. आदर्शप्रतिफलितं पश्चादायान्तं मनीषा पश्चात्स्पृशति । ५. 'स्वान्तसंक्रान्तबिम्बच्छायापत्त्या' इति भगवद्विग्रहस्य शुद्धचेतसि प्रतिबिम्बितत्वं श्रीमच्छङ्कराचार्या अनुभवन्ति । ६. योगोपायान्वयोपक्रमः स्पर्शशब्देन द्योत्यते । ७. आरोहेण प्रेप्सितस्य वस्तुनः प्रथममधोभागस्पर्शमात्रं संभवेत् । स्पर्श एव प्रथमं दुःसंपादः । वृत्तस्यापि प्रत्यक्षानुभवाल्लट्प्रयोगः । सार्वकालिको वा लट् । इतः परं सार्वकालिक एवानुभवः ॥

भजते रङ्गनाथस्य जङ्घाम् । १. नाथोपज्ञं प्रवृत्तं सत्त्वस्मद्दर्शनम् । स च प्रसिद्धो योगी । स च 'यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः ।' इति प्रत्यक्षेण सर्वं साक्षात्कुर्वन्तं योगीश्वरमेव प्रणमति । रङ्गनाथश्च योगीश्वरो रङ्गनाथ-

योगियोगविषयः । तन्नाम्नैवात्राखण्डयोगानुभवः । योगिभूताचार्यस्यापि स्मरणं भवति । २. दृशिनोपक्रम्य भजिनोपसंह्रियते । दृष्ट्वेत्युक्त्वा भजत इत्यनूद्यते । भजनरूपनिदिध्यासनस्य दर्शनतो भिन्नत्वात्, उभयोर्विशेषणविशेष्यभावः । भजनेन दर्शनविशेषणेऽतिशयाभावान्न्यूनतापादनाच्च, दर्शनेन भजनविशेषणे दर्शनसमानाकारस्वरूपवैशद्यलाभात्, दृष्ट्वेति भजनमेव लक्षितम् । विद्युपास्योर्वेदान्तेष्वव्यतिरेकेण प्रयोगो दृश्यते । कचिद्विदिनोपक्रम्योपासिनोपसंहरति । यथा 'यस्तद्वेद यत्स वेद स मयैतदुक्तः' इत्यत्र 'अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से ।' इति । कचिच्चोपासिनोपक्रम्य विदिनोपसंहरति । यथा 'मनो ब्रह्मेत्युपासीत' इत्यत्र 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' इति । तस्मात्सकृदुपदेशेष्वप्यावृत्तिसिद्धिः ।' इति श्रीशंकराचार्या आवृत्त्यधिकरणभाष्ये ॥

ऊरुद्वन्द्वे विलगति शनैः । १. हेयद्वन्द्वानि परित्यज्य शनैः शनैः शुभाश्रये निमज्जनम् । अनुभूयानुभूय मज्जनम्, न सहसा । पूर्वं हेयद्वन्द्वेषु विलग्नमासीत् । इदानीं शुभद्वन्द्वे विलीयते । स्वपन्ति तत्र तिस्रो देव्यः । तत्स्वापभङ्गभिया शनैरेव तत्प्रदेशसंचारः ॥

शनैरूर्ध्वमभ्येति नाभिम् । नाभ्यावर्तस्यावर्तनरूपेण परितो गमनेनैवातिक्रमणसंभवः । परत्वैकान्तविषयायां नाभा-

वभिगमनशब्दः सुश्लिष्टः । स्वस्या अतिवेगवत्त्वेऽप्याश्चर्याणि सर्वाणि क्रमेण दृष्ट्वा शनैर्गमनम् । आवर्ते पतनभिया च शनैर्गमनम् । एकत्र प्रलीयमानान्यण्डानि । अन्यत्राण्डस्रष्टृब्रह्मणां सृष्टिः । बृहत्तमा ब्रह्मणो नाभिः । अभिगमनं विना नान्या गतिस्तद्विषये ॥

वक्षस्यास्ते । यथा 'वैकुण्ठे परे लोके आस्ते भगवान्' तथेयं मनीषा वैकुण्ठीयवक्षसि मणिवररूपेणास्ते । सार्वकालिकं चेदमासनं भवति । अभ्यागतस्य प्राधान्येनासनं न्याय्यम् । 'सर्वत्राभ्यागतो गुरुः' खलु । सर्वत्रेति ब्रह्मापि गृह्यते । 'मर्यादानां च लोकस्य कर्ता कारयिता च सः' इति प्रसिद्धस्तदर्थमेवावतीर्णो धर्मसेतुरिमां मर्यादां नातिक्रामेत् । अस्मदागमने उत्सवः खलु प्रवर्त्यते भगवता । 'नित्यहृष्टो हि जीवः ॥'

वलति भुजयोः । १. 'तत इतः पश्येम लक्ष्मीसखम्' इति भट्टपादाः । तत इतो वलते भुजयोर्मध्ये । दक्षिणबाहुसमीपगमनेन मुखसमीपं गत्वा मुखाभिख्यानुभवः । वामबाहुगमने जानुपर्यन्तस्यानुभूतस्य पुनरनुभूयानुभूय धारणम्, धारणरूपयोगाङ्गस्य प्रकृतत्वात् । जानुसमीपं गत्वा पादाम्भोजमपि पुनः साक्षात्करोति । 'वलति' इति परस्मैपदप्रयोगोऽसाधुरिति केचित् । परस्मैपदेऽपि वलिधातोः प्रयोगो भूयो दृश्यते । 'दृष्टिरन्यतो न वलति' इति कादम्बरी ।

'स्विद्यति कूणति वेल्लति विवलति निमिषति विलोकयति तिर्यक्' इति काव्यप्रकाशे । इतस्ततो वलने स्वसन्तोषादपि भगवत्संतोषोऽधिकः । शेषी खलु सः । तस्यैवातिशयः । परस्य प्रयोजनाधिक्यं परस्मैपदद्योत्यम् ॥

मामिकेयं मनीषा । इदानीं योगरूपावयविनिष्पादनावती धन्या मनीषा इयमिति निर्दिश्य श्लाघार्हा । यथा श्रीवकुलभूषणैर्भगवत्प्रवणस्वमनःश्लाघा ॥

वक्त्राभिख्यां पिबति । ध्यानानुवादः । 'लोचनाभ्यां पिबन्निव' इतिवन्मनीषया पानम् । भावनारूपपानं खलु प्रक्रान्तम् । वलनतर्षिताया वदनकान्तिपानेन तृष्णिवृत्तिः ॥

वहते वासनां मौलिबन्धे । आ पीठान्मौलिपर्यन्तमित्यादिप्रमाणेनापादचूडमनुभूयैव कुवासनानिरसनम् । शुभवासनाश्च संचिताः । मौलिबन्धानुभवे स्थिरसौरभभारः । सर्वसुवासनाभरमिदानीं शिरसा वहते । स्वमौलिबन्धे वहत इत्यपि व्याख्यातुं शक्या पदावृत्त्या । मौलिर्बुद्धिस्थानम् । बुद्धिरेव शुभसंस्कारैर्वासितव्या । शुभवासनाया निरतिशयभारोऽपि न बुद्धेर्भाराय । प्रत्युत सुखायैव भवेत् । नान्यार्थं भारवहनं यथान्यैर्भारवाहिभिः, किं तु स्वार्थमेवेत्यात्मनेपदेन द्योत्यते । शुभवासनाभारो योगसिद्धिद्योतकः ॥

कान्तोदारैरयमिह भुजैः कङ्कणज्याकिणाङ्कै-
र्लक्ष्मीधाम्नः पृथुलपरिघैर्लक्षिताभीतिहेतिः ।
अग्रे किञ्चिद्भुजगशयनः स्वात्मनैवात्मनः सन्
मध्येरङ्गं मम च हृदये वर्तते सावरोधः ॥११॥

योगारोहस्य किं फलम् । ध्यातस्य भुजगशयनस्य ध्यातृहृदये नित्यसुखसंनिधानमेव । तिस्रः खलु प्रियाः शय्याः सावरोधस्य भगवतः । श्रुतीनां मौलयः, शेषः, विमलमनसां चित्तमिति । श्रुतिमौलयो नित्यसिद्धाः । शेषोऽपि नित्यसिद्धः । अत्र श्रीरङ्गे भगवदागमनात्पूर्वमेव सिद्धः शेषपीठः । एकमेवानवाप्तमाप्तव्यम । विद्वत्सेवाविमलं मम हृदयं पर्यङ्कीभूयाच्छेषवत् । पर्यङ्कीभवनरूपमेवैवाभिलष्यते । कथं शयानो भगवानग्रे आगत्य मद्धृदये वर्तिष्यते । तच्छयनमनपहाय तत्रापि वर्तितव्यम् । मद्धृदयेऽपि वर्तितव्यम् । कथमिदं घटेत । मन्मनोरथं सफलयितुं स्वात्मैव सन्नात्मन एव किञ्चिदग्र आगत्य उत्सवमूर्तिरूपेण रङ्गमध्ये, मद्धृदये च तिष्ठेत् ॥

कान्तोदारैरयमिह भुजैः कङ्कणज्याकिणाङ्कैर्लक्ष्मीधाम्नः पृथुलपरिघैर्लक्षिताभीतिहेतिः । कान्तोदारैरिति दातुः सौम्यताद्योतनम्, अकलङ्कपूर्णेन्दुसमाधिः स्यादिति । उदारत्वं नेत्रयोर्वर्णितम् । भुजैरेव साक्षाद्दानम् । अभयदाता पाणिग्रहीता भुजः कान्त उदारश्च । कङ्कणं दीनानाथानामभय-

प्रदाननित्यव्रतसूचकम्। नूतनं वा मनीषोद्वाहेन। योगारूढानां ज्ञानिनां जनकादिवदभयं प्राप्तानां स्वनिमित्तभयाभावेऽप्यस्त्येव भूरि भगवन्निमित्तं भयम्। सन्ति लक्ष्म्याद्यो उत्तमस्त्रियः। अस्ति च लक्ष्मीर्निरतिशया। बह्वपायास्पदमिदम्। तस्माद्भक्तभयनिवृत्तये हेत्यादिप्रदर्शनेन भयं निवर्त्यते। भये सति सिद्धस्य योगस्य विच्छेदः स्यात्। यथा योगविच्छेदे भयं प्रदर्श्यते श्रुत्या, भयोत्पादे योगो विच्छिद्येतैव। उभयोर्न सहभाव इति श्रुत्यभिप्रायः॥

अग्रे किंचिद्भुजगशयनः स्वात्मनैवात्मनः सन्।

१. भुजगशयनः स्वात्मनैवात्मनः किञ्चिदग्रे सन्नित्यन्वयः। 'शयानो याति सर्वतः' इति कठवल्लीकविः। शयान एव सर्वतो यातीति श्रुतिबोधितम्। शक्यं शयानस्यापि शयनमनुत्सृज्यैव स्वस्य किञ्चिदग्रे भूत्वा भक्तभयनिवृत्त्यर्थं तद्रक्षणार्थं च स्वाभिन्नेन पश्चायुध्यभयमुद्रादिविभ्रदुत्सवमूर्तिरूपेण मध्येरङ्गमवस्थातुम्, मत्समीपमप्यागत्य मद्धृदयेऽवस्थातुं च। शयानस्यैव सर्वतो गमनसमर्थस्य रङ्गमध्यं भूषयितुं मद्धृदयं प्रद्योतयितुं च स्वस्य किञ्चिदेवाग्रे आगमनं क्रियदित्याचार्या व्यञ्जयन्तीव। कठश्रुतिः श्रीरङ्गनाथविषयेवेत्याचार्यानुभवः। भुजगशयन इति स्वात्मनैवात्मनः किञ्चिदग्रे सन्निति च कठश्रुतिः प्रत्यभिज्ञाप्यत इव। २. 'न हि सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारोढुं प्रभवेत्' इति प्रसिद्धो न्यायः। तदनु-

सारेण स्वस्यैव स्वाग्रे भवनमशक्यम्। अपूर्णासर्वशक्तविषयो न्यायो न पूर्णं सर्वशक्तं रङ्गनटं स्पृशेत्। 'इन्द्रो मायाभिः पुरुरूप ईयते' इतीच्छामात्रगृहीताभिमतोरुविग्रहः परमेश्वरो लौकिकन्यायमतिवर्तते। ३. 'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥' इति श्रुतिः स्मार्यते॥

मध्येरङ्गं मम च हृदये वर्तते। १. यथोत्सवमूर्तिरूपेण भुजगशयनस्य स्वाग्र एवागत्यावस्थाने न कोऽपि संशयः, तथा तस्यैव मद्धृदये वर्तनमपि निःसंशयम्। 'नानुमानमतच्छब्दात्प्राणभृच्च' इत्यत्र यथा आनुमानप्रधानसंकीर्तनं प्रसिद्धत्वाद्दृष्टान्तार्थं भवति, तथात्राप्युत्सवमूर्तिसंकीर्तनमभिन्नत्वसत्यत्वप्रसिद्ध्या भुजगशयनस्यैव मद्धृदयवर्तनसत्यत्वे दृष्टान्ती-भवति। यथा मध्येरङ्गमुत्सवमूर्तिरूपेणोत्सवैः प्रहृष्यन्नेवास्ते, तथैव मम हृदये नित्योत्सवमासोत्सवाननुभूयादित्याशयः। २. यद्यप्युत्सवमूर्तेर्मूलमूर्त्यभेदोऽपि बुबोधयिषितः, मद्धृदयवर्तनापेक्षया तस्य प्रसिद्धत्वात्तस्य दृष्टान्तत्ववर्णनं शक्यम्। ३. प्रथमसंकीर्तितरङ्गान्तर्ज्योतिषो मम हृदये नित्यसंनिधानमेव भावनाफलम्। तच्च सिद्धं भवति भावुकहृदयमध्यवर्तनेन। ४. चिन्तारत्नं मच्चिन्तान्तःप्रविष्टं तत्र वर्तते। नेदमननुरूपम्। ५. 'यन्मूर्ध्नि मे श्रुतिशिरःसु च भाति' इत्युच्चनीचेषु निर्विशेषं वर्तते। अहो! किमिदमौदार्यम्। यथा सर्ववेदमूलभूतप्रण-

वरूपरङ्गमध्ये आस्ते तथा मद्धृदयेऽपि । ६. अन्तर्ज्योतिरिति 'मनोमयः प्राणशरीरः भारूपः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाकी अनादरः एष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः सर्वगन्धः सर्वरसः एष म आत्मान्तर्हृदये' इति शाण्डिल्यश्रुतिरपि प्रत्यभिज्ञाप्यत इत्युक्तम् । यस्य नाभौ गूढनिक्षिप्तं विश्वम्, यस्य नाभीसरसिजं नालीकं स्फुरितरजसा वेधसो निर्ममीते, यः सर्वलोकेभ्यो ज्यायान्स मम हृदयान्तः प्रविश्य वर्तेत इत्यर्भकौकोवरणं परमानुग्रहकृत्यमित्यनुभूयते । अवाकी इत्युक्तं मौनमर्चासमाधौ सुश्लिष्टम् । निरतिशयबृहतो निरतिशयसूक्ष्मे मम हृदयेऽवस्थानम् । शाण्डिल्यश्रुतावस्मिन्श्लोके चानुभवसादृश्यं सुविशदम् । सर्वगन्धत्वमुभयत्र समानम् । गन्धस्याभ्यासो भवत्युभयत्र । मनोमय इति विमलमनसः करणत्वमुभयत्र । उभयत्रापि क्रतुरूपभावना क्रियते विधीयते च । सर्वरसविशेषणं चाभ्यस्तं रञ्जिताशेषचित्ते रसमये रतिमये रङ्गनाथे सुभगं समन्वितम् । रङ्ग एव सर्वरसानुभवसंभवः 'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्' इति कविसार्वभौमाः । कवितार्किकसिंहाश्च 'न तच्छास्त्रं न सा विद्या नाटके यन्न विद्यते' इति । नाट्यं नाटकं च रङ्गे सुश्लिष्टे तन्नायकः सर्वरस एव । ७. पूर्वमन्तर्ज्योतिरुद्दिश्य तस्य रङ्गदृश्यतेजसाभेदो विहितः । अत्र रङ्गदृश्यतेजसो मद्धृदयान्तर्वर्तितेजसाभेदो विधीयते । उद्देश्यं पूर्वम्, विधेयं परमिति नियमः खलु ॥

सावरोधः । १. पत्नीभिः सहितभगवतः शय्याभूतम् । २. सकुटुम्ब आयातो नित्यवासाय । नेतो यायात् । ३. ब्रह्मपुरत्वेन प्रसिद्धे मम शरीरे दहरपुण्डरीकवेश्मनि मम हृदये ब्रह्मणो वर्तनमुचितमेव । ४. दिने दिने वयं भगवति शेमहे । स एव मुख्यं सुषुप्तिस्थानम् । कृते च प्रतिकर्तव्यम् । अनादिकालतोऽस्मत्पर्यङ्कभूतस्य भगवतोऽद्य प्रभृति वयं सर्वकालं तत्पर्यङ्कीभूयानृण्यं प्राप्नुयाम । ५. सावरोधः सपर्यङ्को यद्धृदयं पर्यङ्कीकुरुत इत्यपि भुजगशयन इत्यनेन सूच्यते । ६. 'सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्' इति श्रीशुकवचनमपि प्रत्यभिज्ञाप्यत इव । अवरुद्धो हृदि वर्तते । सावरोधशब्दावृत्त्या सान्तःपुरो हृद्यवरुध्यते । यदि शुश्रूषाक्षणे हृद्यवरुध्यते भावनान्तरं नियतं हृद्यवरुध्येत । ७. 'आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात्' इत्युक्तप्रकारेण परमात्मन आत्मन्यवरोध एव योगस्य पूर्णता । हृद्यवरोधेनैवोपशान्तिलाभो योगप्रयत्नोपरमश्च । तत अवरोधेन योगोपसंहारोऽतीव हृद्य इति रसिकैर्विभाव्यम् ॥

रङ्गास्थाने रसिकमहिते रञ्जिताशेषचित्ते
विद्वत्सेवाविमलमनसा वेङ्कटेशेन क्लृप्तम् ।
अङ्केशेन प्रणिहितधियामारुरुक्षोरवस्थां
भक्तिं गाढां दिशति भगवद्ध्यानसोपानमेतत् ॥

रङ्गास्थाने रङ्गसभामण्टपे भगवन्नियमनेन भागवतनियमनेन वा रङ्गराजस्य पुरत एव तं श्रीरङ्गश्रृङ्गारं वीक्ष्य वीक्ष्यानुभूयानुभूय रचितमिदं सोपानमिति भाति । मातृकां पुरतोऽवस्थाप्य तत्पश्यन्त एव खलु शिल्पिन प्रतिमां निर्मिमते । रङ्गास्थाने क्लृप्तमिति स्पष्टमुक्तम् । रसिकमहिते इत्युक्तेस्तत्र रसिका विद्वांसः संमेलिता आसन्नित्यपि सूच्यते । सर्वे च रञ्जिता अभवन्निति रञ्जिताशेषचित्ते इत्यनेन सूच्यते । विद्वद्भिः स्वग्रन्थस्य रङ्गसभायां प्रथमपठनं सुप्रसिद्धम् । तद्वद्गुमत्यैव कृतार्थतां मन्यन्ते कवयः । चन्द्रिकान्यायामृतादिप्रणेतारः श्रीव्यासरायाचार्याः श्रीरङ्गचन्द्रमसः पुरतः स्वचन्द्रिकां प्रथमं प्रकटीचक्रुरित्यैतिह्यम् । तद्विषय एव तद्ग्रन्थप्रथमश्लोकः 'नमो नमोऽनन्तभक्तिमुक्तिदायिने शेषशायिने' इति । तदेव गाढभक्तिदातृत्वमत्रापि वर्ण्यते आचार्यैः । 'क्षीराब्धेर्मण्डलाद्भानोः··· रतिं गतो यतस्तस्माद्रङ्गमित्यभिधीयते ।' इति भगवतः श्रीरङ्गे निरतिशयरतिमत्त्वमुक्तम् । रतिं गतोऽत्र भगवानिति रङ्गम् । रङ्गराजविषयत्वाद्योगस्य राजयोगोऽयम् । क्लेशराहित्यञ्च राजयोगः ॥

रसिकमहिते । १. रसिकैरलङ्कृतं रङ्गास्थानम् । २. रसिकैः पूजितं रङ्गास्थानम् । रङ्गास्थानमिति न वयं तत्र बहुमतिं कुर्याम । अपि तद्रोचते वैकुण्ठकथासुधारसिकानाम् ? त एव रसिकशब्देनाभिप्रेयन्ते । ओमित्युच्यते रसिकमहिते इति ।

३. न केवलं पुराणमहितम् । ४. भारतीनृत्तरङ्गं रङ्गम् ॥

रञ्जिताशेषचित्ते । १. आम्रान्पृष्टः कोविदारानाचष्टे इति-वदुपहास्यमिदम् । अपि रसिकचित्तरञ्जकं रङ्गमिति पृष्टम् । रसिकानां पूजास्थानमित्युत्तरितम् । परत्वात्पूजापदं भवेत् । न तावता रसिकरञ्जकत्वमुपपाद्येत । अत्रोत्तरम् । पण्डितादि-पामरान्तानां सर्वेषां चित्तरञ्जनम् । २. रङ्गस्वभावाद्बहुधा भिन्नरुचेरशेषजनस्याद्वितीयं समाराधनम् ॥

विद्वत्सेवाविमलमनसा । निर्मलान्तःकरणेनैव योगसो-पानकल्पनसंभवः । 'विद्वत्सेवाकतकनिकषैर्वीतपङ्काशयानाम्' इति 'महत्सेवां द्वारमाहुर्विमुक्तेः ।' इति च विद्वत्सेवया शु-द्धान्तः करणोऽहम् । सेवाशब्दः प्रणिपातपरिप्रश्नौ तल्लब्धोप-देशं चोपलक्षयति ॥

वेङ्कटेशेन क्लृप्तम् । १. वेङ्कट इति पापदाहकत्वं प्रसिद्धम् । विमलमनस्कत्वमुपपाद्यतेऽनेन नाम्ना । २. सोपानकल्पनकौ-शललाभः पूर्वमेवोक्तः । ३. 'तन्नामवहनं दास्यम्' इति वेङ्कटेशपरिचारकोऽयं वेङ्कटेशनामा इत्यपि व्यज्यते ॥

अक्लेशेन । १. अक्लेशेन क्लृप्तमित्यप्यन्वयः । नात्र वाचि वा अर्थे वोपदिष्टभावनामार्गे वा कियानपि क्लेशः । क्लेशलेशं विना सुश्लिष्टौ वागर्थौ दिव्यदम्पती इव । २. क्लेशान्विभज्य

तान्लक्षयित्वा क्लेशान्हापयाम इत्युद्घोष्य क्लिष्टमेव योगमार्गमुपदिशन्ति तच्छास्त्रिणः । तादृशक्लेशरहितो योगः प्रदर्शितोऽस्माभिः । ३. गानविषयश्लोकस्थाप्रयासशब्दः स्मार्यते । ४. प्रणिहितधियामवस्थामक्लेशेनारुरुक्षोरित्यन्वयः पूर्वमेव प्रदर्शितः ॥

प्रणिहितधियामवस्थाम् । समाधिभूमिम् ॥

भक्तिं गाढां दिशतु । योगफलत्वेन गाढभक्तिमेवाशास्महे । निबिडसंयोग एव फलम् । परभक्तिरूपयोगस्य परज्ञानपरमभक्तिफलपर्वाण्यपि गाढभक्तिकथनेन विवक्षितानि ॥

भगवद्ध्यानसोपानमेतत् । १. भाविता भावना मूर्तिमती पुरत आस्ते । सैवैतदिति पुरोवर्तित्वेन साक्षात्कृत्य निर्दिश्यते । २. भावनैव दृढं घनीभूता आरोहोपयोगिदृढसोपानं भवति । एतद्दृढसोपानसाहाय्येन समाधिगगनस्थलमारोढुं शक्यं भवति । ३. भगवद्विग्रहस्यैव सोपानत्वे, रङ्गवर्तित्वेन हृदयवर्तित्वेन वा एतच्छब्देन निर्दिश्येत । तस्य क्लृप्तत्वं सिद्धत्वात् । क्लृप्तम्, न कल्प्यम् । यथा रङ्गज्योतिरन्तर्ज्योतिः प्राप्यं साक्षात्कार्यम्, स्वयं साक्षात्कारसाधनाञ्जनं भवति, स्वसाक्षात्काराय स्वयमेव दिव्यं चक्षुरपि भवति, तथा योगेन तदारोहाय स्वदिव्यमूर्तिमेव सोपानतया विनियोजयति । तस्मिन् रङ्गनाथे कथं न रज्येतास्मच्चित्तम् ॥

'बालस्य साहसमिदं क्षमया सहध्वम्' इति प्रणिपत्य सविनयमभ्यर्थ्यते । 'सावद्यत्वे हि सोढुं प्रभवति हि सतामप्रकम्प्यानुकम्पा ।' प्रीयतां वासुदेवः, यस्य प्रसादे सर्वे प्रसीदेयुः ॥

सावरोधो रङ्गराजो वर्तते यद्धृदम्बुजे ।
निगमान्तगुरुश्रेष्ठः सन्निधत्तां स मे हृदि ॥

इत्थं गोपालदासेन वात्स्यवेङ्कटसूनुना ।
रचितं निगमान्तार्यस्तोत्रव्याख्यानमादरात् ॥

शुद्धिपत्रिका ॥

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	७	वक्ष्येत	उच्येत
७	१४	काङ्क्षमाणानां	काङ्क्षतां
१३	४	विश्वपारीणवृत्तिम्	विश्वपारीणवृत्ति
१६	५	योगलक्ष्यम्	एकलक्ष्यम्
४३	६	चारुवृत्तौ	चारुवृत्ते
४९	१६	सारसां	सरसां
६५	११	अनुप्रवेशो	अनुप्रवेशे
६९	५	अत्रो	अतो
७२	१९	श्लोके	गाथायां
७७	१९	भावं	भानं
८०	१८	विर्षयिका	विषयो

STOTRAS OF SRI VEDANTA DESIKA—4.

DEVANAYAKA PANCHASAT.

WITH A COMMENTARY

BY

A. V. GOPALACHARIAR, M A., B L.,

KUMBHAKONAM

SRI KOMALAMBA PRESS.

1928

Price] [8 Annas.

𑌶𑍍𑌰𑍀𑌃 ।

𑌶𑍍𑌰𑍀𑌵𑍇𑌦𑌾𑌨𑍍𑌤𑌦𑍇𑌶𑌿𑌕𑌸𑍍𑌤𑍋𑌤𑍍𑌰𑌾𑌣𑌿—4.

॥ 𑌦𑍇𑌵𑌨𑌾𑌯𑌕𑌪𑌞𑍍𑌚𑌾𑌶𑌤𑍍 ॥

[illegible]

[illegible]

𑌵𑌿𑌰𑌚𑌿𑌤𑌯𑌾 𑌵𑍍𑌯𑌾𑌖𑍍𑌯𑌯𑌾 𑌸𑌹𑌿𑌤𑌾

[illegible]

𑌪𑌰𑌿𑌶𑍋𑌧𑌿𑌤𑌾

[illegible]

𑌰𑌾𑌯𑌂𑌪𑍇𑌟𑍍𑌟𑍈. 𑌕𑍃𑌷𑍍𑌣𑌮𑌾𑌚𑌾𑌰𑍍𑌯𑍇𑌣

[illegible]

𑌶𑍍𑌰𑍀[illegible]𑌮𑍁𑌦𑍍𑌰𑌾𑌯𑌨𑍍𑌤𑍍𑌰𑌾𑌲𑌯𑍇
𑌮𑍁𑌦𑍍𑌰𑌯𑌿𑌤𑍍𑌵𑌾 𑌪𑍍𑌰𑌕𑌾𑌶𑌿𑌤𑌾 ।

[illegible]]　　1928.　　[illegible]

॥ 𑌶𑍍𑌰𑍀𑌃 ॥

॥ 𑌦𑍇𑌵𑌨𑌾𑌯𑌕𑌪𑌞𑍍𑌚𑌾𑌶𑌤𑍍 ॥

𑌶𑍍𑌰𑍀𑌨𑌿𑌵𑌾𑌸𑌂 𑌵𑌰𑌂 𑌬𑍍𑌰𑌹𑍍𑌮𑌤𑌨𑍍𑌤𑍍𑌰𑌸𑍍𑌵𑌤𑌨𑍍𑌤𑍍𑌰𑌮𑌾𑌰𑍍𑌯𑌗𑍁𑌰𑍁𑌮𑍍 ।
𑌵𑌨𑍍𑌦𑍇 𑌹𑌾𑌰𑍀𑌤𑌵𑌤𑍍𑌸𑌾𑌨𑍍𑌵𑌯 𑌦𑍇𑌶𑌿𑌕𑌾𑌰𑍍𑌯𑌮𑍁𑌪𑌾𑌶𑍍𑌰𑌯𑍇 ॥
𑌵𑍍𑌯𑌾𑌖𑍍𑌯𑌯𑌾 𑌨𑌾𑌮 𑌭𑍂𑌮𑍍𑌨𑌾 𑌨𑌿𑌗𑌮𑌾𑌨𑍍𑌤𑌗𑍁𑌰𑍋𑌰𑍍𑌗𑍁𑌰𑍋𑌃 ।
𑌦𑌯𑌾𑌪𑌾𑌤𑍍𑌰𑌪𑍍𑌰𑌸𑌾𑌦𑍇𑌨 𑌕𑍃𑌤𑌃 𑌸𑍍𑌤𑍁𑌤𑍍𑌯𑌂 𑌸𑌾𑌵𑌧𑌾𑌨𑌤𑌾 ॥

𑌯𑌥𑌾 𑌶𑍍𑌰𑍀𑌰𑌙𑍍𑌗𑌨𑌾𑌥𑌵𑌿𑌷𑌯𑍇 𑌪𑌾𑌦𑍁𑌕𑌾𑌪𑌾 𑌨𑌾𑌯𑌕𑌸𑍍𑌯 𑌪𑌾𑌦𑍁𑌕𑌾𑌸𑌹𑌸𑍍𑌰𑌂 𑌦𑍇𑌵𑌨𑌾𑌯𑌕𑍇 𑌕𑌵𑍀𑌨𑌾𑌂 𑌕𑌾𑌵𑍍𑌯𑌪𑌾𑌦𑍁𑌕𑌾 𑌇𑌤𑌿 𑌤𑌦𑍁𑌕𑍍𑌤𑌾𑌃 𑌕𑌾𑌰𑌣𑍇𑌨𑌾𑌨𑍁𑌭𑌵𑌾𑌦𑌿𑌭𑌿𑌃 । 𑌯𑌥𑌾 𑌪𑌾𑌦𑍁𑌕𑌾 𑌕𑍇𑌶𑌵𑌚𑌰𑌣𑌯𑍋𑌃 𑌸𑌮𑌾𑌶𑍍𑌰𑌯𑌣𑌂 𑌕𑌰𑍋𑌤𑌿, 𑌤𑌥𑌾 𑌕𑌵𑌯𑍋𑌽𑌪𑌿 𑌶𑍍𑌰𑍀𑌦𑍇𑌵𑌨𑌾𑌥𑌚𑌰𑌣𑌯𑍋𑌰𑍁𑌪𑌸𑍍𑌥𑌾𑌨𑌂 𑌵𑍍𑌯𑌾𑌪𑌾𑌰𑌿𑌤𑌾𑌸𑍍𑌤𑌦𑍍𑌵𑌿𑌷𑌯𑍇 𑌸𑌮𑍍𑌪𑍍𑌰𑌵𑌿𑌷𑍍𑌟𑌾𑌨𑌾𑌂 𑌪𑍍𑌰𑌕𑌟𑍀𑌕𑍃𑌤𑍍𑌯 । 𑌪𑍍𑌰𑌾𑌯𑌾𑌨𑍍𑌯𑌤𑌤𑍍𑌤𑍍𑌵𑌚𑌰𑌣𑌾𑌵𑌸𑍍𑌯 𑌪𑌾𑌦𑍁𑌕𑌸𑍍𑌯 𑌪𑍍𑌰𑌭𑌾𑌵𑌾𑌦𑍍𑌯 𑌵𑌿𑌷𑌯 𑌇𑌤𑌿 𑌤𑍇𑌤𑌰𑍇𑌵𑌾𑌵𑌾𑌦𑌿 𑌪𑌾𑌣𑌿𑌕𑍍𑌯𑌪𑌾𑌦𑌪𑌦𑍍𑌮𑍋𑌪𑌯𑍋𑌗𑌃 । '𑌪𑌾𑌦𑍁𑌕𑌾𑌵𑌤𑌾𑌰𑌵𑌿𑌧𑍌 —' 𑌇𑌤𑌿 𑌪𑌾𑌦𑍁𑌕𑌾𑌭𑌾𑌵𑌸𑍍𑌯 '𑌨𑌿𑌵𑍇𑌶𑌯 𑌸𑍍𑌵𑌪𑌦𑌸𑍍𑌥𑍇𑌯 𑌪𑍍𑌰𑌭𑌾𑌵𑌾𑌭' 𑌇𑌤𑍍𑌯𑌨𑍁𑌭𑌵𑌂 𑌭𑌾𑌰𑌤𑌾 𑌕𑌵𑌿𑌨𑌾 𑌤𑌤𑍍𑌪𑍍𑌰𑌤𑌿𑌜𑍍𑌞𑌾𑌤𑌮𑍍 । 𑌪𑌾𑌦𑍁𑌕𑌾 𑌵𑌪𑌿 𑌸𑌾𑌰𑌾𑌸𑌾𑌰𑌾𑌹𑌿𑌤𑌯𑌾𑌯𑌾𑌯𑌾𑌪𑍇 𑌉𑌪𑌨𑌿𑌬𑌧𑍍𑌯 । 𑌕𑌵𑌿𑌰𑌪𑌿 𑌮𑌣𑌿𑌤𑍍𑌰𑌯𑌪𑌾𑌦𑌪𑌦𑍍𑌮𑍇 𑌨𑌾𑌯𑌕𑌪𑍍𑌰𑌤𑍍𑌯𑍇𑌕𑌂 𑌕𑌵𑍀𑌨𑍍𑌦𑍍𑌰𑌃 । 𑌪𑍍𑌰𑌭𑍂𑌤𑌂 𑌸𑌂𑌸𑍍𑌕𑍃𑌤𑌪𑌦𑌂 𑌶𑍍𑌰𑍀𑌕𑍃 𑌪𑌞𑍍𑌚𑌾𑌶𑌤𑍍𑌸𑍍𑌤𑍋𑌤𑍍𑌰𑌂 𑌕𑍃𑌤𑌵𑌾𑌨𑍍 । 𑌤𑌤𑍍𑌰 𑌸𑍂𑌕𑍍𑌷𑍍𑌮𑍇𑌕𑍍𑌷𑌯𑌾 𑌨𑌵𑌨𑌵𑌾𑌨𑍍𑌯𑍇𑌵 𑌵𑍍𑌯𑌜𑍍𑌯𑌤𑍇 𑌕𑌵𑌿𑌨𑌾 । 𑌕𑌵𑌿𑌸𑌾𑌰𑍍𑌵𑌭𑍌𑌮𑌸𑍍𑌯 𑌵𑍃𑌤𑍍𑌤𑌿𑌵𑌰𑍍𑌣𑌿𑌤𑌵𑍃𑌤𑍍𑌤𑌵𑍍𑌯𑌾𑌖𑍍𑌯𑌾𑌯𑌾𑌂 𑌤𑌤𑍍𑌰 𑌤𑌤𑍍𑌰 𑌪𑍍𑌰𑌕𑌾𑌶𑌯𑌿

[illegible]

[illegible] । निरतिशयोऽत्र [illegible]

[illegible] इति [illegible] । [illegible]

[illegible] । [illegible] संस्कृतभाषया [illegible]

ते "नायिकाः प्राकृतेन [illegible]

[illegible] संस्कृत [illegible]

संस्कृतभाषा [illegible] नायक [illegible]"

इति [illegible]

[illegible] प्राकृत [illegible]

[illegible] । [illegible] प्राकृत

[illegible] भाषया [illegible]

[illegible] प्राकृतेन [illegible] । न हि [illegible]

[illegible] प्राकृतेन [illegible] । [illegible]

[illegible] नायिका [illegible]

संस्कृत [illegible] प्राकृत [illegible]

[illegible] संस्कृतेन

[illegible] प्राकृतेन [illegible] । [illegible]

[illegible] इति [illegible]

[illegible] । [illegible]

[illegible] इति [illegible]

[illegible] । [illegible]

[illegible] । [illegible]

[illegible] । [illegible]

[illegible] । [illegible]

[illegible]

[illegible] । [illegible]

[illegible] ।

स्वस्य व्यामोहनायिकात्वम्, स्वापराधि कान्तं प्रबो-
धनवेलायामवेन [illegible] स्पष्टं
व्यज्यते धीरमध्यात्वम् । व्यामोहसम्बन्धित्वा-
[illegible] व्यज्यते, धीरमध्य-
मात्वं च । नायकस्य कण्ठे वक्षसि च मालाभरण-
[illegible] व्यज्यते, नायकेनानुरक्त-
[illegible] च । स्वस्य पारा-
[illegible]
मतः स्वयं मायू" इति । [illegible]
[illegible] इति शौर्या नायकस्यानुकूलत्वम्, [illegible]
नायकेन नायिकायाः स्वकीयात्वम् '[illegible]
वान्' इति कथ्यते । उभयत्रानुकूलत्वं समानम् ।
[illegible] नायिका [illegible]
[illegible] नायकेन ।
[illegible]
इत्युक्तम् । [illegible]
चित्रवागर्थसिद्धिहेतोराचार्यैर्वाक्पालकगोपालकटाक्षितवाग्देवीस्मरणमपि क्रियत इत्यवधेयम । 'देवीं वाचमुपासते हि कवयः ।' वाग्देव्या भगवत्कटाक्षविषयत्वेनात्र स्मरणं लभ्यते यद्यप्युपसर्जनतया । विशेषणत्वेन वाग्देव्या अप्युपास्यान्तर्गतत्वं सिद्धयति । 'गुरुकुलक्लिष्टो मुरारिः कविः' इति गुरुकुलक्लेशमात्रमाद्रियते । वाग्देव्युपासनेऽनादरो भवति । गुरुकुले भूयः परिश्रान्तमाचार्यैः । तदुक्तं तैरेव 'पर्यासं पर्यचैषं कणचरणकथामाक्षपादं शिशिक्षे मीमांसामांसलात्मा समजनिषि मुहुः सांख्ययोगौ समाख्यम्' इति । वाग्देवतानुग्रहश्च भूयान्लब्ध आचार्यैः । मुख्यवाग्देवता चादिमा देवता हयवदनतनुः । नष्टवेदसंप्रदायस्याद्यप्रवर्तयितृत्वेन पालयित्री । सा च गोपालाभिधाना । गावो वेदवाचः । तत्पालको गोपालो हयवदनाभिन्नः । सरस्वती च हयवदनविभूतिः । हयवदनश्चाचार्यस्योपास्यदेवता । '...देवी सरोजासनधर्मपत्नी । व्यासादयोऽपि व्यपदेश्यवाचः स्फुरन्ति सर्वे तव शक्तिलेशैः ॥' इति हयग्रीवस्तोत्रे । यदा सरस्वती गोपालाङ्करसिका तत्रास्ते, तां वेदवाचा रञ्जयितुं पाञ्चजन्यं मुखे निवेश्य प्रणवमाध्मापयति । सा च गोपालमुखात्पाञ्चजन्यद्वारा निःसरत्प्रणवं श्रुत्वा हृष्यति । भर्त्रे वेधसे उपदिदेश वेदान्भगवान् । इदानीं पत्न्यै तदुपदेशः

क्रियत इव ॥

अस्मिन्श्लोके भाव्यमानः प्रकारविशेषो न सम्यग्ज्ञायते । मन्त्रमहोदधावष्टादशाक्षरगोपालमन्त्रः पठितः 'क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा' इति । गोपालमन्त्रे गोपीजनवल्लभत्वकीर्तनमस्ति । तदनुसृत्य 'वल्लवीजनवल्लभम्' इति पूर्वश्लोके उक्तं स्यात् । उत्तरत्र तदनुवृत्तिश्च तदनुसारेण स्यात् । 'स्मरेद्वृक्षवने रम्ये मोहयन्तंमनारतम् । गोविन्दं पुण्डरीकाक्षं गोपकन्याः सहस्रशः ॥ आत्मनो वदनाम्भोजप्रेपिताक्षिमधुव्रताः । पीडिताः कामबाणेन चिराश्लेषणोत्सुकाः ॥ फुल्लेन्दीवरकान्तमिन्दुवदनं बर्हावतंसं प्रियं श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् । गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥' इत्यादिध्यानश्लोकास्तत्र पठ्यन्ते । 'वृक्षवने रम्ये......गोपकन्याः सहस्रशः' इत्यस्य सादृश्यं प्रथमश्लोके । 'मदनातुरवल्लवाङ्गनावदनाम्भोजदिवाकरो युवा' इति द्वितीयध्यानश्लोकसदृशः । गोपीनां नयनोत्पलार्चिततनुम्' इत्येतत् 'व्रजयोषिदपाङ्गवेदनीयम्' इत्यस्य सदृशम् ॥

वाचम् । वाग्देवीं सरस्वतीम् ॥

निजाङ्करसिकाम् । स्वाङ्के ससन्तोषं स्थिताम् । स्वपालकपित्रङ्करसिकत्वं दुहितुर्न्याय्यम् । अर्भकः खल्वयम् । यद्यपि तस्य सा स्नुषा भवेत्, अर्भकावतारस्य तस्याङ्करसिकत्वं तस्या न दोषाय । तदङ्कस्थायास्तन्नामाक्षरेषु यन्त्रस्थत्रिकोणलिखितेषु तस्या दृष्टिः सादरं पतति । तद्वीक्षणेन सा रसेन पूर्यते । तत्र स्वनामरसिकां तां शिशुः समीक्षते ॥

वक्त्रारविन्दविनिवेशितपाञ्चजन्यः । कण्ठः पाञ्चजन्यसदृशः । कण्ठसंबन्धि वक्त्रम् । अत्र वक्त्रे पाञ्चजन्यः । तत्स्मरणं चाचार्यस्य मधुमयवाग्दानोपयोगि भवति । तत्प्रान्तेन खलु बालो ध्रुवः कृपया कपोले पस्पृशे । तत्रापि गोविन्दः खलु पस्पर्शे । प्रणवमहिमवत्पाञ्चजन्यक्रमेण स्वाध्मातामिमां स्तुतिं गोपालः स्वयमिति मुखरीकृत्य संमोदते स्मेत्यपि व्यज्यते । पाञ्चजन्यमाध्मायंस्ततो निःसृतां वाचं प्रसमीक्षमाण इत्यपि स्यात् । अचक्षुः पश्यति । अकर्णः शृणोति । तादृशस्य ईक्षणश्रवणयोर्न भेदः । स्वतः सदा प्रत्यक्षेण स सर्वं वेत्ति । न तस्य करणापेक्षा ॥

वर्णत्रिकोणरुचिरे । गोपालाक्षरघटिते तत एव रुचिरे ॥

वरपुण्डरीके । वर इत्यष्ट । अष्टदलपुण्डरीकाकारे आ-

सने । दहरं पुण्डरीकमस्यान्तरं वेश्म । ब्रह्मपुरं च वेदारण्यकपुरं भवति । तच्च बृन्दावनम् । अस्य गोपालस्य बहिरवस्थितत्वात्पुण्डरीकाकारासनं वक्ष्यते । पुण्डरीकवेश्मनो वरपुण्डरीकमुचितमासनम् ॥

बद्धासनः । इदानीमासने बद्धो मात्रा । इतः परमागःकारी दाम्ना भन्त्स्यते ॥

जयति । जयन्तीसंभव इतरेषां जयं तनुते । स्वयं जयतीति किमु वक्तव्यम् ॥

वल्लवचक्रवर्ती । वल्लवीजनवल्लभामित्यस्यानुवृत्तिः । वल्लवचक्रमध्यस्थः । वल्लवचक्रवर्तिनो यन्त्रचक्रवर्तित्वमुचितम् । अङ्कस्थवाग्देवीकस्य पाञ्चजन्यवद्वक्त्रकस्य च गोपालशिशोरुपासनमत्र भाव्यते । सरस्वत्युपासनं विहितम् । पाञ्चजन्यध्यानं विहितम । गोपालोपासनं च विहितम् । फलं वागर्थसिद्धिः । किमत्रोपासनभेदः, उत विशिष्टमेकमुपासनम् । सरस्वती, पाञ्चजन्यः उभौ गोपालविशेषणे । तथा च विशिष्टोपासनाविधिः ॥

आम्नायगन्धिरुदितस्फुरिताधरोष्ठ-
मास्राविलेक्षणमनुक्षणमन्दहासम् ।

गोपालडिम्भवपुषं कुहनाजनन्याः
प्राणस्तनंधयमवैमि परं पुमांसम् ॥ ३ ॥

अत्र डोलास्थितस्य शिशोरनुभवः । अत्र तार्तीयलक्षण-सूचनं स्पष्टम् । आम्नाय इति श्रुतेर्ग्रहणम् । स्फुरिताधरोष्ठ-मिति वाक्यस्य । गोपाल इति समाख्यायाः । यशोदाकृते-र्जननीस्थानापन्नायाः कुहनाजनन्याः प्राणस्तनंधयत्वरूपपर-मपुरुषलिङ्गस्य च सूचनं भवति । 'पुनर्विवक्षुः स्फुरिताध-रोष्ठः' इत्यादाविव स्फुरिताधरोष्ठत्वं वचनप्रारम्भसूचकम् । गोपालस्य वाक्पालकत्वं पूर्वश्लोके सूचितम् । तन्मुखाद्वेदस्य निःसृतत्वमत्र संकीर्त्यते आम्नायगन्धिरुदितेति । शिशोः सीताया वदनकमलस्य जनकेन स्मरणं वर्ण्यते भवभूतिना 'अनियतरुदितस्मितं विराजत्' इत्यादिश्लोके ।

सर्वदमनं भरतं शिशुं दुष्यन्तोऽनुभवति 'आलक्ष्य दन्तमुकुलान्यनिमित्तहासैः—' इत्यादिना । तदुभयमत्र भा-व्यम् । पाञ्चजन्यं वक्त्रे विनिवेश्य प्रणवमुज्जगार सरस्वतीं तं ग्राहयितुम् । प्रणवो गोपालमुखनिःसृतः, प्रणवाकारपा-ञ्चजन्यनिःसृतश्च । गोपालो वेदप्रवर्तक इति नाद्यापि सिद्धामित्याक्षिप्तेऽस्य रुदितमाम्नायगन्धीत्युच्यते । न केवल-मस्य निःश्वसितं वेदाः, अस्य रुदितमप्याम्नायगन्धि । गो-

पालार्भकमनुभवामः । 'बालानां रोदनं बलम्' इति प्रसिद्धम् । नायं रोदिति । कथमयं बालो भवेदित्याक्षिप्तेऽस्य रुदितं वर्ण्यते । अस्य वेदा बलम् । ज्ञानमयस्य वेदा बलम् । अनन्ता वेदाः । अनन्तमस्य बलम् ॥

आम्नायगन्धिरुदितस्फुरिताधरोष्ठम् । अस्य निःश्वसितं वेदाः । अस्य मुखान्निःसृतं रुदितं नियतमाम्नायगन्धि भवेत् । रुदितस्यानियतत्वेऽपि तस्य गन्धवत्त्वं नियतम् । तदेकान्तत्वं सूच्यते इत्वेन । 'अस्य महतो भूतस्य निःश्वसितम्' इत्यादिश्रुतिः प्रत्यभिज्ञाप्यते । अधरोष्ठस्फुरणं शिशुस्वभावः ॥

आस्राविलेक्षणम् । अवश्यायावसिक्तस्य पुण्डरीकस्य चारुतानुभूयते ॥

अनुक्षणमन्दहासम् । रुदितस्मितयोरनिमित्तत्वमात्रत्वमुक्तं महाकविभ्याम् । रुदितानुक्षणे मन्दं हसनं शिशुस्वभावः ॥

गोपालडिम्भवपुषम् । नात्र गोपालनामग्रहणम् । तस्य यन्त्रस्थत्वेन गोपनीयत्वात् । पूर्वश्लोके 'वर्णत्रिकोणरुचिरे' इति तत्सूचनम् । अत्र गोपालजातिग्रहणम् । अथोयन्त्रस्था-

क्षराणामकथितं कथनम् । अयं कुहनागोपो मिथ्यागोपः । कुह-नाडिम्भं कुहनाजनन्युपसीदेदिति चारु व्यज्यत इव । 'मा-तरं द्विपदा इति ख्यातो लोकप्रवादोऽयम्' इत्यादिकविः ॥

कुहनाजनन्याः । 'कंसप्रयुक्ता किल कापि माया व्रजं यशोदाकृतिराविवेश' इति यादवाभ्युदये । मायापर्यायप्र-कृतिः पूतना । प्रकृतिश्च कुहनाजनयित्री माया । भगवतः स्वरूपतिरोधानकरी सा । तिरोधानमोहादिकुहनोत्पादयित्र्याः प्रकृतेः पूतनायाः ॥

प्राणस्तनंधयमवैमि परं पुमांसम् । प्रकृतेर्जीविताप-हारकत्वादयं परः पुमानिति निश्चिनोमि । परं पुमांसम-न्तरा को वा मायां छिन्द्यात् । 'प्राणैः समं रोषसमन्वितो-ऽपिबत् ।' यथा सागरशोषणं रामशरेण, तथा प्रकृतिभूत-पूतनाप्राणस्तन्ययोर्धयनं गोपालेन । 'मायां बन्धयन्तीं धय-न्ती' इति शठरिपुभाणितिविषये आचार्याः । गोपा-लतृष्णामयत्वात्तस्यास्तादृशं सामर्थ्यम् । प्रकृतेः स्तन्यं विषसंमिश्रमस्मत्कर्मणा । जगद्गुरोस्तद्विषसंमिश्रं स्तन्यं रस्य-मासीत् । रसस्य गोपालस्य किं नाम रस्यं न भवेत् ? रस-स्य तस्योत्सवो रासोत्सवः । तत्संकल्पेन कर्मोच्छेदे विषसं-मिश्रा प्रकृतिरस्माकं रस्या भवेत् । आनुकूल्याविर्भावादेवा-

नन्दरूपा भवेत् । 'स्तन्यं तद्विषसंमिश्रं रस्यमासीज्जगद्गुरोः' इति शुकः । जगद्गुरोरित्यनेन प्रकृतेर्विषस्य सुखवन्मन्तव्यत्वं वेदान्तविज्ञानसुनिश्चितार्थैर्गुरुभिरित्यपि द्योत्यते । प्रथमगुरुर्भगवान् । उभयलिङ्गाधिकरणे सर्ववस्तूनां स्वत आनुकूल्यस्वभावत्वं व्युत्पाद्यते । मृत्युरेव यस्य हरिगुरोरुपसेचनं भवति, तस्य मृत्योः कस्यचित्साधनस्य विषस्य रस्यत्वे किमाश्चर्यम् ? गोविन्दोच्चारणेन कालकूटविषं पिबन्प्रह्लादः कामपि व्यथां विक्रियां वा न प्राप । मायाप्रकृतिप्राणधयनेनैव चेतनो रक्ष्येत मोक्षदानेन । यदि शिष्या मायाविषधयनेन मोक्षसाम्राज्यं लभेरंस्ततोऽपि किमानन्दनं भवेद्गुरोः । 'जय जय जह्यजाम्' इति श्रुतिभिः प्रार्थ्यते भगवांस्तद्गीतोपक्रमे । 'छिन्द्याशु.................भवदीयमायाम्' इति शुकः । जह्यजामित्युक्तमायाहननम् 'कुहनाजनन्याः प्राणस्तनंधयम्' इत्युक्तम् । अस्मज्जन्मनिवृत्त्यर्थं खलु जायते भगवान् । अस्मत्स्तनंधयत्वनिवृत्त्यर्थं तस्य स्तनंधयत्वम् । वयं प्रथमं प्रकृतिस्तनंधयाः । अनन्तरं मातृस्तनंधयाः । अर्भकत्व एव मातृस्तनंधयाः । यावदायुषं प्रकृतिस्तनंधयाः । मातरि विरज्यामः । प्रकृतिस्तन्ये रज्यामः । भगवान्मायाभूतपूतनास्तनंधयो भूत्वा तद्विषस्तनं निरवशेषं निपीयास्माकं पुनर्मातृस्तनंधयत्वम्, प्रकृतिस्तनंधयत्वं च

निवर्तयति । अत एवोक्तमाचार्यैरेतद्वृत्तान्तवर्णने यादवाभ्युदये 'स्तन्येन मातुः सह पूतनायाः प्राणान्पपौ लुप्तपुनर्भवायाः । यदद्भुतं भावयतां जनानां स्तनंधयत्वं न पुनर्बभूव ॥' इति ॥

आविर्भवत्वनिभृताभरणं पुरस्ता-
दाकुञ्चितैकचरणं निभृतान्यपादम् ।
दध्ना निमन्थमुखरेण निबद्धतालं
नाथस्य नन्दभवने नवनीतनाट्यम् ॥ ४ ॥

प्रकृतिविषनिःशेषधयनजन्याविद्यानिवृत्तिरुक्ता । भगवदानन्दनटनदर्शनजन्यपरमानन्दानुभवः प्रदर्श्यते । 'अवैमि परं पुमांसम्' इति ब्रह्मविज्ञानमुक्तम् । तेन प्रकृतिविषहरणमपि सूचितम् । तदानीं स्वस्वरूपाविर्भावः स्यादित्युच्यते सूत्रकृता 'संपद्याविर्भावः स्वेन शब्दात्' इति । तिष्ठतु स आविर्भावः । पश्चाद्भवतु सः । गोपालस्य नवनीतनटनाविर्भावः पुरस्ताद्भवतु । तन्नटनमनुभूयानन्तरं संपत्स्ये यद्यपि प्रतिबन्धकमायानिवृत्तिर्निर्वृत्ता । कुञ्चितपादः श्रीनटराजः । चिदम्बरे चित्सभायामीश्वरो नृत्यति । अयं गोपालशिशुराकुञ्चितपादः । आनन्दो ज्ञानविशेषः । यदि सामान्यात्मकज्ञानाकाशे ईश्वरो नटति, अयं

ज्ञानाविशेषभूतनन्दभवने नटतीति वैजात्यम्। नन्दभवनं चानन्दभवनम्। नाथशब्दश्चेश्वरपर्याय इत्यप्यवधेयम्। यदीश्वरो भिक्षुरयमपि नवनीतभिक्षुः। नाथशब्दः कर्तरि व्युत्पत्त्या याचकार्थकोऽपि भवति। नवनीतं याचतेऽयं विचित्रं नृत्यन्। चतुर्थलक्षणविषयभूतप्रयुक्तिरत्र सूच्यते। 'अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इति तल्लक्षणोपक्रमः। अस्य नटस्य चेतनमोक्षणदीक्षा सपत्नीकस्य दया दीक्षाशेषजनमोक्षणे। मोक्षश्च मनसस्तत्र लयेन हृदयग्रन्थिच्छेदेन च भवेत्। नवनीतं च द्रुतमतिमृदु मसृणं मुमुक्षुचित्तम्। अद्रुतममुमुक्षुसंसारिचित्तम्। यागसमाप्तेः पूर्वं यागदीक्षितोऽयायजूकलोकसामान्यमतिवर्तते। यागो न संपूर्णः। अयं यज्वा मध्यमावस्थः। व्रतोपवासप्रजागरादिभिरस्य महदौष्ण्यं स्यात्। नेत्रयोर्महान् दाहश्च स्यात्। तच्छान्त्यर्थं तस्य तद्वन्मध्यमावस्थनवनीतेनाञ्जनमभ्यनुजानाति श्रुतिः। नवनीतचोरः कृष्णो मुमुक्षुगोपीनवनीतहृदयचोर इति स्वापदेशार्थः। यदा भगवद्विषये द्रवति चित्तम्, तदानीमेव भगवांस्तच्चित्तं गृह्णाति, तदात्मसात्करोति च। एतदभिप्रेयते 'गोपीमनांसि नवनीतमुतामुमोषीः' इति श्रीवत्साङ्कमिश्रैः। भगवांश्चेतनरक्षादीक्षितः। तस्य क्रतुश्चेतनरक्षणम्। तच्च तद्धृदयस्य ग्रहणेन भवेत्। नवनीतदशापन्नमुमुक्षुहृदयग्रहणेन भ-

गवतः क्रतुर्निवर्त्यते । मुख्यं नवनीतमेवाश्रितद्रव्यत्वादीप्से- त्वेत्तत्पुरुषार्थं स्यान्न क्रत्वर्थम् । स्वकामनाप्रयोज्यत्वं वा स्वक्रतुनिर्वर्तनप्रयोज्यत्वं वा नवनीतार्थनटनस्येति मीमांसा भवति । नाट्यस्य मुख्यनवनीतलाभः प्रयोजको वा नवनी- तसमानहृदयहरणेन चेतनरक्षणव्रतनिर्वर्तनं प्रयोजकं वेति विचारः सूच्यते । एतच्च श्रीवत्साङ्कमिश्राणां श्लोके स्पष्टम् ॥

आविर्भवतु । मम लोचनचमत्काराय चाक्षुषं भूयात् । न शुद्धब्रह्मचैतन्यमात्रापरोक्ष्यं काङ्क्षामःआपरोक्ष्ये न ब्रह्मणः प्राधान्यरूपविशेष्यत्वमिच्छामः । इच्छामस्तस्य विशेषणत्व- मात्रम् , तन्नाट्यस्य च विशेष्यत्वम् । न जयन्तीसंभवमात्रेण तृप्यामः । तन्नाट्यस्याविर्भावमभिलषामः । 'रुरुदुः सुस्वरं राजन्' इति गोपीरोदनं श्रुत्वा गोपालः शौरिराविरभूत् । पूर्वश्लोके स्वस्यैवरुदितमुक्तम् । अत्र तन्नाट्यस्याविर्भावः । रुदितानन्तर्यमाविर्भावस्योभयत्र समानम् ॥

अनिभृताभरणम् । 'निजानि निःशब्ददशां ययाचे । बद्धाञ्जलिर्बालविभूषणानि' इत्याभरणानां निःशब्दताभ्यर्थनं नवनीतचौर्यकाले । अत्र मातरं वा गोपीर्वोपनृत्य याचनाव- सरत्वात् , नर्तनोपयुक्तत्वाद्भूषणानां सततशब्दायमानत्वमि- ष्टमावश्यकं च । अस्मिन्पादेऽनिभृतेत्यनन्तरपादे निभृतेति ।

एकः पादोऽनिभृताभरणोऽन्यो निभृतः । नर्तनमनुकुर्वतः श्लोकपादे ॥

पुरस्तात् । 'स पुरस्तात्' इति भूमविद्योक्तप्रत्यभिज्ञापनम् ॥

आकुञ्चितैकचरणं निभृतान्यपादम् । एकान्यशब्दावव्यवस्थां सूचयतः ; नाट्ये पर्यायेण पादयोराकुञ्चितत्वं निभृतत्वं च । 'सव्यं पादं प्रसार्य' इत्यादाविव न व्यवस्था ॥

दध्ना निमन्थमुखरेण निबद्धतालम् । 'दधिरवैर्यत्ताण्डवं शिक्षितम्' इति भाट्टानुभवः स्मार्यते । नवनीतनटनस्य न बाह्यस्तालो भवति । यत्र नवनीतं तत्रैव दधनि तालोऽपि भवति । 'असिद्धं बहिरङ्गमन्तरङ्गे ॥'

नाथस्य नन्दभवने नवनीतनाट्यम् । नवनीतनटने आचार्याणामधिका प्रीतिरिति तात्पर्यचन्द्रिकायां दिव्यश्रेष्ठितविषये भाष्योक्तादिपदविवरणे तस्य स्वशब्देन निर्देशाद्गम्यते । 'अशिक्षितं तुम्बुरुनारदाद्यैराभीरनाट्यं नवमास्थितेन' इति यादवाभ्युदये । यथा रागादीनां भैरवीकाम्बोध्यादिसंज्ञास्तद्वदस्याभीरनाट्यमिति संज्ञा । एतन्नाट्यस्य नवनीतत्वं नूत-

नत्वेनानीतत्वात् । यन्नवमभवत्तदस्य नवनीतस्य नवनीतत्वम् । तस्य नूतना संज्ञा आभीरनाट्यमिति । आभीरनाट्यस्य नवत्वविशेषणं यादवाभ्युदये । नाट्यस्य नवत्वमाचार्यचित्तमावर्जयति । नवमानीतं नाट्यं नवनीतनाट्यं भवेत् । नवनीतार्थं नाट्यं भगवतः । मम तु नाट्यमेव नवनीतम् । नवं भगवद्विषयतां नीतं हृदयमपि नवनीतम् । नवमपूर्वं भगवत्प्रावण्यस्वभावं नीतम् ॥

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनं
दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् ।
पायादीषत्प्रचलितपदो नापिगच्छन्न तिष्ठन्
मिथ्यागोपः सपदि नयने मीलयन्विश्वगोप्ता ॥

नवनीतं ययाचे मातरं गोपीश्च । याच्ञायां मोघायां ताः संतोषयितुं तत्पुरतो विचित्रं ननर्त । तथापि तास्तद्वाञ्छितं न ददुः । जीवनं खलु नवनीतं गोपिकानाम् । तद्विक्रीय तासां जीविका भवति । यथा पुष्पमालाविक्रयेण मालाकाराणाम् । अत एव मालाकारेण भगवते सहर्षं तत्समर्पणे विस्मयते ऋषिः 'धन्योऽहमर्चयिष्यामीत्याह माल्योपजीवनः' इति । उपजीवनपदेन जीविकाहेतुभूततद्दानस्य

दुष्करत्वं व्यज्यते । नवनीतनटनेऽपि यदा न ददुस्तच्चौर्ये प्रववृते गोपालः । पादयोः श्रमो वृथाभूत् । इदानीं करेण रहो गृह्णामीति हरणे प्रवर्तते । पादव्यापारभूतनटनस्य नैष्फल्ये करेण हरणे प्रयत्नः क्रियत इति व्यज्यते 'हर्तुं कुम्भे विनिहितकरः' इति श्लोकोपक्रमे । अस्माभिर्गोपालनाट्यरूपनवनीतं लब्धम् । तेन तु नवनीतं न लब्धम् । अस्मत्प्रयत्नः सफलोऽभूत् । नवनीतलाभार्थस्तत्प्रयत्नो वृथाभूत् । पूर्वमलब्धमेव नवनीतं हैयङ्गवीनशब्देनोच्यते । तेनापि नवत्वं स्पष्टीक्रियते । क्रमविचारः पञ्चमलक्षणे । अत्र क्रमणरूपक्रम उचितो वा न वेति वितर्कडोलारूढो गोपालः । द्वितीयतृतीयश्लोकयोरन्यो डोलारोहः । ईषत्प्रचलितपदः क्रमणे प्रवृत्तः । क्रमणतदभावयोर्मध्ये डोलायतेऽस्य मनः । नापि गच्छति न तिष्ठति । संशयप्रयोज्या मीमांसा । अन्यतरकोट्यनिर्णयेन संशयः । अत्र क्रमविषयमीमांसा भगवतः । 'विष्णोः कटाक्षम्' इति भगवतोऽस्मदनुजिघृक्षास्मद्बुद्धिपूर्वप्रयत्नात्पूर्वमेव भवतीति क्रमः प्रदर्श्यते 'हर्तुं कुम्भे विनिहितकरः' इति । कुम्भो देहः । नवनीतदशापन्नं मनो हर्तुं देहान्तः करं निदधाति । अस्मन्मनस ईश्वरसात्करणे तस्यैव प्रथमप्रवृत्तिर्द्योत्यते । हरणावसरप्रतीक्षः सो यथा चोरः । ईश्वरस्य सौहार्दं प्रथमम् । अनन्तरं

यदृच्छासुकृतम् । तत्र च नास्माकं बुद्धिपूर्वककृतिमत्त्वम् । 'स्वलक्षितसमुद्गमे सुकृतलक्षणे कुत्रचिद्घुणक्षतलिपिक्रमादुपनिपातिनः पाति नः' इत्याचार्याः । न खलु घुणा अक्षरं रचयाम इत्यभिसंधायाक्षराकारक्षतानि कुर्वन्ति तालपत्रेषु । अक्षरनाशनार्थे तेषां क्षतकरणप्रवृत्तिः । तथापि यदृच्छया तदिच्छाविरोधेनाक्षराकारता जायते तत्क्षतेषु । अक्षरं पदं माभूत्क्षरमेवास्त्वस्माकमित्येव वयं संकल्प्याक्षरभवनविरोधिदुष्कृतमेव चिकीर्षामः, कुर्मश्च । अपकृतौ चिरदीक्षिताः खलु वयम् । तथापि कदाचिदहृदयेनास्मत्संकल्पविरुद्धं यदृच्छया किञ्चित्सुकृतं कुर्महे कारयिष्यामहे वा । यदृच्छा-नास्मदिच्छा, परं तु भगवदिच्छा । यदृच्छासुकृतेऽपि भगवद्व्यापार एव । निदानं तत्रापि स्वयमखिलनिर्माणनिपुणः । अस्मद्व्यापारः सुकृतप्रतीपः । यदृच्छासुकृतरूपद्वितीयपर्वण्यपि भगवदुद्यमस्य प्राधान्यम् । विष्णोः कटाक्ष इति तृतीयपर्व ऐकान्त्येन तद्व्यापारः । एवमस्मन्मोक्षणनिर्वर्तने भगवतः प्रवृत्तेः प्राथमिकत्वमनन्तरमप्रतिषेधरूपा द्वेषाकारा मनोवृत्तिरस्मदीयेति शास्त्रीयः क्रमो बोध्यते श्लोकादौ । एतेनापि क्रमलक्षणविषयसूचनमित्यवधेयम् ॥

हर्तुं कुम्भे विनिहितकरः स्वादु हैयङ्गवीनम् । धर्म-

संस्थापनार्थमेवावतीर्णस्य तदर्थमेव स्वेनावतीर्येत इति गायतो योगेश्वरत्वेन प्रसिद्धस्य सर्वयोगोपदेष्टुर्धर्मसेतोः कथं चौर्ये प्रवृत्तिः। अस्तेयरूपव्रतमपरिहार्यं योगिनः। स्वानुष्ठानेन धर्मानुष्ठापनं न्याय्यम्। श्रेष्ठत्वाच्च स्वेन साध्वाचरणीयं लोकान् 'रमणीयचरणम्' ग्राहयितुम्'। अत्रोच्यते गोकुले गोपालप्रादुर्भावानन्तरं प्रभूतत्वं नवनीतस्य। शुभेन तन्मनसा ध्यातं वृन्दावनं गवां वृद्धिमभीप्सता। गोपालशुभानुग्रहेण प्रभूतं नवनीतं लब्धं गोपीभिः। तेन गोपालेन देवेन दत्तस्य नवनीतस्य तद्याचनं विनैव स्वयमेव तस्मै प्रदानं वैधम्। तद्दत्तं याचमानायापि तस्मा अप्रदाय भुञ्जाना गोप्यः स्तेना भवेयुः। स्वेन तन्नवनीतापहाराभावे आश्रितानां चौर्यदोषो नियतभावी। स माभूदिति स्वस्य चौर्यदोषोऽभ्युपगम्यते। स्वस्येश्वरत्वान्न दोष आत्मानं बाधेत। 'तेजीयसां न दोषाय'। अनीश्वरजनस्य दोषस्तं बाधेत। गुरुलघुविचारं सम्यक्कृत्वा भगवताश्रितचौर्यनिवारणार्थं स्वचौर्यमभ्युपगम्यते। 'स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुम्' इति खलु तत्स्वभावो वर्ण्यते। अस्मज्जन्मनिवृत्त्यर्थं भाविनोऽस्मज्जन्मभेदान्स भजते। अस्मत्पुनर्जननिनिवृत्त्यर्थं तस्यावताररूपजनिः। अस्मद्भक्तिभारोऽङ्गीक्रियते तेन। आत्मवदस्मान्स पश्यति। वयं तमात्म-

त्वेन नाङ्गीकुर्यः । स एवास्माकं परम आत्मा । अयं सूर्यसूर्यः स्वकरमस्मन्नवनीतहृदये प्रसारयंस्तद्द्रवीकुर्यादिति मनोरथो व्यज्यते । वदनाम्भोजदिवाकरो युवेति वक्ष्यते । हृदाकाशे चिदादित्यः सदा भाति निरन्तरम् । नास्तमेति । हृदयाम्भोजदिवाकरोऽपि भवति । न चोदेति ॥

स्वादु । 'पत्रं पुष्पं फलं तोयम्—' इत्यादिवाह्वान-क्रीतान्सर्वसुलभान्पदार्थानप्यश्नाति तीव्रक्षुधार्तः । तांश्च बहु-मन्यते । यथान्तरक्षमादिकुसुमैर्भगवान्संतोष्येत न तथा बाह्यकुसुमैः । यदि हृदयपुण्डरीकमेव पुष्पत्वेनोपह्रियेत तस्मात्स्वादुतरं किं तस्य ॥

हैयङ्गवीनम् । द्रवितुमिदानीमेवारब्धं नवं नवनीतद-शाप्रारम्भं चित्तं तेनापजिहीर्षितम् । द्रवणप्रारम्भ एव तदन-पहारे तत्पुनः कठिनीभावमापत्स्येत । तन्माभूदिति तस्य सद्य एव चोरणम् । अत्र हैयङ्गवीनपदप्रयोगेणैतच्चारु व्यज्यते ॥

दृष्ट्वा दामग्रहणचटुलां मातरं जातरोषाम् । श्रेयांसि बहुविघ्नानि । सर्वशक्तस्येश्वरस्यापि परःसहस्रं विघ्ना । 'विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यते' यो वा को वा

तद्विषये यतताम् । ईश्वर एव यतताम् । भक्तिविषययतने विघ्नाः स्युरेव । विघ्नाभावे सर्वे सद्यो मुच्येरन् । अत्र मातैवाजानती पुत्रश्रेयःपरिपन्थिनी भवति । निश्रेयसं दातुं यतते पुत्रो नवनीतहृद्यहरणेन । तेन चात्मानमानन्दयितुमतिशयवन्तं कर्तुं चेच्छति । हृन्नवनीतहरणेनैव तस्य स्वास्थ्यमारोग्यं च भवेत् । तदचोरयंस्तदभुञ्जानो नितान्तं ज्वरति, तप्यते च । नवनीतस्याधिकप्राशने मान्द्यमस्वास्थ्यं च स्यादिति मन्यतेऽर्भकं प्राकृतं मन्यमाना माता । न सा विवेद पुत्रस्य तदनशने ज्वरवृद्धिम, अशने च विज्वरताम् । मातरं स्वस्वास्थ्यपरिपन्थिनीं न न्यषेधन्मातृभक्तः सुतः । पितृवचनपरिपालनं कृतं रामेण, सपत्नीमातृवचनपरिपालनं च । धर्मबन्धेन बद्धः कैकेय्या पिता । तया तेन च बद्धो राम आरण्यकव्रते । वनगमनं निषेधन्ती माता नानुवर्तिता तेन । मात्रा बध्यतेऽयं सुतः । तस्याः सुतबन्धनोद्यमः पुत्रस्नेहमयभावकृतः । हितशिक्षणबुद्ध्या तस्याः कोपः । 'मुहुः प्रवृत्तं नवनीतचौर्ये वत्सान्विमुञ्चन्तमदोहकाले । उलूखले कुत्रचिदात्तपुण्ये बन्धुं सतां बन्धुमियेष माता ॥' इति यादवाभ्युदये । उभयत्र मातेति प्रयुज्यते । मातेति गुरुत्वबोधनेन तस्यास्तत्स्खलने शासितृत्वस्यावश्यकता बोध्यते । तद्बोध्यत इव श्रीवत्साङ्कमिश्रैर्गुर्वीशब्देन 'त्वामन्यगोपगृह-

गव्यमुषं यशोदा गुर्वी त्वदीयमवमानममृष्यमाणा । प्रेम्णाथ दामपरिणामजुषा ववन्ध तादृङ्न ते चरितमार्यजनाः सह-न्ते ॥' इत्यतिमानुषस्तवे । यथा प्रतिपाद्यमतिमानुषं तथा प्रतिपादकः स्तवोऽप्यतिमानुषः । यथा माता पुत्रावमानं न सेहे, तथा पुत्रस्य बन्धनाभ्युपगमेन मातृवशवर्तित्वं तन्नृ-हस्थोलूखलवशवर्तित्वं चार्यजना न सहन्ते । 'गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशाश्रुकलिलाञ्जनसं-भ्रमाक्षम् । वक्त्रं विनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति' इति कुन्त्यनुभवः । न मुख्य-मातृवशवर्तित्वम्, किं तु तदभिमतिविषयगोपीवशवर्तित्व-मिति गोपीपदेन सूच्यते । क्षत्रिया पितृष्वसा खलु कुन्ती । गोपीकर्तृकदामबन्धनमर्भकस्योदरस्थ, सर्वलोकाभयप्रदस्य शिशोर्भयभावनं च साममोहयताम् ॥

पायादीषत्प्रचलितपदो नापि गच्छन्न तिष्ठन् । मातृ-शासनभीतशिशुस्वभावस्य चारु वर्णनम् । प्रथमं पलायितु-मुपचक्रमे । धावनप्रयत्नक्षण एव तदुद्यमाद्विरराम । भया-त्स्थितिगत्योर्मध्ये वर्तत इव माधवः । स्वयं संकटे वर्त-मानो गतिमविन्दन्भीतभीतो गोपालो मां पायात् । 'स मातुः स्विन्नगात्राया विस्रस्तकवरस्रजः ।....कृपयासीत्स्वबन्ध-

ने ॥' इति यद्यपि कृपया स मातृवशोऽभूत्तया शासनाय, सर्वेषां प्रशासिता सोऽस्मान्पातुं समर्थ एव। अनेन भीतभीतेनास्माकमभयप्रदानमलम् । नान्यतो वयमभयं वृणीमहे ॥

मिथ्यागोपः । अस्य अनन्याधीनैकसत्यवस्तुत्वेऽप्यस्य गोपत्वं मिथ्या । नैजगोपबालत्वे गोपीदामतो भीतत्वं न्याय्यम् । अगोपोऽपि बिभाय । किमस्य भक्तपारवश्यम् । मिथ्यागोपो विश्वस्य कृत्स्नस्य सत्य एको गोप्ता ॥

सपदि नयने मीलयन्विश्वगोप्ता । पायादिति प्रथमं प्रार्थनम् । तस्य स्थितिगतिडोलान्दोलनदर्शने कथमेतत्संकटवर्त्यस्मान् रक्षेदिति शङ्का जायेतैव । तदपनीयते तस्य गोपत्वस्य वेषमात्रत्वस्य स्मारणेन मिथ्यागोप इति । प्रथमशङ्कायामपनीतायां लोचने भयेन मील्येते । तादृशभयापन्नः कथं पायादिति पुनः शङ्कोन्मिषति । तदपनीयते विश्वगोप्तेति स्मारणेन । गोपालो विश्वपालकः । 'बाहुं भुजगभोगाभमुपधायारिनिपूदनः' इत्यत्र सागरमनुलङ्घ्य दर्भशयनादनुत्थाय भुजमुपधाय शयान एव शत्रून्निहन्तुं समर्थ इत्यप्यर्थो लभ्यते 'उपधायारिनिपूदनः' इति समभिव्याहारेण । तथात्रापि 'नयने मीलयन्विश्वगोप्ता' इति समभिव्याहारेण चक्षुषी मीलयित्वाप्ययं विश्वरक्षणसमर्थ इति

व्यज्यते । योगनिद्रया निद्राण एव जगद्रक्षति भगवान् । सोऽस्य स्वभावः । न केवलं मां पातुं समर्थः । इमामवस्थां संप्राप्तोऽपि विश्वं मां च गोपायेत् । मिथ्यागोपस्य सत्यगोप्तृत्वमिति विरोधः स्फोर्यते ॥

व्रजयोषिदपाङ्गवेधनीयं
मधुराभाग्यमनन्यभोग्यमीडे ।
वसुदेववधूस्तनंधयं त-
त्किमपि ब्रह्म किशोरभावदृश्यम् ॥ ६ ॥

अन्यवद्गोपगृहगव्यमुपभेनं चिरचोरं दाम्ना भन्त्स्यमानं श्रुत्वा सर्वा व्रजयोषितस्तत्र समेयुः । स्वगेहदामानि संदघत्यपि यशोदा तानि सर्वाणि बन्धनायानलमिति ज्ञात्वा व्रजस्थसर्वगृहदामानि तत्रानाय्य तं बन्धुं प्रचक्रमे । तास्ता योषितो यशोदयाहूताः स्वगृहदामानि तत्रानिन्युः । अयं राजपुत्रो मधुरानगरे जातो गोपीमध्यपीततस्तैर्दामभिरुदरे बध्यते । कोऽयं विधिरित्यतदर्हस्य राजपुत्रस्य शबरकुलमध्यपतितराजकुमारस्येव दुरवस्थां विचिन्त्य विस्मिता भवन्त्याचार्याः । षष्ठलक्षणेऽधिकारिचिन्ता । अत्र 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति वाङ्मनसविदूरम् 'यत्तदद्रेश्यमग्राह्यम्' इत्यदृश्यमग्राह्यं किमपि ब्रह्म दृश्यं भवती-

स्युच्यते । तस्य दाम्ना ग्रहणं चानन्तरश्लोके सूच्यते । अदृश्यो दृश्यते । अगृह्यो गृह्यते । अदृश्यस्यागृह्यस्य लक्ष्यस्य ब्रह्मणो वेधने कोऽधिक्रियते । 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यम्—' इति श्रुतिः । 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासा निशितं संधयीत । आयम्य तद्भागवतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विद्धि ॥' इति तत्पूर्वश्लोकः । श्रुतिमितगुणाक्लिष्टलब्धावधानैः सत्त्ववद्भिः प्रणवधनुषा प्रत्यग्बाणः प्रयोक्तव्यः । त एवाधिकारिणो लक्ष्यब्रह्मवेधने । तद्वेधने प्रणवोच्चारणानधिकारिण्य उपासानर्हाः प्रमत्ता गोप्यस्तदेव लक्ष्यमपाङ्गैर्विध्यन्ति । उपासानिशितेन तद्भावगतचेतसा प्रक्षिप्तः प्रत्यग्बाणो लक्ष्यं विध्येत् । अत्र निशितैरपाङ्गवीक्षणैर्विध्यते । नात्र प्रणव उपासनं वा । प्रेममात्रमस्ति निरतिशयम् । प्रणवोच्चारणपूर्वकोपासनन्यसनादिकं भवान्तरे वृत्तं स्यात् । इदानीं प्रेममात्रेण वेधनरूपफलं लभ्यते । गोप्योऽत्र वेधनेऽधिकारिण्यः । तासां दृश्यं किमपि ब्रह्म । अस्य कैशोरलीलानुभवभाग्यं कस्य स्थलस्य न्याय्यम् ? किं स्थलं तदनुभवाधिकृतिमत् ? जन्मभूमावेव प्रायेण कैशोरं नीयेत । माता कैशोरलीलानुभवभाग्यवतीत्यत्र न कोऽपि विवदेत । जन्मभूमिरपि माता जायमानस्य पुरुषस्य, यद्यपि सोऽजा-

यमानः पुरुषो भवेत् । वस्तुत अजायमानोऽपि केनचिन्नि-मित्तेन जायमान इव भवत्येव । तादृशस्यापि पुरुषस्य जन्मभूमिर्मधुरा तन्मातृत्वाभिमानोचिता । वन्दे मातरमिति जन्मभूमिभूतसिन्धुदेशविषया उक्तिरुद्घोष्यते सर्वैस्तद्देशाभि-मानिभिः । मधुरानुभाव्यमस्य कैशोरम् , मधुरान्यस्थलेना-भोग्यं च । 'अनन्यभोग्यम्' इत्यत्रान्यशब्दस्तदव्यवहितपूर्व-पदस्थमधुराशब्देन स्वरसतोऽन्वियात् । मधुरान्यभूतव्रजाभो-ग्यमित्यर्थः । व्रजाभोग्यं मधुराभोग्यं चेदं भाग्यं व्रजेनानु-भूयते । कथमिदमुपपद्यत इति चेत् , अनन्यभोग्यत्वादस्य भाग्यस्य । अनन्यभावैर्भोग्यम् अनन्यभावा गोपाले व्रज-वासिनः सर्वेऽपि । न तत्रैकोऽप्यन्यभावो जनो लभ्येत । मधुरायां न केवलमन्यभावाः, प्रत्युत विरुद्धद्वेषभावाः कंसादयश्च । यद्यपि कंसो हृषीकेशं सर्वदेशसर्वकालसर्वाव-स्थासु चिन्तयंस्तन्मयं जगदपश्यत् , तथापि द्वेष्यत्वेन खलु तच्चिन्ता । कृत्स्नो व्रजस्तदन्यभावः । न तथा कृत्स्ना मधुरा । कार्त्स्न्येनानन्यत्वं व्रजस्य, तेना-भोग्यत्वं न्याय्यमित्यनन्यभोग्यमिति पदस्यावृत्त्या लभ्यते । यदुक्तं पूर्वपक्षिणानन्यभोज्यमिति तदुक्तिरेव तस्योत्तरीक्रि-यते । यथा 'तथा प्राणाः' इति पूर्वपक्षिवाक्यं सिद्धान्ति-वाक्यमपि भवतीति चारु प्रदर्श्यते शारीरकशास्त्रार्थदीपि-

कायाम्। वसुदेववधूर्देवकी स्वस्तन्यमेनं पाययितुमर्हति। तदधिकारस्तस्या एव। तस्या राजपुत्र्याः पुत्रो गोपीभिरासादितो बध्यते। विपरीतमेवात्र कृत्स्नं विधेर्विलसितम्। मधुराभाग्यं मधुरान्येन स्थलेनाभोग्यं व्रजेनानुभूयते। देवकीस्तनंधयं गोपीस्तनंधयं भवति। अजमदृश्यमनिर्देश्यं किमपि ब्रह्म दृश्यं किशोरं भवति। एवमाधिकार्येनाधिकारिचिन्तात्र भवति॥

व्रजयोषिदपाङ्गवेधनीयम्। वेदनीयमित्यपि पाठः। तथापि नार्थभेदः। अदृश्यं ब्रह्मैतदपाङ्गवेधनीयं भवति। दामबध्यत्वं सह्येत। चिरचोर इदानीं चौर्यं कुर्वन्नेवासादितः। अपाहार्षीत्स्थेयमकार्षीत्। एनं बधानेत्युच्चैरुद्घोषयन्त्यो व्रजयोषितस्तं निशितनिशितैरपाङ्गवीक्षणैस्तीक्ष्णं विध्यन्ति। तदपाङ्गवेधनमसह्यं दामबन्धनं सह्यमिति व्यज्यते। उपासानिशितत्वस्थाने वीक्षणनिशितत्वमत्रेति बोध्यम्। यद्वा गोप्यपाङ्गवेधनस्य परमभोग्यत्वबुद्ध्या दामबन्धनस्य सह्यत्वं भोग्यत्वं च॥

मधुराभाग्यम्। मधुराया अभाग्यमित्यपि पदच्छेदः। जन्मनगर्या मधुरयाननुभूतमिदं भाग्यम्॥

अनन्यभोग्यम्। अनन्यैर्गोपगोपीजनैर्भोग्यम्। अन-

-न्याश्चिन्तयन्तो ये जनाः पर्युपासते, तेषां नित्याभियुक्तानां योगक्षेमं खल्वयं वहति । योगश्चालब्धलाभः । मधुरयाल-ब्धस्य व्रजेन च पूर्वमलब्धस्य भाग्यस्य लाभो व्रजस्य योगः । तद्रक्षणं क्षेमः । न्याय्यं व्रजभोग्यत्वमस्य भाग्यस्य ॥

ईडे । तद्भाग्यानुभवकाले वन्दिजनोऽहं न संनिकृष्टः । इदानीं तमेवानुभवं भावनाप्रकर्षेणानाय्याहं तद्वृत्तसंनिकर्षं लब्ध्वा तस्य बन्दी भवामि । अनुभवप्रकर्षेणाचार्यस्तदानींतनः संवृत्त इव ॥

वसुदेववधूस्तनंधयम् । मधुराभाग्यमित्युक्तम् । ततोऽपि मातृभाग्यत्वकथनमुचितम् । देवकीभाग्यत्वमुच्यते । पितुर्भाग्यत्वमपि सूच्यते वसुदेवनामपठनेन । इतरथा देवकी स्वनाम्नैव निर्दिश्येत । 'यस्यैते तस्य तद्धनम्' इति वधूभाग्यं भर्तुरपि । राजपुत्रीपुत्रत्वकथनं वनचरगोपाल-भावनायामसंगतमित्याक्षिप्येत । देवकीति नोक्तम् । किं तु वसुदेववधूरिति । वसुश्चासौ देवश्च वसुदेवो नन्दः । अष्टसु वसुषु नन्दोऽप्येकः । तद्वधूर्यशोदा । तत्स्तनंधयत्वं मुख्यम् । तन्त्रेणाचार्यैरिदं सर्वं विवक्ष्यते सर्वतन्त्रस्वतन्त्रैः ॥

तत् । एतेन मुक्तेः पूर्वं परोक्षं वस्त्वद्यैवापरोक्षं भवति ॥

किमपि ब्रह्म किशोरभावदृश्यम् । निरतिशयबृहत्त्व-

र्वतः परिवृढं ब्रह्म किशोरभावमापद्यते । ब्रह्मणो जन्मनि नाधिकारः । कर्मवश्यानां जन्म । अकर्मवश्यं ब्रह्म किशोरो भवति । अत्र यथा विरोधस्फोरणं तथैव पूर्वेषु पादेष्वपि । किमपि परं ब्रह्म परवासुदेवः । परत्वं नाम सर्वादित्वं सर्वकारणत्वम् । कारणं ब्रह्म । अयं गोपालः कार्यमवताररूपं ब्रह्म । परवासुदेवविग्रहस्य विकृतिर्गोपालविग्रहः । कार्यत्वेऽपि कारणगतवासुदेवत्वं न त्यज्यतेऽस्मिन्नवतारे । परवासुदेवविकृतिर्विभववासुदेवः । वासुदेवत्वमुभयत्रानुगतम् । इतरास्ववतारविकृतिषु न प्रकृतिगतवासुदेवत्वान्वयः । प्रकृतिषट्कसूचनं समाप्यतेऽत्र । उत्तरश्लोके प्रारिप्सितं विकृतिषट्कसूचनमत्रापि सूच्यते वसुदेवेत्यादिना, किमपि ब्रह्मेत्यादिना च । परवासुदेवरूपब्रह्म प्रकृतिः, वसुदेवपुत्रो वासुदेवो विकृतिरित्युक्तं भवति ॥

परिवर्तितकन्धरं भयेन
स्मितफुल्लाधरपल्लवं स्मरामि ।
विटपित्वनिरासकं कयोश्चि-
द्विपुलोलूखलकर्षकं कुमारम् ॥ ७ ॥

प्रकृतिषट्कमिति प्रसिद्धं पूर्वषट्कं सूचितं षड्भिः श्लोकैः । अनन्तरमतिदेशविकृतिषट्कलक्षणानि सूचयिष्य-

न्ते । किमपि ब्रह्म कारणं प्रकृतिर्ब्रह्म किशोररूपाविकृतिरभू-दित्युक्तं षष्ठश्लोकान्ते । तच्चात्रतारकं भवत्युत्तरविकृतिषट्-कसूचनस्य । प्रकृतिवद्विकृतिः करोति । सर्वकर्तृविषये कर्तृ-त्वस्य प्राधान्यात् , कर्त्रीयं प्रकृतिः । 'परिवर्तयिता पितामहादीन्' इति स्मर्तृणां परिवर्तयिता प्रकृतिः परवासुदेवः । विकृतिर्गोपालोऽपि परिवर्तयति । स्वकन्धरां परिवर्तयति । प्रकृतिः स्वशरीरं परिवर्तयति । विकृतिः स्वशरीरैकदेशभूत-कन्धरां परिवर्तयति । अत्र कयोश्चिदिति सामान्येन नाम-निर्देशं विना सर्वनामशब्देन निर्दिष्टौ धनदसुतप्रकृतिकावि-दानीं वृक्षरूपविकृतिमन्तौ । प्रकृतिवद्विकृतिः कर्तव्या । वृक्ष-रूपेविकृती कुबेरसुतनलकूबरमणिग्रीवरूपप्रकृतितामापादनीये । अत्र विकृतिः प्रकृतिरेव क्रियते, न प्रकृतिवदित्यस्त्येव विशेषः । स च विशेषोऽनुष्ठातृविशेषस्वभावप्रयुक्तः । न कार्यभूता जीवा अत्रानुष्ठातारः । 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इति सूत्रोक्तप्रकृतिः खल्वत्र स्वव्रतमनुतिष्ठति । भागवतवचनसत्या-पनं चास्य व्रतम् । 'ऋषेर्भागवतमुख्यस्य तथ्यं कर्तुं वचो हरिः' इति शुकः । स्वसंबन्धेन स्वानुग्रहसंकल्पेन वा पाप-योनीनां चेतनानां प्रकृतिगमयितृत्वमस्य स्वभावः । एतद्यो-गेन प्रकृतिं गच्छन्ति चेतनाः । एतदुपसंपद्य स्वेन रूपेणा-भिनिष्पद्यन्ते संप्रसादाः सम्यक् प्रसन्ना भूत्वा । प्रकृति-

स्वापादनमस्यानुष्ठातुः स्वभावः। स्वभावो दूरतिक्रमः। अतः प्रकृतिवत्करणस्थाने विकृतेः प्रकृतीकरणमेतस्मिन्ननुष्ठातरि मर्षणीयम्। एवं सप्तमलक्षणार्थसूचनम्। अनन्तरश्लोके प्रकृतीक्रियमाणयोर्विशेषग्रहणं यमलार्जुनेति। तेनाष्टमलक्षणसूचनं तत्र। बन्धनव्यापारस्य दुःसहत्वं मन्यमानैराचार्यैस्तन्न वर्ण्यते। दामग्रहणमुक्तं दामग्रहणचटुलामिति। यथा बद्धं कोसलेन्द्रदासं हनूमन्तं द्रष्टुं लङ्कानिवासिनः सर्वेऽपि यथा मिलितास्तथा कोसलेन्द्राभिन्नं गोपालं वनचरं सर्वबन्धकं भन्त्स्यमानं द्रष्टुं सर्वेऽपि गोपीजना दामहस्तास्तत्र मिलिता इत्युक्तम्। उलूखलकर्षकत्वमुच्यतेऽत्र। गोपकिशोरस्य बन्धनं गोप्यत इति रसिकैर्भाव्यम्॥

परिवर्तितकन्धरम्। स्वभयहेतोर्मात्रादेः स्वमुखं परिवर्तयति। लीलया कन्धरपरिवर्तनं शिशुस्वभावः। भयहेतौ सर्वेषामयं स्वभावः वृक्षयोर्धनदपुत्रत्वेन परिवर्तनमत्र प्रस्तूयते। तदपि प्रथमं सूच्यत इव परिवर्तितशब्देन। कन्धरापरिवर्तने जायमानां विलक्षणां शिशुमुखशोभामनुभवरसिका जानन्ति॥

भयेन। न रोषेण यथा 'जगत्सशैलं परिवर्तयाम्यहम्' इति रोषेण रामावतारे। जन्मादिहेतोरस्य जगत्परिवर्तनं

स्वभावः । इदानीं स्वकन्धरां परिवर्तयति । यथाकथंचित्स्वस्य परिवर्तनस्वभावो न जह्यते । आत्मकृतिरस्य प्रकृतेः स्वभावः । 'तदात्मानं स्वयमकुरुत ।' 'आत्मकृतेः' जगत्सृजति ! आत्मानमपि सृजति । नास्य स्वः पर इति भेदः । आत्मनि कर्मकर्तृत्वे नास्मिन्विरुद्धे चिदचिच्छरीरं परिवर्तयति परवासुदेवः कन्धरां परिवर्तयति वसुदेवस्तनंधयः । प्रकृतिवत्करोति विकृतिः । चोदकोऽत्रानुष्ठाता ॥

स्मितफुल्लाधरपल्लवम् । 'अभयं वै जनक प्राप्तोऽसि' इत्यस्याभयत्वं प्रसिद्धम् । सत्यस्य सत्योऽहं भयं मिथ्या भावयामीति स्मयते । कन्धरां परिवर्त्य मन्दं हसनमर्भकस्वभावः । स्मितेऽन्यदपि निमित्तम् । दृष्टिगोचरीभूतयोर्यमलार्जुनयोर्गोपालकटाक्षाः पतन्ति । 'न नग्नो जलमाविशेत्' इति निषेधमुल्लङ्घ्य नग्नजलक्रीडारूपं शापनिमित्तं स्मृत्वापि स्मितोदयः । तदवसरप्रयुक्तम् 'असतः श्रीमदान्धस्य दारिद्र्यं परमाञ्जनम्' इत्यद्भुतं नारदवचनं स्मृत्वापि स्मितमुदेति । यथास्मज्जन्मनिवृत्त्यर्थमस्य जन्म तथान्यविटपित्वनिरसनाय स्वस्य विटपित्वमभ्युपगम्यत इवेति व्यज्यते पल्लवशब्देन । विटपी खलु पल्लवितो भवेत् ॥

विटपित्वनिरासकं... कुमारम् । दारुमयोलूखलदृढ-

बद्धत्वेनास्य विटपित्वमिव उलूखलोऽपि विटपिविकारत्वाद्विटपी । आधिकेऽल्पो मज्जति । बृहत्युलूखलेऽल्पोऽर्भको मज्जन्विटपी भवति । विपुलं बन्धनस्थानम् । तदुच्यते विपुलेति । यद्यप्ययं किशोरोऽल्पपरिमाणो, भूमाख्यत्ययं किमपि ब्रह्म । वैपुल्यविशेष्यवाची भूमशब्द इति भाष्यते । अस्य कुमारस्य भूमाभिन्नत्वाद्विपुले उलूखलेऽयमबध्यत । भूमत्वमेव प्रकटीकृतं बन्धनावसरे । कर्षकः कृष्णो भवेत् । यस्मिन्कर्षकत्वमतिशयेन वर्तेत तस्य कृष्णसंज्ञा न्याय्या । कुमारोऽप्ययमतिपृथुलमुलूखलं कर्षति । ध्रुवमस्मिन्कर्षकत्वमसाधारणम् । अतोऽस्य कुमारस्य कृष्णसंज्ञेवेत्यपि व्यज्यते ॥

स्मरामि । निरन्तरं भावयामि सार्वकालिकत्वे लट् ।

निकटेषु निशामयामि नित्यं
निगमान्तैरधुनापि मृग्यमाणम् ।
यमलार्जुनदृष्टबालकेलिं
यमुनासाक्षिकयौवनं युवानम् ॥ ८ ॥

'बद्धं तथा भावयतां मुकुन्दमयत्नविच्छेदिनि कर्मबन्धे' इत्याचार्याः । यद्यपि बद्धो भाव्यते, मुकुन्दः खलु भा-

व्यते । मुकुन्दो मोक्षदः । 'मोक्षमिच्छेज्जनार्दनात् ।' भाव्यमानस्य दामबद्धोदरत्वमस्तु नाम । तस्य मुकुन्दत्वरूपभावुकमोचकत्वमप्यस्ति । तद्गुणविशिष्टं मुकुन्दं दामोदरं भावयामः । तत्क्रतुन्यायेन भाव्यमानगुणप्राप्तिप्रसङ्गे, भावितमुकुन्दत्वाविरोधेन प्राप्तिर्न्याय्या । भावुकस्य बद्धत्वफलं भावितस्य मुकुन्दत्वविरुद्धम् । भाविते दामबद्धत्वं कादाचित्कम्, मुकुन्दत्वं नित्यम् । अनित्यस्य नित्येन व्यापकेन बाधो न्याय्यः । वस्तुतस्तु दामात्र प्रेम । मातृस्नेहाद्बध्यते । 'प्रेम्णाथ दामापरिणामजुषा बबन्ध' । कृपया बबन्धे । 'कृपयासीत्स्वबन्धने' इति श्रीशुकः । भक्तिबद्धत्वं मोक्षप्रदत्वरूपमुकुन्दत्वस्यानुकूलम्, न विरोधि । दाम्ना बद्धस्य पूर्वश्लोके भावनेन मुक्ततुल्यत्वं लब्धमाचार्यैः । बन्धनावसरे भूमत्वं प्रदर्शितं गोपालेन । 'न चान्तर्न बहिर्यस्य न पूर्वं नापि चापरम्' इति भागवते । भूम्नो भावने 'स एवाधस्तात्स उपरिष्टात्' इति भावितः सर्वत्र भवति । कर्मबन्धो निःशेषं वा किंचिन्मात्रसावशेषं वा गलितः । दामबद्धगोपालदर्शनं नित्यं भवति । ज्ञानसंकोचस्य निवृत्तप्रायत्वात् । एतदुच्यते— 'निकटेषु निशामयामि नित्यम्' इति । भावितस्य वासुदेवत्वमपि कथंचित्स्मारितं पूर्वश्लोके । तच्च सर्वत्र तद्दर्शनस्यानुकूलम् । न यशोदा न नन्दो न गोपगोपीजनाः

प्रत्येकं वा संभूय वा सर्वविहारदर्शिनः । यमलार्जुनौ सर्वां बालकेलिं दृष्टवन्तौ स्याताम्, तयोः सततं गृहद्वारि स्थावरतयावस्थितत्वात्, अप्रतिहतज्ञानत्वात्, अनिमेषलोचनत्वाच्च । यद्यपि बालकेलिरदर्शि ताभ्याम्, न यौवनकेलिरन्वभावि । व्रजाद्यातं ताभ्यां गोपालस्य युवत्वप्रादुर्भावात्पूर्वमेव । प्रथमश्लोके जातो जयन्तीसंभवः कीर्तितः । द्वितीयतृतीययोर्डोलास्थडिम्भः । गोपालडिम्भ इति तृतीयश्लोके । षष्ठसप्तमयोः किशोरः कुमारः । एतच्छ्लोकान्ते युवा । यौवनकेलयो यमुनयाध्यक्षिताः । मया तु सर्वा बाल्ययौवनकेलयो भावनाबलाद्भाव्यमानकरुणाबलाच्चाध्यक्ष्यन्ते । अस्माकं धर्मभूतज्ञानस्य विभुत्वं प्रकृतिः । कर्मवशेन संकुचितत्वं तस्य विकृतिः । दामोदरमुकुन्दभावनया कर्मबन्धे गलति, विकृतं ज्ञानं प्रकृतिवदसंकुचितं भवति । तत एव 'निकटेषु निशामयामि नित्यम्' इति ज्ञानस्य निरतिशयविकासानुभवः । विकृतधर्मभूतज्ञानस्य प्रकृतिवत्करणं स्पष्टमुच्यते प्रथमपादे । एतेनापि विशेषातिदेशसूचनम् । प्रकृतिस्थविभुत्वं विकृतावतिदिश्यत इव ॥ दामोदरं बन्धार ' इति पुराणे ।

निकटेषु निशामयामि नित्यम् । सर्वत्र सर्वदाध्यक्षयामि । सर्वबाल्ययौवनकेलिविशिष्टोऽनुभवः । भावितसर्वबि-

शिष्टगोपालानुभवं वयं सिद्धान्तयामः । यद्यपि केलीनां काचित्कत्वं कादाचित्कत्वं च अहं सर्वेषु देशेषु सर्वेषु कालेषु बाल्ययौवनसर्वकेलिविशिष्टं निकटवर्तित्वेन निशामयामि । 'यमुनातटनिकटस्थितवृन्दावनकानने महारम्ये । तिष्ठन्तं घननीलम्....' इति श्रीशाङ्करानुभवो विशिष्टः । यमुनातटनिकटावस्थितिवैशेष्येण सह सन्निकटेषु दृश्यत इत्याचार्यानुभवः । तत्र निकटशब्देन यमुनासामीप्यम् । अत्र तन्निकटवर्तित्वविशिष्टस्य मत्सामीप्यं सान्निकटत्वम् । यमलार्जुनयमुनानां तत्तद्वृत्तान्तानुभवस्तत्तत्कालावच्छिन्नः । अहं तु निकटेषु सर्वत्र सर्वं वृत्तान्तं नित्यं पश्यामि । भावनाधर्मवीर्येण खल्वहं पश्यामि । धर्मवीर्यस्य न भिन्नकालदेशादिकं व्यवधायकम् । सर्वत्रेत्यनुक्त्वा निकटेष्वित्युक्तिर्देशकालव्यवधानाभावव्यंजनार्था । समदेशवर्तित्वसमकालवर्तित्वरूपनिकटत्वं गृह्यते । देशकालसामीप्ये वैशद्यं स्याद्दर्शनस्य । 'तद्दूरे' इत्युक्तमेवोच्यते 'तद्वदन्तिके' इति । निगमान्तानां नित्यं दूरे । मम तु नित्यमन्तिके । निकटशब्देनान्तिकशब्दघटितश्रुतिप्रत्यभिज्ञापनम् ॥

निगमान्तैरधुनापि मृग्यमाणम् । पुरस्तात्परस्ताच्चान्विष्यन्तो निगमान्ता इदानीमप्यन्विष्यन्ति गोपालम् ।

नायमासाद्यते तैरद्यापि । श्रुतिरस्माकं चक्षुर्गोपालदर्शने । तच्चक्षुषैव वयमौपनिषदं तदेकगम्यं पुरुषं पश्येम । अस्मच्चक्षुर्नेपश्यति । वयं तु पश्यामः । चक्षुर्भूता निगमान्ता बहवः संगता नित्यमन्विष्यन्ति तमेव गायन्तो यथा गोप्यो रासपञ्चाध्याय्याम् । ते न पश्यन्ति । तैश्चक्षुष्मानहमेकस्तं निकटवर्तित्वेन नित्यं पश्यामि । किमिदमाश्चर्यम् । आरण्यकानि वनचरं गोपालं नित्यमन्विष्यन्ति, नाद्यापि पश्यन्ति । आरण्यकानां वनचरमार्गणे सहजं कौशलम् स्वेषु चरन्तं वनचरं ते न पश्यन्ति, कण्ठस्थकनकमणिवत् । अनन्तानां निगमानामन्तभागा अपि न विन्दन्ति ॥

यमलार्जुनदृष्टबालकेलिम् । अनारतं गृहद्वारे शापविमोचनपर्यन्तं स्थित्वा बालकेलिं सर्वामपरोक्षितवन्तौ । विजयसखत्वेन प्रसिद्धः कृष्णः । अर्जुनव्यावृत्त्यर्थं यमलेति । यमजनकुलसहदेवव्यावृत्त्यर्थमर्जुनेति । सदा देवेन कृष्णेन सह वर्तत इति सहदेवः । यद्यपि प्राणभूतानां पाण्डवानामत्र न ग्रहणम् , तन्नामसंकीर्तनं लभ्यत एव । अतः सप्राणस्य गोपालस्य भावनं लभ्यते । एकः स्वादु न भुञ्जीत । गोपालबालकेलिं निरन्तरं निर्निमेषं पश्यन्तावानन्दभरितौ परस्परं वीक्षमाणौ सहान्वभूतामिति व्यज्यते यमलग्रहणेन ॥

यमुनासाक्षिकयौवनं युवानम् । यूनः केलयः स्त्रीभिः सह । स्त्रियस्ताः केलयः सम्यक्सकौतुकमनुभवेयुः । यमुनापुलिनेषु वा यमुनानिकटतटेषु वा यौवनविहाराः सर्वाः । यमुनैकैव ताः सर्वाः केलीः साक्षाद्ददर्श । शुकोऽपि च साक्षाद्द्रष्टा साक्षी । यमुना देवता निर्निमेषा । सा च निवारितनिमेषाभ्यां लोचनाभ्यां निशामयामास । अवतारोत्तरं कृष्णवाहे वसुदेव आगते भयानकावर्तशताकुला नदी यमुना जानुदघ्नी भूत्वा मार्गं ददौ । आवर्तास्तदोपसंह्रिरे व्रजगमनानुपरोधाय । कृष्णस्य वेणुगीतमाकर्ण्य भूयः संरब्धा बभूव यमुनेति 'नद्यस्तदाकर्ण्य मुकुन्दगीतमावर्तबुद्धदमनोभवभग्नवेगाः । आलिङ्गनस्थगितमूर्मिभुजैर्मुरारेर्गृह्णन्ति पादयुगलं कमलोपहाराः' इति श्रीशुकेनोच्यते । नद्य इति यमुनैकोक्ता स्यात् । 'गात्रैः शोकाभिकर्शितैः' इतिवद्बहुरूपत्वमनोरथेन बहुवचनप्रयोगः स्यात् । कान्या नदी गोविन्दवेणुगीतं शुश्राव ॥

पदवीमदवीयसीं विमुक्ते-
रटवीसंपदमम्बुवाहयन्तीम् ।
अरुणाधरसाभिलाषवंशां
करुणां कारणमानुषीं स्मरामि ॥ ९ ॥

नित्यं निगमान्तैर्मृग्यमाणमहं निकटेषु निशाययामीत्युक्तम् । कथमिदं श्रद्धेयं भवेत् । निगमान्ता मार्गेण मृगयन्ते भगवन्तम् । वयं तु तमेव मार्गीकुर्मस्तत्प्राप्तौ । यदि प्राप्य एव प्रापकमार्गो भवेत्ततो नेदीयान्मार्गः को वा भवेत् । प्राप्यं ब्रह्मैव पदवी । ध्रुवमदवीयसी सा स्यात् । यदि वयमन्वेषणभारं वहेम, तदा वयमपि चिरं न लभेमहि । वयमस्मत्प्रयत्नेनान्वेषणे निराशास्तत्प्राप्तिभरं तस्मिन्न्यस्य तमेव तत्प्राप्तिपदवीं वृणीमहे । तदपारकृपया वयं तं झटिति प्राप्नुमः । अत्र नवमलक्षणप्रतिपाद्योऽसूचनम् । भक्तिस्थाने प्रपत्तिः । पाञ्चजन्यस्थाने वंशः । नगरप्रवेशानन्तरं वंशस्थाने पुनः पाञ्चजन्यः । कारणदेवरूपस्थाने कारणमानुषवेषः । कारणपूरुषः कारणमानुषो बभूव । तत्र तत्करुणैव कारणम् । एवं बहुविध ऊहोऽत्र प्रदर्श्यते ॥

पदवीमदवीयसीं विमुक्तेः । अत्र पदानां सौभ्रात्रमनिमिषनिषेव्यं श्रवणयोः । एष गुण आचार्यैरप्यन्वभावीति तर्कयामः । उत्तरश्लोकारम्भे ‘ अनिमिषनिषेवणीयमक्ष्णोः ’ इत्युच्यते । तेन पूर्वश्लोके श्रवणयोस्तादृशोऽनुभवोऽवर्तत इति सूच्यत इव । पादुकासहस्रे ‘ पदवीमदवीयसीं विमुक्तेः ’ इति पादुका वर्ण्यते । एतच्छब्दार्थसंश्लेषवशीकृताः श्रीमदप्पय्य-

दीक्षिताः 'पदवीरदवीयसीर्नैः' इति प्रायू युजन् । साधनस्य लघुत्वान्मुक्तिरूपफले न्यूनताशङ्कावारणाय व्युपसृष्टमुक्तिशब्दः । भक्तेः प्रारब्धप्रयुक्तानेकशरीरव्यवहिता स्यात्संपत्तिः । अस्मात्साधनादेतद्देहावसान एव स्यात् । सद्यश्च स्याद्यदि पुष्कला आर्तिः ॥

अटवीसंपदमम्बुवाहयन्तीम् । कृष्णमेघोऽयं वनचरः कृष्णमेघमयं करोति वनम् । इतस्ततश्चरन्नयमम्बुवाहः काननमम्बु वाहयति प्रापयति । 'काले काले चरति करुणावार्षुकः कृष्णमेघः' इति पादुकायाम् । करुणावार्षुकोऽयं वलाहकः । 'शमयन्भवसंतापं रमयन्साधुचातकान् । कृष्णमेघः कृपादृष्टिवृष्ट्या पुष्णातु मामपि ॥' इति चन्द्रिकाचार्याः । 'अम्बु वाहयन्तीम्' इति पृथगपि पठ्येत । मेघस्य कृष्णभाव एव तस्य वर्षुकत्वम् । मेघः कृष्णो भूत्वा वर्षति । अटवीसंपच्चाटवीप्रकर्षः । मरुकान्तारे मेघमालातीव प्रिया भवेत् । 'पानीयशालं मरुभूषु तत्स्यात्' । बृन्दावनकाननेऽवश्यं कृष्णमेघोऽपेक्षितः । 'शोभयन्दण्डकारण्यं दीप्तेन स्वेन तेजसा' इतिवदनुभवः ॥

अरुणाधरसाभिलाषवंशाम् । अचेतनस्य वंशस्यापि रागः समजनि तदधरमधुसुधापाने । तद्रागश्च सफलीचक्रे ।

केयं करुणा ॥

करुणां कारणमानुषीं स्मरामि (भजामि)। कृष्णमेघो गुरुतरकरुणाभारखिन्नो विष्णुपदात्काननमवतीर्य तत्र संचरन्नटवमिम्बु वाहयति। संपत्प्रकर्षः। अटव्या निर्जलत्वं स्वभावः। अटवीसंपच्च प्रकृष्टाटवीत्वम्। तच्च जलात्यन्ताभाववत्त्वम्। मरुकान्तारं मेघमयं करोति स्वसंचरणेन। कारणमानुषोऽयं गोपालः। तस्य मनुष्यवेषपरिग्रहे करुणैव कारणम्। करुणामूर्तिरेवायम्। यथाकथंचित्प्रकृतिस्थकारणत्वस्य विकृतावतारेनुवृत्तिः प्रदर्श्यते। आदिदेवो मानुषत्वेन विक्रियते। मर्त्यरूपेणावतारः करुणाकाष्ठा। पुंस्त्वसुलभकादाचित्ककलुषितधीत्वादिपरिहाराय पुंसोऽपि गोपालयूनोऽत्र मानुषीत्वेन रूपणम्। आदिमगुणः स्त्रीत्वसुलभः करुणाकाष्ठात्वप्रदर्शनाय स्त्रीत्वेन रूप्यते युवा। स्त्रीमयोऽयं युवा। आदिदेवोऽयं सर्वकारणम्। कारणदेवोऽयं कारणमानुषो भवति। कारणमानुष इति शब्दमेव कारणत्वम्। मानुषत्वे कार्यत्वमेव। कारणशब्दो व्याजार्थकः। विमुक्तिपदवीत्वेन करुणामूर्तित्वेन सकृदाश्रयणमप्यलं फलाय। भजामि आश्रये। तत्करुणाविद्धस्तां करुणां निरन्तरं भजामि निरन्तरं प्रीत्या सेव इति वा। तत्करुणां भजामि, तद्भजनेऽशक्तः। प्रपन्ना-

स्तत्तत्करुणाभक्ताः । भक्ता भगवद्भक्ताः । भजामीति परस्मैपदप्रयोगः । मम भजनभारस्तस्मिन्न्यस्तः । अहं भजामि चेत्तद्भारलघूकरणात्तस्यैव फलम् ॥

अनिमेषनिषेवणीयमक्ष्णो-
रजहद्यौवनमाविरस्तु चित्ते ।
कलहायितकुन्तलं कलापैः
करुणोन्मादकविभ्रमं महो मे ॥ १० ॥

श्रवणरमनया सेव्यः पूर्वश्लोकः । अक्ष्णोरनिमेषनिषेव्यमस्य यूनो महः । अयं मानुषोऽभूदस्मन्नीरन्ध्रसंश्लेषाय, अस्मत्सारूप्याय च । अस्माभिस्तत्सालोक्यसामीप्यसारूप्याण्येष्टव्यानि । वयं न तत्र प्रवर्तामहे । अतः सोऽस्मत्सलोकतां समीपतां सरूपतां च लिप्सते । एनं युवानम् 'सदा पश्यन्ति सूरयः' इति वन्निर्निमेषंद्रष्टुमहमनिमेषो देवो बुभूषामीति व्यज्यते—'अनिमेषनिषेवणीयमक्ष्णोः' इति । सोऽधो मनुष्ययोनाववततार । वयं तदुपरि देवयोनिं जिगमिषामः । तस्यास्मत्सरूपभवनेऽपि वयं तद्विरूपा देवा बुभूषामः । दशमलक्षणे बाधः प्रतिपाद्यः । स्वस्मिन्द्रष्टरि प्राप्तं मनुष्यत्वं बाधित्वा देवत्वमिष्यते । कलह उन्मादश्च बाधकस्वभावौ । विभ्रमश्च बाध्यस्वभावः ॥

अनिमेषनिषेवणीयमक्ष्णोः । यमकार्जुनयोरिव यमुनाया इवानिमेषत्वं ममाक्ष्णोर्भूयात् । पूर्वश्लोके भजनमुक्तम् । तदेव दर्शनं संपद्यत इत्यनुभवः ॥

अजहद्यौवनम् । यद्यपि मानुषरूपविकृतिरभूत् प्रकृतिवन्नित्ययुवैव स्यात् । प्रकृतिगतयुवत्वं विकृतौ न बाध्यताम् । अपेक्षितं हि न बाधमर्हति । मनुष्यप्रकृतेर्जन्मकैशोराद्यवस्थाः सहजा दुरतिक्रमाः । अजायमानप्रकृतेर्जायमानत्वरूपविकृतित्वेन श्रेयस्त्वमिति तन्निर्विकारत्वे परमादरवती श्रुतिर्वक्ति । जायमानः श्रेयानेव भवति । जायमान एव श्रेयान्भवति । इतरथा न श्रेयस्त्वम् । श्रीमत्त्वं सिद्धम् । श्रेयस्त्वं जन्मना संपाद्यम् । सुतकाम्यति देवकी कारणं ब्रह्म । ब्रह्मस्तनंधयमयाचत सा । क्रन्दन्त्यश्रुमुखी खिन्ना पृथिवी देवाश्चानन्तरं ययाचिरे । यथा कैशोरकौमारे त्यक्त्वा युवत्वं प्रतिपेदे, तथा युवत्वं न जह्यात् । कैशोरपौगण्डादीनां यौवनात्पूर्वासामवस्थानां यद्यपि प्रकृतिस्थनित्ययौवनबाधकत्वमस्ति, ताभिर्बाधोऽङ्गीक्रियते, तासामनुभाव्यत्वेन तीव्रकाङ्क्षितत्वात् । युवतिदर्शनादपि किशोरदर्शनं भोग्यतरमिति रसिकानुभवसिद्धम् । तल्लीलाविहारचेष्टितान्यतिमनोहराणि दिदृक्षेरन् । यौवनानन्तरजराद्यवस्था न शोभेरन् । जरादिना

यौवनबाधो न रोचेत । अतस्तदहानं प्रार्थ्यते ॥

आविरस्तु चित्ते । पुरस्तादाविर्भवत्विति नवनीतना ट्यविषये प्रार्थना कृता । इदानीमन्तराविर्भवनं प्रार्थ्यते । करुणाभजनं कृतम् । अक्ष्णोरनिमेषनिषेवणीयोभूत्कारणमानुषः । भक्तानां चक्षुराप्यायनं मुख्यं कारणं तस्य मानुषीभवने । कारणमानुषस्त्वां करुणां भजतो दृष्टिविषयो भवेत् । पुरस्तान्निकटेषु चाविर्बभूव । बहिराविर्भावमात्रेण नालम् । चित्तेऽप्याविर्भवत्विति प्रार्थ्यते । 'हस्तमुत्क्षिप्य यातोऽसि बलात्कृष्ण किमद्भुतम् । हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥' इति गोपिका । हृदये आविर्भूतश्चेत्कारागार इव तस्य दृढबन्धनं शक्यम् । पुरस्तात्स्थितेरपि चित्ते आविर्भावः श्रेयान् । 'अन्यत्र मनाभूवं नादर्श' इति श्रुतिः । मन एव मनुष्याणां कारणं मोक्षे । नाक्षिणी ॥

कलहायितकुन्तलं कलापैः । नित्ययुवत्ववैशिष्ट्यं प्रार्थितम् । यौवनं कलहैरविनाभूतम् । अयं युवा श्रीमान्प्रभुः । एकैकमप्यनर्थाय । किमुतैषां समुच्चयः । युवा स्यादिति मानुषानन्दपूर्तिमन्तं वर्णयितुमारब्धा श्रुतिस्तस्मिन्यूनि शान्तिविरोधिकलहोन्मादादिबहुप्रत्यवायं पश्यन्त्यनुपदमेव साधुयुवेति साधुशब्देन तं विशिनष्टि । प्रायेणासाधुः स्याद्युवेति

तस्या हृदयम् । तथैव लोकेऽनुभवः । श्रीमच्छङ्करभाष्यरीत्येतदयुक्तम् । श्रीश्रुतप्रकाशिकोक्तरीत्या 'साधुयुवाध्यापक' इत्येकपदाश्रयणे यूनि साधुत्वविशेषणेनेदमुपपादितं स्यात् । हृदये आविर्भविष्यति भगवान् । तत्सततयोगं काङ्क्षामः । शान्ति विना कथं तद्योगः । यद्यन्तःस्थित्वा स एव कलहकर्ता स्यात्कथं तद्योगसंभवः । कलहायमानो बलवान्स हृदयाद्बहिर्जिगमिषेत् । न तं जिगमिषन्तं बन्धुं वयं प्रभवामः । यौवनं च कलहं विना नात्यन्तं शोभेत । का गतिः । अत्रोच्यते । अस्ति कलहोऽस्मिन्यूनि । कलहस्य नात्यन्तं निरवकाशतैतद्यौवने । एतत्कुन्तलानां मयूरकलापैः सह भूयान्कलहः सततकलहश्चेति कलहस्य भूयसी गतिः प्रदर्श्यते । कलापैरिति प्रतिभटानां सेनारूपसमूहत्वमपि व्यज्यते । व्यापकस्य विष्णोर्गोपालस्य जयः । युवा कलहायेत । यूनः कुन्तलाः कलहायन्ते ॥

करणोन्मादकविभ्रमं महो मे । यूनो भ्रूकरणोन्मादकत्वं विभ्रमवत्त्वं च शोभनम् । विभ्रमशब्दो विलासार्थक उन्मादरूपविशेषभ्रमार्थकश्च । उभयमप्यपेक्षितं यूनः । कृतज्ञो रसमयो युवा तुल्यानुरागो भवेदेव । इतरथा रसाभासः स्यात् । कथं रसे पुरुषे रसाभासप्रसक्तिः ? यथा करणो-

न्मादकं तथोन्मादितस्वकरणमिदं मह इति विभ्रमशब्देन व्यज्यते । आत्मारामं आत्मानमप्यरीरमत् । शेषवस्तुसंश्लेषजन्यरमणातिशयाभावे शेषित्वं न सिद्ध्येत् । शेषित्वस्येदमनुरूपमेव । अनाधेयातिशयस्य ब्रह्मणः कथं रमणातिशयसंभव इति न चोदनीयम् । शेषजनाहितातिशयवत्त्वरूपशेषित्वस्य धर्मिग्राहकमूलप्रमाणसिद्धत्वात् । प्रकृतौ यथा कथं वा भवतु : विकृतौ गोपाले नेदं चोद्यमवतरेत् । 'भगवानपि ता रात्रीः शारदोत्फुल्लमल्लिकाः । वीक्ष्य रन्तुं मनश्चक्रे—' इति रासप्रकरणोपक्रमे श्लोकयन् शुकोऽपि शब्देन 'गोप्यश्चिरं रासोत्सवमकाङ्क्षन् । भगवांस्तु तत्पूर्वं तत्र मनो न चक्रे । इदानीं तु तस्यापि मनोऽभूत् । तस्यापि भावः समजनि' इति कथयति । भगवानपि पूर्णानन्दोऽप्यात्मारामोऽप्यानन्दमयभूतब्रह्मापि सन्रन्तुमियेष । रमणे मनश्चक्रे । मनश्चकारेति नोक्तम् । न परेषां रत्युत्पादनार्थम् । स्वप्रयोजनाय । तद्वशवर्तिचन्द्राद्युद्दीपनविभावसामग्री चानुजज्ञे । तत्संकल्पानुविधायी तद्धृदयजन्मोडुराजः स्वकान्तां रजनीं शीतैः शन्तमैः स्वकरसहस्रैर्व्यलिम्पत । मम हृदये आविर्भूय मम करणानि क्षोभयतु । स्वयं च क्षुभ्यतु । मम मोहमूर्च्छाद्यवस्था भूयासुः । यथा युवतयो व्रतनियमादींश्चरित्वा गुर्वीं प्रसववेदनां प्रार्थयन्ते तथा गोपालविषयो-

न्माद: प्रार्थ्यते गोपाललाभरूपपरमानन्दस्य नान्तरीयकत्वात् । प्रसववेदनायाः पुत्रलाभरूपमहासंतोषस्य नान्तरीयकत्वेन प्रार्थनीयत्वम् ।।

अनुयायिमनोज्ञवंशनालै-
रवतु स्पर्शितवल्लवीविमोहैः ।
अनघस्मितशीतलैरसौ मा-
मनुकम्पासरिदम्बुजैरपाङ्गैः ।।

मोहमूर्च्छाद्यवस्थाप्रार्थना कृता । प्रियजनस्य मोहं शङ्कमानाः प्रियजनाः शैत्योपचारोपकरणैः सह मूर्छिष्यमाणं प्रियजनं समाश्वासयितुं सन्नद्धाः स्युः । 'वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् । मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेषितैस्तर्पयेति ।।' इति गोदावरीं प्रति वनदेवता । मुह्यन्तं मां तथाश्वासयति गोपालः । स्वयमेव मम मोहमूर्च्छामुत्पाद्य मां विचित्रशैत्योपचारैरवति । अर्धसुषुप्तिरर्धमरणं खलु मूर्च्छा । डोलायितं जीवितम् । जीवेद्वा म्रियेत वा गोपालः स्वप्रेमनिमित्तकप्रियजनमरणं न सहेत । मूर्छितं प्रियं जनं संजीवयेदित्युच्यते 'अवतु' इति । मृतमेव गुरुपुत्रं संजीवयामास । अर्धमृतं स्वपुत्रस्थानीयं प्रियं वैदिकं मां किमिति न जीवयेत् । तन्त्रलक्षणमेकादशं जैमिनीयम् ।

सकृत्कृतमनावृत्तमनेकोपकारकरं तन्त्रेण । प्रियजनानां वल्ल-वीनां विमोहो जायते । ताः संजीव्यन्तेऽनघस्मितशीतलैर-नुकम्पासरिदम्बुजैरपाङ्गैः । तन्त्रेण मुग्धस्य समाप्यवनं भ-वति । एतेनैकादशाध्यायप्रतिपाद्यतन्त्रसूचनम् । तन्त्रेणैवैक-कालेऽनेका गोप्यः शीतलं कटाक्ष्यन्ते, संजीव्यन्ते च एक-कालावच्छिन्नवेणुगानेनापाङ्गवीक्षणैश्च बह्व्यो वल्लव्यो विमो-ह्यन्ते, संजीव्यन्ते च । एकः कृष्णो रासे प्रतिगोपिमध्ये वर्त-ते । 'अन्तरा त्वां मां च हरिः' इति कृष्णभक्तिरसिका भट्टोजिदीक्षिताः ॥

अनुयायिमनोज्ञवंशनालैः । यथा वल्लव्योऽपाङ्गानुया-यिन्यस्तथा वंशोऽपि । गोपालापाङ्गानुयायित्वे चेतनाचेत-नयोर्न विशेषः । अस्य गोपालस्य करभूषकं न कटकम्, किं तु वंशी । वंशीविभूषितकरादिति तद्रसज्ञानां सरस्वती । 'वेणुं वादयदिन्दुसुन्दरमुखं वन्देऽरविन्देक्षणम्' इति संक्षे-पशारीरकोपक्रमे तत्फणितिः । गोपालभक्ताः के वा ताम्न बहुमन्येरन् । मधुरेण सङ्गीतेनाधिनिवर्तनं स्यादिति प्रसि-द्धम् । मोहनिर्वर्तको वेणुः । मोहनिवर्तकोऽपि वेणुः । भयकृद्भयनाशनोऽयं यथा गोपालः । यथा राजा तथा तत्प-रिकराः । वादयति वंशं गोपालो यथा मामिदं स्तोत्रं वा-

दयति । वाद्यस्य वंशस्य निरतिशयं माधुर्यम् । वादयितृ-मनोऽभिज्ञमिव वाद्यमिति व्यज्यते मनोज्ञशब्देन । गायकाः स्वात्यन्तपरिचितस्वमनोभावानुकूलस्वात्यन्तवशीभूतं वाद्यमे-वोपकरणीकुर्युः । वनचरस्य गोपालस्य मनो विदितं स्या-द्वनभवानां वंशनालानाम् । यदुवंशतिलकस्यानुरूपा मनोज्ञ-वंशजा नाला इति शोभनवंशजत्वं नालानामित्यपि व्यज्यते । आभिजात्येनाप्याभिरूप्यं तदधरपायिनाम् । शैत्यसामग्र्यत्रा-पेक्षिता । गीतस्य शीतलत्वमप्यपेक्षितम् । 'शीतलैर्हस्त-तालैः' इत्याचार्यानुभवः । नालशब्देन मृणालनालादिशीत-लनालस्मारणेन शैत्यव्यञ्जनमपि । अपाङ्गप्रसरमनु वेणुगी-तप्रसरः । अपाङ्गगत्यनुयायि गीतम् । न मुखविकारविशि-ष्टमस्य गानम् । नेत्रस्य सुन्दरविक्रियारूपविकारमात्रमस्ति ।

स्पर्शितवल्लवीविमोहैः । अपाङ्गैर्विमोहा दीयन्ते । अ-तिशीतला अद्भुतविलासा आकेकराः कटाक्षाः कं जनं न मोहयेयुः । 'त्रैलोक्यसुन्दरमिदं च निरीक्ष्य रूपं यद्गोद्वि-जद्रुममृगाः पुलकान्यबिभ्रन्' इति शुकः । वाद्यमानवंशना-लप्रेरकान्दत्तवल्लवीजनविमोहानपाङ्गान्वयमिदानींतनत्वेनानुभ-वामः । गोपीजना मुह्यन्त्यहमपि मुह्यामि । यथा ते सं-जीव्यन्ते तथाहमपि समाश्वास्ये । 'विमोहने पल्लवगेहिनी-

नाम्' इति यादवाभ्युदये । व्युपसर्गो मोहस्य गाढत्वव्यञ्जकः । अपाङ्गवीक्षणैरेव विमुग्धाः स्युः । विचित्रावर्तवद्गीतमप्यस्यापाङ्गानुयायि मनो नितान्तमावर्तयितुम् । अपाङ्गावर्ता गीतावर्ताश्चेत्यावर्तघनत्वम् ॥

अनघस्मितशीतलैः । विटास्मितस्य साघत्वं स्यात् । बहुवल्लभस्य भावशून्यं स्यात्स्मितम् । 'उपचारविधिर्मनस्विनीनां न तु पूर्वाभ्यधिकोऽपि भावशून्यः ।' वल्लवीजनवल्लभस्यास्य सर्वत्र भावपूर्णं स्मितम् । शीतस्य शैत्यदोषजनकत्वरूपमनर्थत्वं स्यात् । निर्दोषशीता इमेऽपाङ्गाः ॥

अपाङ्गैः । संपूर्णवीक्षणमपि न प्रार्थयामः । अपाङ्गवीक्षणेनालम् । 'अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूत्' इति लक्ष्मीविषये भट्टपादाः । तदनुरोधेनापाङ्गानां बहुत्वप्रार्थना व्यज्यते बहुवचनेन बृम्होग्राहमिति ॥

अनुकम्पासरिदम्बुजैरपाङ्गैः । शैत्यसामग्र्यां नदी तत्स्थानि अम्बुजान्यपेक्ष्येरन् । तथैवापेक्षा प्रदश्यंते वीचीवातैरित्युदाहृतभवभूतिश्लोके । प्रवहदनुकम्पासरिद्गोपालचक्षुः । तत्र भवानि अम्बुजानि तदपाङ्गाः ॥

असौ । पुरस्तिष्ठति, वेणुं वादयति । मुह्यत्सु गोपज-

नेषु मयि चोन्निद्रपद्ममधुरान्कटाक्षान्प्रसारयति ॥

माम् । निकटेषु न्यशामयं गोपालम् । 'यश्च रामं न पश्येत्तु यं च रामो न पश्यति' इति स्वात्मसहितसर्वलोकगर्हितजनलक्षणमादिकवेः । आचार्यस्य रामो गोपालः । उभौ वनचरौ । रामवल्लभा ऋषयो गोपीजनाः । मत्कर्तृकगोपालवीक्षणमुक्तम् । तत्कर्तृकमत्कटाक्षणमत्रोच्यते । इतः परं नाहं गर्हणीयो भवेयम् ॥

अवतु । अव प्राणने । प्राणयतु माम् । एतेन स्वस्य मूर्च्छितत्वरूपतात्कालिकप्राणवृत्तिन्यूनभावो व्यज्यते ॥

अधराहितचारुवंशनाला
मकुटालम्बिमयूरपिञ्छमालाः ।
हरिनीलशिलाविभङ्गनीलाः
प्रतिभाः सन्तु ममान्तिमप्रयाणे ॥ १२ ॥

नारदगेयोऽयं श्लोक इत्याचार्यमनोरथ इति पूर्वमेवोक्तं यथा कुशलवनामधारिकुशलिवगेयत्वमाद्यकाव्यस्य । रामपुत्रौ तौ तत्पौत्रो नारदः । चतुर्मुखेश्वरमुखैः पुत्रपौत्रादिशाली गृहमेधी रामः । प्रसङ्गविषयं द्वादशलक्षणम् । 'आप्रयाणात्तत्रापि हि दृष्टम्' इत्येतत्स्तोत्रे क्रियमाणाया भावनाया आप्रयाणा-

दनुवर्तमानत्वं दर्शनीयम् । तदर्थमन्तिमस्मृतिविषयश्लोकोऽत्र निवेशनीयः । इदानीं प्रार्थितं प्रसङ्गात्तत्कालेऽप्युपकुर्यात् । 'स्थिते मनसि' इत्यादिश्लोकोऽत्र भाव्यः । एवं प्रसङ्गलक्षणसूचनम् । गोपजनानुद्दिश्य वेणुगानादि कृतम् । न मामुद्दिश्य । प्रसङ्गात्तन्मामपि तारयेत् ॥

अधराहितचारुवंशनालाः । 'अर्थेनैव विशेषो हि निराकारतया धियाम्' । विषयेण विषयी ज्ञानमुपरक्तं भवति । ज्ञानवैचित्र्यमर्थवैचित्र्यप्रयुक्तम् । अत्र समानाधिकरणपदैरुक्तविशेषाकाराः प्रतिभाः प्रार्थ्यन्ते । न निराकारां प्रतिभां वयं रोचामहे । बिम्बाधरनिहितवेणुं वादयन्तं प्रेक्षमाणस्तद्वेणुगीतं शृण्वन्कलेवरं तित्यक्षामि । 'वंशेन शङ्खपतिना च निषेवितं ते बिम्बाधरं स्पृशति रागवती मतिर्मे' इति भूयान्ममानुभवस्तदधरमाधुर्यस्य । नितान्तं रागवती मम मतिस्त्वदधरे । शङ्खपतिना निषेवणमात्रेण मम तत्र रागावकाशो न लभ्येत । अचेतनस्य वंशस्यापि तत्रावकाशो दीयते सुशीलाग्रेसरेण करुणामूर्तिना गोपालेन । वंशं वादयति गोपालस्तत्प्रत्यासत्त्या तस्यावकाशदानमिति चेन्मामपि बहुशो वादनोपकरणीकृत्यावादयत् । वेङ्कटशैलमारुह्य वैहारिकेण विधिना वीणाविशेषमिव मां तत्परिचारविधिप्रयु-

कघण्टांशं स्वनादनं वेदान्तदेशिकं दयाशतकमवादयद्गोपालदेवः । कारणमानुषी करुणा मां करुणाशतकमवादयत् । कथमहं तां करुणां न भजेयम् । यः सर्वथा जीवति स वर्षशतं जीवति । यदि पूर्णायुर्भवेयं वर्षशतं करुणाशतकेन करुणां भजेयमेव । दयाशतकसंख्या मदायुःसंख्या च प्रायेण समाना । एकस्य श्लोकस्यैकं हायनम् । 'प्रणवमहिमवत्पाञ्चजन्यक्रमेण स्वाध्मातं रङ्गनाथः स्वयमिति मुखरीकृत्य संमोदते स्म' इत्युक्तरीत्या स्रग्धरादुग्धराशिभूतं ग्रन्थं मामवादयत् । वंशाद्वीणा गुर्वी सङ्गीतसंप्रदाये । तस्याः पूर्णत्वप्रसिद्धिः । वंशी वाद्यत एव । नायं देशिको वेदान्तदेशिको वा । यदि तस्य गोपालाधरस्पर्शो न्याय्यो ममान्तिमप्रतिभायै तत्स्पर्शस्पर्शनमपि न्याय्यम् । नाहं तदधरेण मदधरस्पर्शं वाञ्छामि, यथा गोप्यः । नाहं स्थूलस्वशरीरेण तत्स्पर्शमिच्छामि, यथा वंशनालः । सूक्ष्मसूक्ष्मेणान्तर्विलयमृदुना स्वान्तेन तत्स्पर्शं का[illegible]मि । अन्तकाले वैष्णवज्वरेण महान्दाहः स्यात् । तद्दाहशान्तये सद्योऽमृतलब्धये चाधरामृतस्मरणं भवेत् । वेणुनादश्च कर्णमन्त्रो भवेत् । कर्णेशीधुं वमेत्तन्नादः । घण्टांशस्य मम नियतं तन्नादश्रवणमत्यन्तमधुरं भवेत् । साजात्यमप्यस्ति मम वेणोश्च । मत्सजातीयो वंशो न मां तदवसरे जह्यादद्यापि कदाचिद्गोपालो मां जिह्रासेद्धि-

स्मरेद्वा । वंशस्य मत्समीपोपसदने तदविनाभूतसाहचर्यात्सोऽप्यागच्छेत् । वेणुनादघण्टानादयोः साजात्यं सिद्धम् ॥

मकुटालम्बिमयूरपिञ्छमालाः । अधरामृते प्रथमं तृषितं मनो जागर्ति । क्षणादूर्ध्वं भवेद्देहत्यागः । तत्पूर्वं मौलिपर्यन्तं पश्येयं पुरुषोत्तममिति मौलिं धावति मनःकृत्स्नविग्रहदर्शनस्यावकाशः स्याद्वा न वेति भिया । तत्र मयूरपिञ्छमालाः पश्यति । मम मनसो मकुटस्पर्शभाग्यं न्याय्यम् । मयूरपिञ्छमालानां सुलभं भाग्यं मम दुर्लभं भवेत्किम् ? ॥

हरिनीलशिलाविभङ्गनीलाः । क्षणान्तरस्य लाभात्कृत्स्नो विग्रहोऽनुभूयते ॥

प्रतिभाः सन्तु । कवितार्किकसिंहमिति मां वर्णयन्ति जनाः । मम प्रतिभान्यादृशीति श्लाघन्ते । न तां प्रतिभामहं बहु मन्ये । नवनवगोपालविग्रहभावनोन्मेषां प्रतिभां खल्वहमीप्सामि । न ममेतरप्रतिभायामादरः । सिद्धायां तस्यां ममौदासीन्यमेव । 'मधुक्षीरन्यायस्वगुणविभवासञ्जनकृतन्महानन्दब्रह्मानुभवपरीवाहा बहुविधा ममाविर्भूयासुर्मनसि मुनिसिद्धादिसुलभा' इति खलु मम मनोरथः । 'भिन्नस्फटिकरुचिर' इति सद्यो भिद्यमानस्फटिकवद्रुचिरत्वं विवक्षितम्

'सूर्यांशुभिर्भिन्नमिवारविन्दम्' इत्यत्रेव । तत्र सद्यो भिद्यमानत्ववर्णनमुचितम्, नवयौवनविभज्यमानवपुषो दृष्टान्तत्वात् । तत्र विभक्तशब्दवदत्र विभङ्गशब्दः । सद्योविभक्तेन्द्रनीलशिलाया एव दृष्टान्तत्वेन विवक्षणम् । सद्यो विभक्तनीलशिलाविभङ्गवन्नीलः । कुवलयदलश्यामो माधवः ॥

सन्तु । मां सन्तं कर्तुम् । तत्सत्त्वे मत्सत्त्वम् । तदभावे मदभावः । अन्वयादितरतश्चतत्प्रतिभाधीनसत्ताकोऽहम् ॥

मम । प्रतिभासत्तानुभवानन्तरं स्वसत्ताभिमानः ॥

अखिलानवलोकयामि कालान्
महिलाधीनभुजान्तरस्य यूनः ।
अभिलाषपदं व्रजाङ्गनाना-
मभिलापक्रमदूरमाभिरूप्यम् ॥ १३ ॥

देवताकाण्डलक्षणानि चत्वारि सूच्यन्ते चतुर्भिः श्लोकैः । 'स्वरूपमादौ तद्भेदस्तदुपासनपूर्वकम् । फलं च देवताकाण्डे—' इति लक्षणविषयविभागः । सामान्येन देवतास्वरूपं लक्ष्यतेऽत्र 'महिलाधीनभुजान्तरस्य यूनः' इति । अस्य कवेः श्रियः पतित्वं सामान्येन देवतास्वरूपम् । गो-

पालत्वं देवताया विशेषस्वरूपम् । वासुदेवसंज्ञैव परस्य ब्रह्मणः । अयं विभववासुदेवो गोपालः । श्रियः पतित्वं परवासुदेवलक्षणम् । 'महिलाघीनभुजान्तरस्य यूनः' इति तदेव निगूढमुच्यते । एतेन देवताकाण्डप्रथमलक्षणसूचनमस्मिन्श्लोके । अनन्तरश्लोकेन गोपालरूपभेदकथनाद्द्वितीयलक्षणसूचनम् । 'अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् । यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥' 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥' इति गोपालः स्वगीतायाम् । अन्तकालस्मरणमावश्यकं गोपालसंपत्तये । सदा गोपालभावभावितेन भक्तेन तत्स्मरणं सुलभम् । अन्तिमप्रयाणे गोपालाकाराः प्रतिभाः काङ्क्ष्यन्ते पूर्वश्लोके । तदर्थं सदा तद्भावभावितत्वं संपाद्यम् । तदुच्यतेऽस्मिन्श्लोके 'अखिलानवलोकयामि कालान्' इति ॥

अखिलानवलोकयामि कालान् । द्वितीययैव कालस्यात्यन्तसंयोगोऽनुशासनेन लभ्यते । अखिलं कालमित्येवालम् । अत्यन्तसंयोगस्य निरन्तरनिबिडत्वमपेक्षमाणैः कालावयवान्विभज्य प्रतिकलमवलोकनव्याप्तत्वं विवक्ष्यते । भक्तिरूपा शेमुषी प्रार्थ्यते श्रीभाष्यकारैरखिलेत्यादिश्लोकेन । अ-

त्रापि तैलधारावदविच्छिन्ननिरन्तरभक्तिरूपप्रतिभानुभवः । अखिलेत्यादि श्रीभाष्यमङ्गलश्लोकप्रत्यभिज्ञापनम् । तत्स्मरणं च तद्वन्नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहलाभाय । ईदृशो व्यामोह ईप्स्यते ज्ञानिभिः । अच्युतश्च कृष्णः । देवताकाण्डसूचनमारभमाणोऽखिलेति मङ्गलं प्रारभते । निखिलेति नोक्तम् । 'अज्ञातं नास्ति ते किंचित्' इतिवदखिलेति द्वौ नञौ प्रकृतार्थं दृढयतः । नैरन्तर्यं व्यज्यतेऽखिलशब्देन । साकल्यमप्युच्यते । सदा तद्भावभावितत्वम् । तदाभिरूप्यरूपतद्भावः सदा भाव्यते ॥

महिलाधीनभुजान्तरस्य यूनः । श्रियः पतिमुद्दिश्य ब्रह्मत्वविधिः । ब्रह्मोद्दिश्य वा श्रियः पतित्वविधिः । 'श्रीमति ब्रह्मतोक्तेः' 'पुंसूक्तादिप्रसिद्धो गुणनिधिरघजिद्ब्रह्मशब्दार्थ उक्त' इति जन्माद्यधिकरणे उभयमपि संगृह्यते । उभयथापि तयोः समव्याप्तत्वम् । भुजान्तरस्य भावनान्तर्गतत्वात्स्वस्यापि भुजान्तरेऽवकाशो लभ्यते रत्नत्वेन । सा स्त्रीरत्नम् । वयं पुरुषरत्नानि । स्त्रीपुंरत्नानि वक्षः स्थलं रञ्जयन्ति, तस्याभिरूप्यं वर्धयन्ते । अधीनत्वरूपपारतन्त्र्यमपि भावनान्तर्गतम् । अस्मदधीनोऽपि भवेद्यथा महिलाधीनः । 'पराधीनं त्वां तु प्रणतपरतन्त्रं मनुमहे' । यथा महिला-

परतन्त्रः प्रणतास्मत्परतन्त्रोऽपि स्यात् । भावनान्तर्गतस्य फलदशायां प्राप्तिः । 'तथेतः प्रेत्य भवति'। भवति प्राप्नोति । अधीनशब्देन वक्षःस्थलस्य महिला स्वामिनीति व्यज्यते । तदनुमतिं विना न तत्र प्रवेशसंभवः । महिला वामा वनिता ॥

अभिलापपदं व्रजाङ्गनानाम् । 'क कृष्णः श्रीनिकेतनः' इति दौर्लभ्यं प्राप्नोति लक्ष्म्यधीनत्वकीर्तनेन । 'अन्तःपुरं जलधिराजकुमारिकायाः' इति श्रीमद्दीक्षिता वरदराजस्तवे वक्ष्योनुभवे । कथं मम तत्रान्तःपुरे प्रवेशसंभवः? स्त्रियः सपत्नीभिर्भर्तृशरीरमाश्लिष्यन्त्यो न सहेरन् । नेर्ष्या तादृशी तत्समीपमुपसीदत्सु पुंसु । सपत्नीनां प्राम्याणां वल्लवीनां तत्संश्लेषाभिलाषमनुमन्यते । अहं तु नायकवक्षसि मणिवरत्वमाशासे । नूतनरत्नेन भर्तृवक्षोलंकरणमभिमतमेव स्याद्वक्षःस्थलस्वामिन्या महिलायाः ॥

अभिलाषदं व्रजाङ्गनानाम् । नारीणामुत्तमवधूर्लक्ष्मीः । तदेकाधीनं वक्ष आभीरजनैरभिलष्यते आश्लिष्यते च । 'गोप्यः प्राप्याच्युतं कान्तं श्रिय एकान्तवल्लभम्' इति श्रीशुकः । लब्धः कान्तो न च्यवेताच्युतत्वात् । नित्ययोगी भवति गोपीभिर्यथा लक्ष्म्या । एतादृशसौशील्यभूमनि कथं ममानवकाशः ॥

अभिलापक्रमदूरमाभिरूप्यम् । पूर्वविशेषणेन व्रजाङ्गना गोपालस्याभिरूप्यं विविदिषन्ति, दिदृक्षन्ति चेत्युक्तम् । वाङ्मनसदूरमस्याभिरूप्यं विविदिषन्तीति कथमुच्यते । अभिलाषश्च वेदने वा दर्शने वा स्यात् । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान्—' इत्यानन्दमूर्तिविषयश्रुतिः । ब्रह्मण आनन्दमूर्तिश्च तच्छ्रुतिविषयत्वे वाङ्मनसविषयिणी स्यात् । मनोदूरे कथं विविदिषा । वेदनरूपमानसवृत्तिरूपज्ञानाविषये कथमिच्छाप्रसरः ? तथा शब्दक्रमस्यापि दूरम् । कथं तस्याभिलाषपदत्वम् ? अत्रोच्यते— न हि दृष्टेऽनुपपन्नं नाम । अवाच्यत्वं शृणुमः । वर्णयन्ति गोप्यः । अभिलषन्ति प्राप्नुवन्ति भुञ्जते च । दृष्टानुरोधेन वाच्यविषयककृत्स्नव्याप्त्यभावपरता श्रुतेः । अभिधावृत्त्या न साक्षान्मुख्यविषयत्वम्, किं तु लक्षणारूपामुख्यवृत्तिविषयमिति तच्छ्रुतेरर्थोऽद्वैते । साक्षाद्वा परम्परया वा यथा कथंचिद्वचनवृत्तिविषयत्वमभ्युपगम्यते । न वाच्यत्वस्यात्यन्तबाधरूपानवकाशः । दूरे भवति । नात्यन्तमविषयो भवति । सामान्येन कथंचिदकात्स्न्येन वाच्यं भवति । अभिलापेनाक्रान्तं व्याप्तं भवति ॥

आभिरूप्यम् । न गोपालमवलोकयामि । तल्लावण्यौघ-

मेवावलोकयामि । अखिलकालावलोकनेऽप्याभिरूप्यस्य न ह्रासः ॥

हृदि मुग्धशिखण्डमण्डनो
लिखितः केन ममैष शिल्पिना ।
मदनातुरवल्लवाङ्गना-
वदनाम्भोजदिवाकरो युवा ॥ १४ ॥

कथं भवतां दर्शनलाभः । न हि श्रवणमनननिदिध्यासनानि भवतानुष्ठितानि । 'न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविन्दे' इति खलु भवत्पूर्वेषां वचनम् । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन' इति मननिदिध्यासनाभ्यामप्यलभ्यः । अत्रोच्यते । 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्' इत्युत्तरार्धं किं विस्मृतम् । मत्प्रयत्नेनाहं तमवलोकयितुं न प्रभवेयम् । यदि स एव मां वरीत्वा मम हृद्यात्मानं लिखेत्कथं तं न साक्षात्कुर्याम्? अक्षरेण भगवता हृदये लिखितमक्षररूपं न दृष्टेर्हृदयाद्वा क्षरेत् । तेनैव परमशुभेन तदद्भुतशुभविग्रहो मम हृदये व्यलेखि । तल्लिखितं को वा प्रमार्जेत्? लोकोत्तरसुन्दरं साक्षात्कृत्य तस्मिन्हृदयालिखिते किमन्यदीक्षिष्ये ।

हृदि मुग्धशिखण्डमण्डनो लिखितः केन ममैष शिल्पिना । स्वहृदये लिखितं गोपालविग्रहं वीक्ष्य विस्मयते । भगवदनुग्रहातिशयाद्धृदये भगवतैव लिखितोऽन्तःस्थोऽपि वहिरिव भवति । तमन्तस्थं पुरःस्थितमिव विशदं वीक्ष्य 'एषः' इति निर्दिशति । एतदा निर्देशः पुरः स्थितस्येवापरोक्ष्यं व्यनक्ति । 'य एषोऽन्तरक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच' इत्यत्र योगिप्रसिद्ध्या प्रत्यक्षनिर्देश इति भाषितम् । शन्तमेन गोपालपाणिना हृदयं स्पृष्ट्वा तत्रात्मनः शीतलानन्दामृतविग्रहस्य लेखने हृदयेऽद्भुतं स्पर्शसुखं भवति, रामस्येव सीताकरस्पर्शे । 'संजीवनौषधिरहो नु हृदि प्रसिक्तः' इत्युत्तररामचरिते । अन्त्यस्मरणं मकुटालम्बिमयूरपिञ्छमालस्य । तद्विशिष्टं लेखनं प्रदर्श्यते 'मुग्धशिखण्डमण्डनः' इति । 'केन शिल्पिना' इति प्रश्नस्य तत्रोत्तरम् । केनैव शिल्पिना लिखितमित्युत्तरम् । –कं ब्रह्म'। कं च सुखम् । 'सुखविशिष्टाभिधानादेव च' इति तस्य सौत्रं व्याख्यानम् । सुखमयेन ब्रह्मणा लिखितः । 'केनेषितम्' इति प्रश्नस्य 'ईशा' इत्युत्तरं दीयत इव ईशोपनिषदा । केनेत्यत्रत्यप्रश्नस्योत्तरं दीयत इवाचार्यैः संकल्पसूर्योदये भावनाचित्रभित्तौ लिखितमद्भुतं भगवद्रूपं वी-

क्ष्य 'अखण्डब्रह्माण्डप्रथमतरशिल्पी स भगवान्स्वयं पद्मा-जानिर्व्यलिखदिह चित्रं स्वविषयम्' इति । विग्रहनिर्माणा च्चित्रलेखनं सुलभम् । अत एव 'चित्रे निवेश्य परिकल्पि-तसत्त्वयोगा' इति प्रथमशिल्पी चतुर्मुखः । ततोऽपि पूर्वस्त-द्विग्रहस्यापि स्रष्टा प्रथमतरशिल्पी भगवान्स्वयं व्यलिखत् । स्वयमित्युक्तेऽसहाय इति स्यात् । नासहायोऽयम् । पद्मा-सहायो व्यलिखत्तस्या मुखं वीक्षमाणः । उत्तमस्त्री खलु वि-दुषी दोषज्ञा चित्रसौष्ठवे तद्बहुमतिलाभायोपहास्यत्वनिवृत्तये चातिजागरूको व्यलिखत् । आत्मनश्चित्रे लेखनं कृच्छ्रसा-ध्यं शिल्पिनामिति प्रसिद्धम् । अयं तु 'तदात्मानं स्वयम-कुरुत' इत्यात्मसृष्टिदक्षः । 'केन' सुखेन लिखितः । केनेति लेखनक्रियाविशेषणम् । यथा आनन्दो जायेत तथा लिखि-तः । हृदये लेखने हृल्लेखो भवेत् । स च शिरःशूलरूपवेद-ना । वेदनां पीडां हृल्लेखं विना सुखेन हृदि लिखितः । कर-स्पर्शेन तूलिकावर्णद्रव्यादिस्पर्शेन च सूक्ष्मस्य मृदोर्हृदयस्य व्यथा स्यात् । तां विना अस्पृतस्पर्श इव भवति ॥

एषः । अन्तर्लिखितोऽपि पुरोवर्तीव भवति । आवृत्त-चक्षुषा पश्यामि । मनश्चक्षुषा पश्यामि । लिखितं पश्यामि । लेखकं न जानामि ॥

मदनातुरवल्लवाङ्गनावदनाम्भोजदिवाकरो युवा । अतिविचित्रो विशिष्टश्चित्रलेखः । वल्लवीवल्लभं धाम खलु वन्दितम् । तद्विशिष्टं हृदये लेखनीयम् । अभिलापपदं व्रजाङ्गनानामवलोकयामीत्युक्तम् । स एव विशिष्टो लिख्यते ; वल्लवाङ्गना लिख्यन्ते । तदीयमान्मथभावास्तद्वदनाम्भोजेषु प्रदर्श्यन्ते चित्रे । मदनातुरता लिख्यते । तन्मुखाम्भोजानि विकासयन्गोपालबालसूर्यो लिख्यते । युवा दिवाकरो बालसूर्यः । गोपीमुखविकासाः प्रदर्श्यन्ते, तत्प्रेमवीक्षणानि च । गोपालबालसूर्योदयः प्रदर्श्यते । दिनकरकुलकमलदिवाकरो रामः । एतच्छ्लोकोक्तदिवाकरो गोपालः । 'उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम् । बभूव तस्याश्चतुरश्रशोभि वपुर्विभक्तं नवयौवनेन ॥' इति कुमारसंभवे । अत्र चित्रम्, उदयसूर्यः, तद्रश्मयः ; तद्रश्मिभिद्यमानाम्भोजानि, नित्ययुवा, सहसा प्रादुर्भवद्यौवना युवतय एतेषां समुदायः । तत्र चित्रसूर्यादीनां दृष्टान्तत्वम् ॥

महसे महिताय मौलिना
विनतेनाञ्जलिमञ्जनत्विषे ।
कलयामि विमुग्धवल्लवी-
वलयाभाषितमञ्जुवेणवे ॥ १५ ॥

हृदये बालसूर्यमिवोद्यन्तं गोपालं नमस्करोति । उद्यन्तमादित्यं नमस्कुर्मः । बालकं गर्भादवतरन्तं वीक्ष्य प्रणनाम पिता 'प्रणिपतामि भवन्तमनन्यधीरखिलकारणमाश्रिततारणम्' इति देवकी च तं तुष्टुवे । तत्र केवलस्य गोपालस्यावतारः । अत्रातुराबलाजनमुखाम्भोजदिवाकरत्वेनाविर्भावः । कथं तस्याञ्जलिं न कुर्याम्? उद्यन्युवा दिवाकरः कथं न नमस्क्रियेत । देवताकाण्डतृतीयाध्यायो मीमांसापञ्चदशाध्यायः । देवतोपासनं तस्य विषयः अस्मिञ्छ्लोके स एव विषयः । 'आविरस्तु चित्ते करणोन्मादकविभ्रमं महो मे' इति प्रार्थना कृता । 'यादृशी भावना तस्य सिद्धिर्भवति तादृशी' मह एवाविर्भूतम् । तन्नमस्क्रियते । शब्दभेदोऽपि नास्ति प्रार्थिताविर्भूतयोः ॥

अञ्जनत्विषे । अक्ष्णोरञ्जनवर्तिका भवतीदमञ्जनत्विट् तेजः । दिवाकरत्वेऽपि न दुर्दर्शत्वम् । अञ्जनवत्सुदर्शत्वम् । अञ्जनत्विषो महसा न वास्तवविरोधः । सान्द्रपयोदसौभगमिदं महः । नीलवर्णानि रत्नानि महार्घाणि निरतिशयतेजोवन्ति सन्ति । दर्शने शीतलानि च ॥

विमुग्धवल्लवीवलयाभाषितमञ्जुवेणवे । उत्तरश्लोकोऽवतार्यते । वेणुगाने वल्लवीनां वलयैर्हस्तैश्च तालो विरच्यत

इति वक्ष्यते । गोपीनां महत्यसूया वेणौ । 'गोप्यः किमाचरदयं कुशलं स्म वेणुर्दामोदराधरसुधामपि गोपिकानाम् । भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो हृष्यत्त्वचोऽश्रु मुमुचुस्तरवो यथार्याः' इति परस्परं भाषन्ते गोप्यः । रासोत्सवः प्रस्तोष्यतेऽनन्तरश्लोके । तत्र गोपीनां वेणोश्चानुकूलसाहचर्यं नियमेनापेक्षितम् । वेणुर्गोप्यश्च गोपालाधरामृतांशहरा दायादाः । ज्ञातीनां दायादानां शात्रवं परस्पराभाषणनियमश्च भूयो दृश्यते । गोपीनामीर्ष्या दर्शिता । कथं वेणोस्तासां च सहकारो येन विना रासो न सिध्येत् । तेषां सर्वेषां संमन्त्रणमावश्यकं राससिद्धये । सन्धिश्च करणीयः । गोप्यो न तेन प्रधानवाद्येन संभाषेरन् । मध्यस्था वावदूका अपेक्ष्यन्ते । गोपीनां वलयावावदूका मध्यस्था भवन्ति । 'संबन्धमाभाषणपूर्वमाहुर्वृत्तः स नो—' इति रघुवंशे । साप्तपदीनं सख्यं सहभाषितैः सह क्रान्तैर्वा सप्तभिः पदैर्निर्वृत्तम् । वलयद्वारा गोप्योऽपि वेणुसख्यो भवन्ति । संगता रासं निर्वर्तयिष्यामस्तत्फलं च व्यवस्थितैरंशैर्भोक्ष्यामहे इति व्यवस्थां संकेतं च कुर्वन्ति । अन्योऽप्यर्थः । मूकवाद्यत्वेन प्रसिद्धो वेणुः । वाद्येन गीतपदानां सम्यक्स्पष्टं वाचयितृत्वे वाद्यं भाषत इति व्यवहरामः । वेणोः स्वतो मूकत्वेऽपि

वलये र्भाषणसमर्थः क्रियते सः । भाषितृत्वात्स मञ्जुर्भवति । मूकं करोति वाचालं वाचाऽऽ गोपिवलयाः ।

जयति ललितवृत्तिं शिक्षितो वल्लवीनां
शिथिलवलयशिञ्जाशीतलैर्हस्ततालैः ।
अखिलभुवनरक्षागोपवेषस्य विष्णो-
रधरमणिसुधायामंशवान्वंशनालः ॥ १६ ॥

देवताकाण्डतुरीयाध्याये देवतोपासनफलं प्रतिपाद्यते । गोपालदेवोपासनस्य फलं तदधरामृतम् । अमृतपानजं सुखं स्वर्गे । अमृतार्थं दुग्धोदधिरमन्थि । तत्र च बहवो भागिनः । रासक्रीडाफलमधरामृतम् । रासस्तत्फलमधरसुधा तद्विभजनं चोच्यते । गोपालदेवतोपासनफलस्य स्वर्गतौल्यार्थं सुधाशब्दग्रहणम् । सुधा देवतोपासनफलभूतस्वर्गे लभ्येत । स्वर्गे दिव्यस्त्रियो नृत्येयुः सुरनायकस्य पुरतः । तेषां श्रमहरणाय पारितोषिकत्वेनामृतं वितीर्येत । 'संभवन्तु सुरस्त्रियः' इति नियोगेन सुरस्त्रियो गोप्यः समभवन् । सुरस्त्रियो गोप्यो रासे नृत्यन्ति । स्वर्गस्त्रीणां बह्वीनां सह नर्तनं स्वर्गलोके विशाले ॥ स्वर्गानुभवसादृश्यमस्ति रासस्य । न देवताकाण्डे मोक्षोपन्यासः संभवी । मध्ये मध्ये वान्तरेऽमृतं पीयेत । गोपीभिरपि श्रान्ताभिरधरपानं

क्रियेत । 'विष्णोः' इति देवताकाण्डोपान्त्यसूत्रस्य प्रत्यभिज्ञापनमिति रसिकैर्विभाव्यम् । 'स विष्णुराह हि' इति तत्सूत्रम् । काण्डान्ते विद्यमानस्य विष्णुपदस्य तृतीयपादान्ते पठनमित्यप्यवधेयम् । 'बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः' इति मेघे कालिदासः । रघुवंशस्य चरितं कृतं महाकविना । यदुवंशस्य चरितं न चकार सः । तत्करणे रुचिस्तस्यासीदिति मेघश्लोकाद्गम्यते । महाकवेराशयस्तुल्यशीलैराचार्यैः पूर्यत इव यादवाभ्युदयप्रणयनेन । महाकविकृतम् 'गोपवेषस्य विष्णोः' इत्यद्भुतवर्णनं स्वग्रन्थे निवेश्यते । एतच्चाचार्याणां कालिदाससूक्तिरसिकतां स्पष्टं कथयति । अस्य रासोत्सवस्याध्यक्षः फलदाता प्रभुः कः? यद्यपि गोपालोऽपि नृत्यति, गायति; वेणुं वादयति च, यद्यपि स एकोऽप्यनेकगोपालो भूत्वास्मिन्नुत्सवे मुख्यनिर्वाहकः, यद्यपि सोऽत्र प्रधाननटो नटसहस्रं च भवति, न तस्य वेतनमंशो वा दीयते । अशुल्ककर्मकरः सः । तेनास्मत्सफलकार्यनिर्वहणेऽपि वेतनं न तस्मै देयः । तस्य रासः स्वयं प्रयोजनम् । सर्वगोप्यधरस्पर्शरूपमहाफलं वा तस्य । अनेकनटरूपाणि परिगृह्य प्रतिगोपिमध्ये स्थितत्वेऽपि रासगोष्ठीमध्ये एको गोपालः पृथगास्ते । 'मध्ये मणीनां हैमानां महामारकतो यथा' इति भागवते ।

स्ववेणुक्वणोन्माथितजनेष्वयमप्यन्यतमः । 'त्वं तेष्वन्यतमां बभूविथ भवद्वेणुक्वणोन्माथने' इत्यद्भुतोऽनुभवो भाट्टः । 'चेतश्चेतस्तव च भगवन् कां दशामन्वभूताम्' इति तस्यै-त्रनुभवः। नर्तकी देवदासी, तन्नर्तनशिक्षकः, गायकाः, वाद्यवादकाः, तालदायकाः सर्वे मिलित्वा नर्तनं निर्वर्तये-रन्। सर्वभूषणभूषितो विचित्रवेषः प्रभुर्मध्ये आसीनस्तन्न-र्तनमध्यक्षयेत्। तन्नर्तनसंतोषितो वेतनं पारितोषिकं वा दद्यात्प्रधानभूतवादकहस्ते। तत्फले च नर्तक्यास्तत्तद्वाद्यवाद-कानां तालदायकानां च व्यवस्थिता अंशाः। वेणुश्च स्वांशं लभेत पारितोषिकेऽधरामृते। रतिसर्वस्वमधरं पानाय दद्या-दयं रसिकोदारः प्रभुः। सर्वस्वदानं उदारस्वभावः। मध्ये मध्ये नर्तक्यो गोप्यस्तदधरपानं तदुच्छिष्टताम्बूलचर्वणादिकं लभन्ते। वेणुश्च तदवशिष्टं लभते। वेणुपीतोच्छिष्टं च ता लभन्ते। ते ते स्वं स्वमंशं लभन्ते। ईदृशमहावर्तनं पूर्वशिक्षां पूर्वाभ्यासं वा विना न सभायां प्रवर्त्येत। सिद्धगन्धर्वा-दयो आकाशे विमानेषु स्थित्वा रासमध्यक्षयन्ति। 'वैमा-निकैः कुसुमवर्षिभिरीड्यमानो रेमेस्वयंस्वरतिरत्रगजेन्द्रलीलः' इति शुकः। वेणोर्ललितवृत्तिरपेक्ष्यते रासे। तां च शिक्ष्यते वेणुर्गोपीशीतहस्ततालैः। गोपीनां रागतालज्ञानमेवं न भवे-त्प्रायेण। यदि तासां मध्ये काचिन्निसर्गेण तदभिज्ञा भवे-

रसा संमानं लभत इत्युच्यते शुकेन 'काचित्समं मुकुन्देन स्वरजातीरमिश्रिताः। उन्निन्ये पूजिता तेन प्रीयता साधु साध्विति॥' इति। मिश्रिता एव ते रागतालाः स्युर्गोपीनां यदि ते स्युः। रासगोष्ठ्यां वेणुव्यापकः पण्डितः। गोपालेन भूयो वादितः पुरा। तस्यापि तालशिक्षा दीयते गोपीभिरिति कथम्? तत्रोच्यते—— सङ्घनर्तने कश्चिदभिज्ञः शिक्षकस्तालं प्रवर्तयेत्। तमनुसृत्येतरेऽनभिज्ञा अपि तालं कुर्युः। गोपीनां शिथिला वलयाः शिञ्जानाः सन्ति। शिथिलाभरणवलयाविधारणं ग्राम्यजनस्वभावः। शिथिलाश्च वलयाः शब्दं कुर्युः। 'वलयानां नूपुराणां किङ्किणीनां च योषिताम्। स प्रियाणामभूच्छब्दस्तुमुलो रासमण्डले॥' इति भागवते। तत्रापि प्रथमपठनं वलयानाम्। तत्कृतस्तालोऽनुक्रियते गोपीहस्तैः। तत एव तेषां शीतलता। बहून्वानरांश्चपलसार्वभौमान्पृतनात्वेन चकार दाशरथिः। सैनिकानामचापलमवधानं दान्ततेत्यादिगुणा अवश्यापेक्षिताः। तद्वैदेशिकान्प्रकृतिचपलांस्तान्वशीकृत्य राक्षसवर्यानयोधयत्प्रभुः। एको योधयन् खरादीनां रक्षसां चतुर्दशसहस्रं तत्र कष्टं मेने। स्वसैन्यानां प्रकृतिचपलानां चापल्यनिवर्तनं कृच्छ्रसाध्यं स्यात्। विद्वत्तमः प्राज्ञतमो दान्ततमोऽपि हनूमान् 'प्रसिद्धं त्रिषु लोकेषु कपित्वमनवस्थितम्'

इत्यभ्युपगच्छति । अनवस्थितत्वरूपं चापल्यं सैनिकत्वस्यात्यन्तमनुपपन्नम् । दान्तत्वरूपगुणस्तदवश्यापेक्षितः । प्रकृतिचपलानां योधत्वकरणं तत्सहायेन च प्रबलराक्षसायोधनं रामावतारे । तथा गोपालेन स्वरजातितालानभिज्ञाभिर्गोपीभिः सह रागतालप्रधानरासनिर्वाहः श्रोतृसिद्धगन्धर्वादिविस्मापकः साधितः । यथामनोरथमत्यन्तसंकीर्णे स्यात्तासां वहुविधतालः । तत्तत्संकीर्णतालानुरूप्यं संपादनीयं वेणुगीतस्य । वेणुगीतानुसारेण न तास्तालं प्रयोक्तुं जानन्ति । अत्यन्तजडास्ताः । कथं ता वेणोर्ललितवृत्तिशिक्षका भवेयुः । अत्रोच्यते कविभिः । शिञ्जनास्तासां शिथिलवलयाः शीतलं तालं निर्वर्तयन्ति । अनभिज्ञा अपि गोप्यस्तत्तालमनुकरतालं कुर्वन्ति । कृतानुकरणरूपानुतालनं सुलभमनभिज्ञानामपि । वलयाश्चाचेतना गोपालसंकल्पमात्रेण सुलभप्रेर्याः सुतालकरणे । चेतनानां प्रेरणं न तथा सुलभम् । आलस्यानवधानादयश्चेतनैकान्ताः । अतो गोपालो वलयद्वारा सुतालं निर्वर्तयति । चेतनगोपीहस्तानां वलयरचिततालो संबन्धात्यन्ताभावव्यञ्जनाय शिथिलत्वकीर्तनम् । दृढघटिताश्चेद्वलया गोपीहस्तप्रेर्याः स्युः । तथा चेद्गोपालेन यथेष्टं तालनिर्वर्तनं न सुकरम् ॥

जयति । गोपालस्य जितन्तेपाठो भूयः कृतः । इदानीं रासे वेणोरुत्सपाठः क्रियते । वेणोरासे प्राधान्यम् । देवदासीनर्तने वाद्यवादनं दूरतः श्रुत्वा नर्तनशालां धावेयुः । तथैव गोपीः संमेलयितुं वेणुगीतं साधनम् । 'निशम्य गीतं तदनङ्गवर्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः । आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कान्तो जवलोलकुण्डलाः ॥' इति वेणुगीतस्य गोप्याह्वयनसंज्ञात्वम् ।। वेणुर्घटकः ॥

ललितवृत्ति शिक्षितः । गोपालस्य ताण्डवशिक्षकास्तालकरा दधिरवाः । शिक्षकबहुत्वम् 'बहुभ्यः श्रोतव्यम्' इति विधिमनुसृत्य ॥

शिथिलवलयशिञ्जाशीतलैः । वलयानां कुण्डलानां चाधिकशिथिलत्वं ग्रामीणजनेषु । शैथिल्याभावे गोपीहस्तप्रेर्यत्वं च न स्यात् । गोपालमात्रेच्छाप्रेर्यत्वं च स्यात् ।। तदभावे न तालस्य शीतलत्वम् । गोपिहस्ततालानां न स्वतः शीतलत्वम् । तद्धस्ताप्रेर्याणां शिथिलधृतानां वलयानां शिञ्जाभिरेव तच्छीतलत्वम् । वलयानां शिञ्जानां शीतलत्वं यादृच्छिकं न गोप्यधीनम् । यदृच्छा च गोपालेच्छा ॥

हस्ततालैः । अत्र तालसाधनानि हस्ता वलयाश्च ।

लोके उपकरणभूतं मृदङ्गादिकं दुर्लभं गोपालस्य । वीणादि वाद्यसाधनं तस्य दुर्लभम् । अरण्यलभ्यवंशनालो वाद्यं भवति । वन्यस्य गोपालस्य वन्यान्येव साधनानि, न नागराणि ॥

अखिलभुवनरक्षागोपवेषस्य विष्णोः । किं फलं भवति प्रधानस्य वेणोः । अधरसुधायामंशः । कस्याधर-सुधायाम्? गोपालस्य । क उत्कर्षो गोपालाधरस्य! गोपी-नां वेणोर्वा सामान्यगोपालाधरः सुलभः । न तत्र कोऽपि विशेषः । गोप इत्यत्र गोशब्दस्य पृथिवीवाचकत्वम् । गोपत्वं चाखिलभुवनरक्षकत्वम् । अधरसुधाया उत्कर्षला-भाय गोपशब्दविवक्षितोऽर्थः, तस्य तत्त्वं च कथ्यते अखिलभुवनरक्षागोपवेषस्येति । देवताकाण्डः समाप्यते । शारीरकं चावतार्यते । तदवतारणे च शारीरकभाष्यप्रथम-श्लोको बुद्धिस्थो भवति 'अखिलभुवन—' इति 'रक्षैक-दीक्षे—' इति च । तत्प्रत्यभिज्ञापनं च भवति । देवता-काण्डान्तविद्यमानसूत्रमपि बुद्धिस्थं भवति । अतो विष्णु-पदग्रहणम् । अस्य गोपस्य विष्णुत्वाभावे कथमनेकसहस्र-गोपालत्वेनाविर्भवनम्, नर्तनं च रासे । अवतरता प्राकृत-वेषधारिणा विष्णुना खलु सुधा संपाद्यते तदपेक्षकभक्त-

जनानाम् । कूर्मवेषेण विष्णुनाब्धिमथनेनामृतं लम्भिताः सुराः । मोहिनीवेषपरिग्रहश्च तदा इदानीं गोपवेषेण विष्णुनाधरसुधां प्रापिताः सुरस्त्रियो गोप्यः ॥

अधरमणिसुधायाम् । कूर्मविष्णोरिव न स्वविग्रहबाह्यक्षीरोदधिमथनलब्धममृतम् । स्व श्रवभूताधरस्य रतिसर्वस्वभूता सुधा । सुधा भोग्या । उ ष्टमणिपात्रे तस्या निवेशे तत्पात्रात्पाने विशेषभोग्यता स्यात प्रवालपात्रमिवारुणाधरः । एतद्व्यूह्यते मणिपदेन ॥

अंशवान्वंशनालः । सांप्रतमिदं वंशस्यांशलाभ इति वंशजानामेवांशहरत्वं न्याय्यम् ।

चित्राकल्पः श्रवसि कलयन् लाङ्गलीकर्णपूरं
वर्होत्तंसस्फुरितचिकुरे बन्धुजीवं दधानः ।
गुञ्जाबद्धामुरसि ललितां धारयन्हारयष्टिं
गोपस्त्रीणां जयति कितवः कोऽपि कौमारहारी ॥

गोपवेषो विष्णुरित्युक्तम् । गोपालवन्यवेषो वर्ण्यते । वन्यानामाभरणानां गोपाले समन्वय उच्यते । समन्वयाध्यायस्य विषयः सूच्यतेऽत्र । बहुगुणानां ब्रह्मणि समन्वयस्तत्र प्रतिपाद्यते । तत्तद्वाक्यानां ब्रह्मणि समन्वयो निरूप्य

ते, तत्तत्प्रकरणोक्तगुणानां ब्रह्मासाधारणगुणत्वात्, इतरत्रानन्वयाच । ब्रह्मलिङ्गैर्ब्रह्मपरत्वनिर्धारणम् । यत्रास्पष्टत्वमिव ब्रह्मलिङ्गानां तत्र विचारं प्रवर्तयित्वा तत्परत्वं निर्धार्येते । 'तल्लिङ्गात्' 'विवक्षितगुणोपपत्तेश्च' 'उत्तरेभ्यः' इत्यादिहेतुभिः प्रतिपाद्यस्य ब्रह्मत्वसिद्धान्तनम् । अदृश्यत्वादीनामपि गुणत्वेन वर्णनं भवति सगुणत्वप्रतिपादनादरात् । निर्गुणत्वेनाभिमतभूमाविद्याविषयभूमाधिकरणे 'धर्मोपपत्तेश्च' इति ब्रह्मत्वसाधनहेतुः । हेतोः पक्षवृत्तित्वाभावे कथं पक्षस्य ब्रह्मत्वं साध्येत । न्यायसूत्राणि खल्विमानि । नोपदेशाज्ञामात्रस्वरूपाणि श्रुत्यादिवत् । नैर्गुण्यं कुत्रापि ब्रह्मसाधकत्वेन नोपन्यस्यन्ते । उक्तं चाचार्यैः समन्वयाध्यायान्तेऽधिकरणसारावल्याम्—'सूत्रैरेतैः स्फुटार्थैः सविषयविषयैर्निर्विशेषैक्यपक्षे मुख्येश्चार्थैरसिद्धैः प्रकृतिपुरुषतो भेदवादः कथं स्यात् ।' इति । विविधविचित्राद्भुतानेककल्याणगुणा आरण्यकदृष्टा गोपालं ब्रह्म भूषयन्ति यथा तद्विग्रहं वनदृष्टा लाङ्गलीपुष्पगुञ्जादयः । आरण्यकगुणसमन्वयः प्रदर्श्यते वनचरे ब्रह्मणि ॥

चित्राकल्पः । गोपवेष इत्युक्तम् । आरण्यकयुवतीनां प्रियः कृष्णो विचित्रवन्यभूषणैर्भूषित इत्युच्यते । आरण्यक-

चरस्य वन्यवेषो विचित्रः स्यात्। 'वंशस्वनो वत्सविहारपांसुः सन्ध्यागमस्तस्य च वन्यवेषः। ....व्रजसुन्दरीणामासीच्चतुःस्कन्धमनङ्गसैन्यम्॥' इति वन्यवेषस्य मोहनत्वानुभवः। विचित्रवन्यभूषणवर्णनेन विचित्रारण्यकद्दष्टकल्याणगुणसमन्वयः सूच्यते। कल्याणगुणवत्त्वकथनं नास्माभिरेव क्रियते। 'बहवो नृप कल्याणगुणाः पुत्रस्य सन्ति ते।' इति कोसलजना रामायणे। आर्षवर्णनमेव वयमनुसराम:। चिदचितौ ब्रह्मणो भूषणतया विशेषणे 'तत्त्वैरस्त्रविभूषणैः' इत्याचार्याः। दिव्यभूषणानामपि न चित्रत्वम्, यथा वन्याकल्पानाम्। 'इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।' 'मधुराधिपतेरखिलं मधुरम्' इति श्रीमद्वल्लभाचार्याः। 'बर्हापीडं नटवरवपुः' इत्यादिशुकश्लोकोऽत्रानुगम्यते॥

श्रवसि कलयन् लाङ्गलीकर्णपूरम्। कर्णभूषणस्य प्रथमकीर्तनम्। जिज्ञासा सूचनीया। जिज्ञासा च गुरुमुखाच्छ्रवणाद्भवेत्। गुरवोऽस्मत्कर्णधाराः। 'देशिकैः कर्णधारैः' इत्याचार्याः। अस्मत्कर्णपुटौ देशिकाधीनौ कर्तव्यौ। तेऽस्मत्कर्णौ धारयेयुः। तद्वदननिर्गलदमृतधाराभिरस्मत्कर्णौ पूरणीयौ। एतत्सूचनाय 'श्रवसि कलयन्' 'कर्णपूरम्' इति प्रथमं कर्णा-

लंकारग्रहणं शुकोक्तक्रमसुल्लङ्घ्यापि । 'बर्हापीडम्' इति प्रथमं बर्होत्तंसानुभवोऽनन्तरम् 'कर्णयोः कर्णिकारम्' इति कर्णभूषणानुभवस्तत्र । अत्र व्यत्यस्तः क्रमः श्रवणादिसूचनाय । ब्रह्मविचारविषयैरस्मच्छब्दैर्दिशः पूरणीयाः । दिशश्च गोपालस्य ब्रह्मणः श्रोत्रम् । आस्माकीना ब्रह्मवादाः गोपालकर्णयोर्मधुधारां वमेयुः । लाङ्गलीशब्दो ध्वनिमात्राद्धलरामं स्मारयति । 'आकौमारकं तदपृथग्भूता एव कृष्णस्य केलयोऽस्त्रदन्त' इत्युक्तमाचार्यैः । अस्यां विंशतौ तत्साहचर्यं कथं न वर्ण्यते । यद्यपि सो न वर्ण्यते, तन्नामघटकाक्षराणि गृह्यन्ते । बलरामस्य साक्षाद्वर्णने ज्येष्ठस्य तस्य मुख्यत्वाद्गोपालभावनायां गोप्यादीनामिव तस्योपसर्जनत्वं न भवेत् । भावनायां मुख्यत्वमिष्टं गोपालस्य । अन्यथा गोपालकतुत्वरूपत्वं भावनाया न सिद्ध्येत् । 'कर्णयोः कर्णिकारं बिभ्रत्' इति शुकानुभवस्मारकपदानां प्रयोगोऽत्र ॥

बर्होत्तंसस्फुरितचिकुरे बन्धुजीवं दधान । 'बर्हापीडम्' इति शुकानुभवः स्मार्यते । 'बिभ्रत्' इत्यस्य स्थाने 'दधानः' इति । 'चिकुरे' इति सप्तम्यन्तः पाठः प्रक्रमानुरूपः । श्रवसि, चिकुरे, उरसि इत्यैकरूप्यम् । बर्हापीडे चिकुरे बन्धुजनानां प्राणाः । तत्स्मृत्वा स्मृत्वा तद्विरहे मुह्यन्ति ।

वन्यानां गोपीनां जीवभूतो बन्धुर्बन्धुजीवः । वन्याभरणानि वन्यानां जीवाः । जीवश्च मणिवरः । कौस्तुभानां चिकुरे धारणं चिन्ताकल्पो भवेत् । दास्यं प्रार्थयमानाभिर्गोपीभिः समर्पितान्जीवमणीन् शिरसा प्रतिगृह्णाति गोपालः । शिरसा प्रतिसङ्गृह्यानन्तरं वक्षसि धारयेत् । अत्र जीवानां गोपालाधेयत्वं गोपालचिकुरातिशयाधायकत्वं च व्यज्यते । समन्वयाध्यायस्य द्वितीयपादे चिदचितोः शरीरत्वं तृतीयपादे आधेयत्वं च प्रतिपाद्येते । 'विश्वं पादे द्वितीये वपुरिति कथयंश्चिन्त्यते वाक्यवर्गो विश्वाधारः स आत्मेत्यभिलपनपरस्तर्कणैस्तृतीये' इत्याचार्याः ॥

गुञ्जाबद्धामुरसि ललितां धारयन् हारयष्टिम् ।

ललिताशब्दः 'अधिकमनोज्ञा' इति महाकव्युक्तमनोज्ञार्थकः । गुञ्जाघटितत्वाद्धारस्याधिकमनोज्ञत्वम् । 'ललिताम्' इति लक्ष्मीवाचकस्य शब्दस्य ग्रहणम् । लक्ष्म्यापि न तादृशशोभा वक्षसो यथा गुञ्जामालयेति व्यज्यते । गोपालोरसि स्थिता विद्युत्प्रभा लक्ष्मीरपि न तथा ललिता । गुञ्जामालैव ललिता । लक्ष्म्याः संज्ञापह्रियते गुञ्जामालया । ललिताशब्देन लक्ष्मीः स्मार्यते । वक्षसि लक्ष्मीर्धार्यते । एतेन गोपालस्य प्रभुत्वं सिध्यति । श्रीमति प्रभुतोक्तिः ।

श्रियः पतित्वं लक्षणत्वेन गृह्यते । कथं लक्ष्मीर्गोपवक्षसि तिष्ठेत्? गुञ्जामालया सा तत्र बध्यत इत्युच्यते । अथ वा गुञ्जाबद्धा हारयष्टिरेव ललिता लक्ष्मीः । सा स्वस्या निजस्वरूपं गोपयित्वा गुञ्जाहारत्वेनोरसि तिष्ठति । स्वनित्ययोगाभङ्गाय, नायकस्य गोपवेषत्वाभङ्गाय च ॥

गोपस्त्रीणां कौमारहारी कोऽपि कितवो जयति । शुद्धनिरञ्जननिरवद्यब्रह्मत्वं कथं गोपालस्य संभवेत्? कितवः खलु सः । कथं कितवस्य नित्यशुद्धब्रह्मत्वम्? 'ब्रह्मेमे कितवाः' इति श्रुत्येति समाधीयते तद्वाक्यप्रत्यभिज्ञापककितवग्रहणेन । इमे सर्वे कितवा ब्रह्म इति वदन्ती श्रुतिः किं गोपालमेकमेव कितवं न गृह्णाति ॥

लीलायष्टिं करकिसलये दक्षिणे न्यस्य धन्या-
मंसे देव्याः पुलकरुचिरे संनिविष्टान्यबाहुः ।
मेघश्यामो जयति ललितं मेखलादत्तवेणु
र्गुञ्जापीडस्फुरितचिकुरो गोपकन्याभुजङ्गः ॥

अविरोधाध्यायो द्वितीयः । तत्र परवाग्गुम्फितस्वमतदोषा वार्यन्ते । परमतेषु दोषाः प्रदर्श्यन्ते च । अन्तःकलहाश्च समाधीयन्ते । यष्टिना स्वरक्षणं परयोधनं च ।

नात्र वैरं शात्रवं वा । लीलयात्यन्तदाक्षिण्येन प्रतिपक्षमनोहारित्वेन चारुवादः प्रवर्त्यते । अत एव लीलायष्टिर्न प्रतिपक्षघातकबृहद्यष्टिः । 'ननु मुमुक्षूणां मोक्षसाधनत्वेन सम्यग्दर्शननिरूपणाय स्वपक्षस्थापनमेव केवलं कर्तुं युक्तम्, किं परपक्षनिराकरणेन परद्वेषकरणेन । बाढमेवम्, तथापि महाजनपरिगृहीतानि महान्ति सांख्यादितन्त्राणि सम्यग्दर्शनापदेशेन प्रवृत्तान्युपलभ्य भवेत्केषांचिन्मन्दमतीनामेतान्यपि सम्यग्दर्शनायोपादेयानीत्यपेक्षा । तथा युक्तिगाढत्वसंभवेन सर्वज्ञत्वभाषितत्वाच्च श्रद्धा च तेष्वित्यतस्तदसारतोपपादनाय प्रयत्यते' इति श्रीशाङ्करभाष्यं परपक्षप्रतिक्षेपकाद्वितीयपादारम्भे । आचार्याश्च तत्पादारम्भे 'बाधाभावादकम्प्ये स्थितवति निगमैर्ब्रह्महेतुत्ववादे भूयः किं वीतरागो वदति परपरीवादमत्रेत्ययुक्तम् । प्रख्यातप्राच्यनैकप्रतिसमयभवन्मन्दसन्देहशान्त्यै तुल्यत्वभ्रान्तिसिद्धा प्रकरणसमता तर्कपादे निवार्या ॥' इत्युक्तम् । यद्यप्ययं श्लोकस्तद्भाष्यपदानि भावांश्च गृह्णाति प्रायेण, अस्य सौन्दर्यं रसिकश्रोत्रमनोवेद्यम् । अस्य श्लोकस्य मूलं तद्भाष्यवाक्यानीति च स्पष्टं रसिकानाम् । 'ब्रह्माज्ञानवादादपि पापीयानयं पक्षः' इति नवनीतहृदयाः श्रीभाष्यकाराः । पक्षस्यैव पापीयस्त्वेन निन्दा, न तत्पक्षवादिन इत्यवधेयम् । एवमेव महतां वादशैली ।

'सौहार्देन पृच्छसि चेद्विषयाविषयिभाव इति ब्रूमः' इति दृग्दृश्यसंबन्धानुपपत्तिवादे शतदूषण्याम् । पक्षदूषणी, न प्रतिवादिदूषणी । वेदान्तिनः केऽपि न गर्हणीयाः । सर्वेऽपि तत्तद्बुध्यनुसारेण तत्तदन्तरात्मप्रेरितमनःसाक्ष्यानुसारेण वेदान्तपक्षेष्वन्यतमं परिगृह्णन्ति । 'न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति' इति भगवान् । स्वपक्षे प्रतिपक्षिमल्लैः पात्यमानानां दण्डघातानां यष्टिना वारणं क्रियते । तच्च प्रथमपादे । सूत्रकारपक्षस्याचाल्यत्वात्, सूत्रकारस्यातिचतुरसमर्थवावदूकत्वाल्लीलयेव स्वपक्षरक्षणं परपक्षप्रतिक्षेपश्च क्रियते । यथा प्रहसन्निव कृष्णो गीतारूपं महदध्यात्मशास्त्रं प्रोवाच । अयमपि सूत्रकृत्कृष्णो द्वैपायनः । उभयोरपि कृष्णत्वाद्द्वैपायनकृष्णव्यवच्छेदार्थं वार्ष्णेयविशेषणग्रहणं क्रियते 'वार्ष्णेयं मन्यते कृष्णमर्हणीयमरिन्दमः' इति राजसूयप्रकरणे । मल्लयुद्धे करदण्डादिकमिव वादे मुखम् । किसलयवदतिमृदुना कोमलेन स्मेरेण भाव्यं मुखेन वादे । अतः करकिसलयेति । तत्राप्यपरितुष्यन् दाक्षिण्यैकान्त्यमेव प्रतिपक्षैः सह वादे बहुमन्यमानो दक्षिणशब्दं प्रयुङ्क्ते दण्डोद्यतकरे । यथा दक्षिणकरो दक्षिण एव भवेन्न वामस्तथा वादिवदनेन दक्षिणेनैव भाव्यम् । एवमपि कदाचित्कोपावसरेऽदक्षिणं दक्षिणमित्यस्माभिरुक्तं

स्यात्, न तद्वादे मन्तव्यम्। वादेऽपि दक्षिणत्वं सुमुखत्वमपारुष्यं मधुरता चास्माभिरिष्यते. भगवता गीतं 'अनुद्वेगकरं वाक्यं' इति सात्त्विकत्वालक्षणं न विस्मर्यतेऽस्माभिः। वादेऽपीदं माधुर्यमेवास्मद्वादेमित्युदाहृताधिकरणसारावलिश्लोकेन स्पष्टं भवेत्। अत्रापि शारीरकद्वैतीयार्थ संगृह्णीमः। लीलागृहीतत्वं यष्टेः, किसलयत्वं करस्य; दक्षिणत्वं चेति दाक्षिण्यस्याभ्यस्यमानत्वमवधेयं सहृदयैः। न कर्कशत्वम्, किं त्वत्यन्तकोमलत्वम्। न वादिजयोऽपेक्ष्येत सात्त्विकाग्रेसरेण वेदान्तवादिना, किं तु तस्य बोधनमात्रर्जनं च। वादे जितोऽपि स्वपूर्वाभिनिवेशेन जिततरस्तद्वश एव भूत्वा पलायेत भयेन लज्जया वा। बाधयन्तः परस्परमिति कृष्णचित्तानां कृष्णगतप्राणानां स्थितिः। वेदान्तिनां त्रयाणामपि कृष्णचित्तत्वं कृष्णगतप्राणत्वं च समानम्। कृष्णगृहीतमानसाः सर्वेऽपि वेदान्तिनो यथा शुकः, यथा च व्रजस्त्रियः। वशीकरणरूपजय उद्देश्यो यष्टिग्रहणस्य। लीलाग्रहणेन प्रथमपादान्तस्थलीलाधिकरणसूचनम्। केवलं लीलेदं। यथा गोपीभिर्विहरणं केवलं लीला, तथा प्रपञ्चसृष्ट्यादिकं न क्लेशसाध्यम्, किं तु लीलाकैवल्यम्। स्वार्थे ष्यञ्। केवलं लीलैव। न क्लिष्टकारितत्वं सृष्ट्यादेः। 'अकर्माक्लिष्टकारित्वात्' इति श्रीमदानन्दतीर्थग्रन्थेषु सर्गादिमहत्कर्मकर्तुर्भगवतोऽकर्म-

स्वनिर्वाहः क्रियते । मिथः कलहश्च शाम्यते गोपवेणुबर्हगुञ्जादीनाम् । कृष्णस्य वामकरस्य स्वांसनिवेशं तत्कारितस्वपुलकोद्गमादियोगं चापेक्षते देवी गोपी । वामकरे वेणुर्न्यस्तः पूर्वम् । तत्स्पर्शः काङ्क्ष्यते देव्या । मा भूत्स्वस्य गोपालाधरस्पर्शः । तस्य वेणोर्मा भूत् । वामकरे मदंसनिवेशेन केवलं ममानन्दमूर्तिस्पर्शसुखम्, वेणुवियोजनमपि भवति गोपालाधरात् । पूर्वं वेणुर्वामकरे न्यस्तः । इदानीं देव्यंसे वामकरो निवेश्यते । पर्यायेणोभयोर्वामकरस्पर्शसुखं दीयत इति कलहसमाधिः । वेणुश्च मेखलायां निवेश्यते । वामकरादधराच्च वियोजनेन खिन्नो वेणुस्तोष्यते ललितं मेखलायां निवेशनेनेति ललितपदप्रयोगेण व्यज्यते । पूर्वश्लोके चिकुरे बर्हः । उरसि गुञ्जामाला । तयोः स्थानविनिमयः क्रियते परस्परेर्ष्याकलहशमनार्थमस्मिन् श्लोक इति रसिकैर्भाव्यम् । आकल्पानां न्यासविपर्ययवर्णनं न निरभिसन्धि भवेत् । न वयं हठात्स्वाभिप्रायमाचार्यसूक्तिषु प्रवेशयिष्यामः । तदभिप्रेतं वर्ण्यते वा नो वेत्याचार्या रसिकाश्च प्रमाणम् । तृतीयचतुर्थपादयोः कार्यविषयकश्रुतिविगानं समाधीयते । ज्ञापकहेतूनां श्रुतीनामन्तःकलहसमाधिस्तत्र । अत्र भोगकारकहेतूनां कलहशान्तिः ॥

लीलायष्टिं........अन्यथाहुः । न घातो लीलायष्टिना । लीलयोद्धृतमात्रेण तर्जयति । देव्यंसे वामहस्तं निवेशयन्नेव परान् लीलया शमयति । पुष्पहास इति नाम दुहानं मार्दवं सूच्यते किसलयशब्देन । गोपीं देवीवद्बहुमन्यत इति व्यज्यते देवीशब्देन । रुक्मिणीदेव्यामिव गोपीसामान्ये बहुमानोऽस्य सुशीलस्य । मन्दैः सर्वैर्नीरन्ध्रसंश्लेषाभावे कथं सुशीलता । तत्काष्ठाविष्करणं खलु गोपालस्य मुख्यमाविर्भावप्रयोजनम् । नायं सुशीलो गोपवधूसंश्लेषीति वचनं व्याहतं भवेत् । मन्दमन्दाभीरजनसंश्लेषेणैव सुशीलतासाधनम् । कथं तेनैव तद्विरुद्धसाधनं संभवि ? यष्टिग्रहणेन यथा करस्य किसलयवत्त्वं तथा करस्पर्शेनांसस्य पुलकवत्त्वम् । वामशब्दं विहायान्यशब्दं पठन्नाचार्योऽस्य गोपालस्य करविशेषस्य वामसंज्ञामपि न मृष्यति । भाव्यमानेऽस्मिन् गोपाले न किमपि वामम् । 'मधुराधिपतेरखिलं मधुरम्' इति गोपालवल्लभा वल्लभाचार्याः । तत्तुल्योऽनुभव आचार्याणामपि । 'वामां बाहुलतां निवेश्य शिथिलम्' इति श्रिया मौर्यकण्ठे बाहुलतानिवेशनम् । तत्र शयनावसरः । अत्र तिष्ठदवसरो गमनावसरो वा । श्रीपाञ्चरात्राधिकरणस्य सूचनमावश्यकम् । तत्प्रामाण्यं वयमेक एवोत्पत्त्यसंभवाधिकरणे समर्थयामः । अत्रास्संनिकृष्टाः पाञ्चरात्रप्रामाण्यं शास्त्रयोनित्वाधि-

करणे स्मृत्यधिकरणे च विचारयन्ति । उत्पत्त्यसंभवाधिकरणे च शाक्तमतनिरासं वर्णयन्ति 'न शक्तिमात्रादुत्पत्तिः संभवेत्' इति । पाञ्चरात्रप्रामाण्यस्य परमतनिराकरणप्राये द्वितीयपादे निवेशनमेव न सहन्ते तेऽत्यन्तभक्त्या पाञ्चरात्रे । देवीसहितभगवद्विलासगमनरूपोत्सवोऽनुभूयते । परपक्षजयानन्तरं देव्या सह सलीलं ग्रामनगरादिप्रवेशः स्यात् । भगवदुत्सवप्रकाराः पाञ्चरात्रादवगम्यन्ते । 'अंसे देव्याः' इति बाहूत्क्षेपकीर्तनम् । उत्क्षेपणांसनिवेशनमध्ये पुलककीर्तनमतीव चारु । अंसनिवेशनोद्देशेनोत्क्षिप्ते करे भाविकरस्पर्शचिन्तनेनांसे पुलका उद्गच्छन्ति । पुलकोद्गमेन रुचिरमंसं वीक्ष्य दृढभावमनुमीय तत्र सम्यङ्निवेशयति बाहुम् । पुलकरुचिरत्वं संनिविष्टत्वे हेतुः ॥

मेघश्यामः । श्यामा देवी । तस्या अनुरूपो मेघश्यामो देवः । अत्र देवी च श्यामवर्णा नीला स्यात् । गोपीपुत्रस्यामुख्यस्वरूपदेवित्वम् ॥

जयति........भुजङ्गः । समन्वयाध्याये प्रकृतिं चेतनं च जित्वा कारणत्वविरुदं लब्धम् । द्वितीयाध्याये जयः स्पष्टः । 'शेते भुजङ्गशयने स महाभुजङ्गः' इति न्यासतिलके ॥

प्रत्यालीढस्थितिमधिगतां प्राप्तगाढाङ्गपालिं
पश्चादीषन्मिलितनयनां प्रेयसीं प्रेक्षमाणः ।
भस्त्रायन्त्रप्रणिहितकरो भक्तजीवातुरव्या-
द्वारिक्रीडानिबिडवसनो वल्लवीवल्लभो नः ॥

तृतीयाध्याये साधनविचारः । साधनं च सिद्धो गोपालः । साध्या च तद्दृढयोगरूपभक्तिः । परस्वरूपशोधनं विस्तरेण क्रियते साधनाध्यायमध्ये उभयलिङ्गाद्यधिकरणेषु 'न स्थानतोऽपि परस्य' इत्यारभ्य । 'सिद्धोपायाद्विभावं प्रथयितुम्'। इत्यधिकरणसारावल्याम् । भक्तजीवातुरिति भक्तजीवनहेतुर्भगवानुच्यते । भक्तो जीवातुरस्येति च । परस्परात्मत्वं परस्परप्राणत्वम् । व्यपगतप्राणात्मसंजीवनो भगवांस्तद्भक्तिश्च । स एवास्माकं मुख्यः प्राणः । आरामविहारो वर्णितः । आत्मरतिर्वर्णिता पूर्वं गोपालेन सहारामविहारेण । आत्मक्रीडत्वं वर्ण्यतेऽत्रजलक्रीडावर्णनेन । अस्य श्लोकस्य भाव एवं स्यादिति भाति । धानुष्कवत्प्रत्यालीढस्थितिमधिगता काचिद्गोपी योधवच्छतिबलेन भस्त्रायन्त्राज्जलं क्षेप्तुं प्राणानवरुध्य सर्वं बलमेकीकृत्यातीव दार्ढ्यं संचीयते तयाङ्गनया । परस्परस्पर्धावसरे सरोषं प्रक्षिप्यन्ते यन्त्रादुदधाराः । रागात्कोपो बलीयान् भावः । कोपावसरे यादृशं दार्ढ्य-

अङ्गनानां न तादृशं दार्ढ्यं स्यात्कामावसरेषु । आश्लेषस्य दृढत्वं गाढत्वमिष्येत रसिकेन कान्तेन । यदा कोपावसरे ऽत्यन्तदार्ढ्यमभूत्कान्ताङ्गानां नेदृशोऽवसरो लभ्येत गाढाश्लेषस्येति मत्वा तत्पश्चादागत्य गोपालस्तां कोपप्रापिताङ्गदार्ढ्यां दृढमाश्लिष्यति । स्वाङ्गानामत्यन्तदृढावस्थायां बलवता मनोरथेन गाढाश्लेषेऽकस्मात्संजाते तज्जनितात्यन्तसुखेन मूर्च्छां प्रारभते कान्तायाः । तत्प्रारम्भे नयनावयवभूतपक्ष्मणी ईषन्मिलतः । मूर्च्छयाक्रम्यमाणां निमीलन्नयनां प्रेयसीं वीक्ष्यात्यन्तसंरब्धो गोपालस्तां प्राणयितुं नयनयोर्मुखे चापः प्रक्षिप्सन् भस्त्रायन्त्रे करं निदधाति । भक्तकान्ताजनजीवातुः खलु सः । रसिको गोपाल इत्युच्यते । 'तासामाविरभूच्छौरिः' इत्यागतस्य गोपालस्य ग्रामजना गोप्यः 'स्वैरुत्तरीयैर्निजकुङ्कुमाङ्कितैरचीक्लृपन्नासनमात्मबन्धवे' इति श्रूयते । स्ववस्त्रेण खलु ते तमुपचेरुः । कान्तामोहावसरे स्वाङ्गस्थार्द्रवस्त्रेण खलु मुखसेचनलिम्पनमार्जनादिकं कार्यमित्याक्षेप उन्मिषेत् । तत्रोच्यते आचार्यैः वारिक्रीडानिबिडवसन इति । स्ववस्त्रं स्वशरीरादाहर्तुं प्रयत्नः कृत एव गोपालेन । वारिक्रीडितजनितार्द्रत्वात्तदङ्गे निबिडसक्तमभूद्वसनम् । आर्द्रवस्त्रहरणसंभावितविलम्बाभिया

भक्त्यायन्त्रं जग्राह कान्तामूर्च्छामपनेतुम् । अतो न अरसिको गोपालः ॥

प्रत्यालीढस्थितिमधिगताम् । दार्ढ्यकाष्ठामापन्नान्यङ्गानि । तदवस्थायामालिङ्गनेऽत्यन्तगाढत्वं भवेत्संश्लेषस्य ॥

प्राप्तगाढाङ्कपालिम् । निद्रावस्थायां गाढपरिष्वङ्गश्चैतन्यस्वरूपमात्रस्य भगवत्स्वरूपेण । इदानीं भगवद्विग्रहेण स्वाङ्गगाढाश्लेषः ॥

पश्चात् । पश्चादागतः कान्त अज्ञातत्वेनाकस्मादालिङ्गितुम् । 'प्रणयिनमिव प्राप्तं पश्चात्प्रिया स्वसमन्वितम्' 'पश्चादेत्य शनैः कराम्बुजवृते कुर्वीत वा लोचने' इति कामुकजनस्वभावः पश्चादविदितागमनम् । पुरत आगमनेऽङ्गशैथिल्यं भवेत्कान्तदर्शनसंरम्भेण ॥

ईषन्मिलितनयनाम् । भगवता संपरिष्वङ्गे सुषुप्तिः प्रसिद्धा । तत्सदृशा मोहावस्था आरभते आकस्मिकसुखातिशयेन । 'आनन्दनेन जडतां पुनरातनोति' इति खलु स्पर्शसुखानुभवः । ईषच्छब्देन मोहस्य प्रारम्भमात्रं सूच्यते । मोहस्य विवक्षितत्वाभावे ईषच्छब्दस्य स्वारस्यं मृग्यं स्यात् । मिलितशब्दो यद्यपि कान्तचक्षुर्भ्यां स्वचक्षुर्मेलने स्वरसः

नयनशब्दे वर्णितद्वित्वस्य नयनावयवभूतपक्ष्मद्वित्वप्रयुक्तत्वं नास्वरसम् , अदितिः पाशान्निरन्नेव । ईषच्छब्दस्वारस्यमनुरुध्यप्रदर्शितकृत्स्नार्थस्वारस्यं चानुरुध्य स्वल्पः क्लेश सह्य ॥

प्रेयसीम् । मुह्यन्तीं कान्तां वीक्ष्य नायकश्चिन्तयति । ममात्यन्तं प्रेयसी खल्वियम् । मम प्रेयसी मुह्यति, न केवलं प्रिया ॥

प्रेक्षमाणः । ससंरम्भं सावधानं सोद्वेगं तां मुह्यन्तीं प्रेक्षते किमिदमत्याहितमिति ॥

भस्त्रायन्तप्रणिहितकरः । प्रियामुखनयनसेचनार्थं मोहमपनेतुम ॥

भक्तजीवातुः । कान्तजीवयिता जीवभूता कान्ता । भक्तानां जीवयिता भगवान् । परस्परप्राणत्वम् । 'मद्गतप्राणाः' 'मम प्राणा हि पाण्डवाः' इति परस्परात्मत्वम् ॥

अव्यात् । एतदवसरे एतद्दशायामाचार्योऽपि मुह्यति गोप्यनुभवतौल्यमभिमन्यमानः । मुह्यन्प्रार्थयते मां प्राणयेदिति । यथा मोहेनाम्रियमाणां प्रेयसीमवति, तथा मामव्यात् ॥

वारिक्रीडानिबिडवसनः । आर्द्रस्ववसनेन प्रियामुखनयनमार्जनाभावप्रयुक्ताराधिकता वार्यते वारिक्रीडायां वसनस्य निबिडलग्नत्वं स्वभावः । अर्थान्तरवर्णनेऽस्य स्वारस्यं दुर्लभम् ॥

वल्लवीवल्लभो नः । आत्मवदन्यानपि समानशोकान्मत्वा तेषां प्राणनमपि प्रार्थ्यते ॥

वासो हृत्वा दिनकरसुतासंनिधौ वल्लवीनां
लीलास्मेरो जयति ललितामास्थितः कुन्दशाखाम् ।
सव्रीडाभिस्तदनु वसने ताभिरभ्यर्थ्यमाने
कामी कश्चित्करकमलयोरञ्जलिं याचमानः ॥

'न नग्नः स्नायात्' इति निषेधः । गोपालः सवसनः सस्नौ, जलक्रीडां च चक्र इति निबिडवसनविशेषणेनोक्तं पूर्वश्लोके । इदानीं गोप्यो नग्नाः कालिन्द्यां स्नान्तीत्युच्यते । स्ववाससो निबिडत्वाज्जिहीर्षितस्याहार्यत्वमुक्तम् । इदानीं गोपीवाससां जिहीर्षितानां हरणमुच्यत इव । फलाध्यायसूचनमत्र । गोपीनां व्रतस्य समाप्तिः, तत्फलदानं च । नन्दगोपसुतं पतित्वेन लब्धुं तैर्व्रतं चीर्णम् । 'नन्दगोपसुतं देवि पतिं मे कुरु ते नमः' इति तत्प्रार्थना । 'मे पतिं कुरु'

इति प्रार्थिते 'किं मे त्वं कुर्याः' इति देवी पृच्छतीव . तत्रो-च्यते 'ते नमः' इति । पतित्वेन ब्रह्मलाभो मोक्षः । 'पत्या-दिशब्देभ्यः' इति पतित्वं पुरुषोत्तमस्य ब्रह्मणोऽसाधारणं लिङ्गम् । तत्पतित्वं चैकान्त्येनान्यपतित्वहानपूर्वकम् । ब्रह्मा-न्याधिपतित्वहानिरूपानन्याधिपतित्वम् । वासश्च शरीरम् । 'वासांसि जीर्णानि यथा विहाय—' इत्यादिश्लोके शरीराणि वासोभिरुपमीयन्ते । यथा अहिनिर्ल्वयनी शरीरोपमानं भवति तथा वासोऽपि । प्राकृतशरीरात्यन्तिकहरणं गोपाला-नुग्रहेणैव लभ्येत । स्नानमप्यत्र विरजास्नानमिव । अवभृथ-स्नानमपि भवति व्रतसमाप्तौ । ज्ञानयज्ञः प्रवर्तते आचार्य-स्य । यथा भगवद्गीताध्येता ज्ञानयज्ञेन भगवन्तं यजते, तथा विंशत्या विचित्रतद्विषयगायक आचार्यो ज्ञानयज्ञेन भगवन्त-माराधयति । तस्य समाप्तिरूपावभृथस्नानसूचनमस्मिन् श्लो-के । ज्ञानयज्ञस्य फलं मोक्षः । गोपीनां वासो मानरक्षकम् । तदभावे ता लज्जेरन् । वासो याच्यते गोपीभिः स्वमानं त्रातुम् । तत्स्थानेऽञ्जलिर्याच्यते गोपालेन स्वमानं त्रातुम् । स्वदास-दास्यो यद्यञ्जलिं न कुर्युः स्वामिने, तस्य मानं हीयेत । दासदासीजनाः स्वामिनं दृष्ट्वा तस्मा अञ्जलिं कुर्युः । तद-करणे स्वामिनो लज्जा जायेत स्वभृत्या आत्मानं तिरस्कुर्व-न्तीति । ताश्च रहसि याचेत 'अञ्जलिं कुरुध्वम् । भावशून्य-

त्वेऽप्यञ्जलिः कार्य' इति । एवं याचतेऽञ्जलिं स्वामी गोपालः । अञ्जलिकरणे वामो दीयेत । स्वमानरक्षणे तन्मानं रक्ष्येत । कथं धर्मसेतुर्गोपालो मुग्धान् वल्लवीजनानेवमवमानयति ? वासोहरणान्नग्नस्त्र्यवलोकनात्किं जुगुप्सितं लोके । कथं धर्मसंस्थापनार्थमवतीर्णो गोपाल एवमाचरेत् ? धर्मसंस्थापनार्थमेवैवमाचरितमिति ब्रूमः । तत्कथम् ? भक्तियोगावतारणं भक्तरञ्जनं चावतारप्रयोजनम् । गोप्यो भक्ताः । भक्त्या शुद्धया भवितव्यम् । प्राकृतकामाहता आत्मकाममात्रा स्याद्भक्तिः । अकाम आत्मकामो मुमुक्षुर्मोक्षार्हः । विरक्तोऽपरमात्मनि रक्तश्च परमात्मनि स्यान्मुमुक्षुजनः । एता गोप्यो बहुधा गोपालपरत्वं शिक्ष्यन्ते । बोधिता अपि तास्तद्विस्मृत्य तं नन्दगोपसुतं सुन्दरं मर्त्यं मन्यन्ते । नन्दगोपसुतः कृष्णोऽस्मत्पतिर्भूयादिति कात्यायनीव्रतमनुतिष्ठन्ति । पूतनाशकटारिघातनादिभिर्वृत्तैर्लीलाशायिनः शिशोर्लोकातीतत्वम्, परत्वं च स्पष्टीकृतम् । तद्विस्मृतं गोपीभिः । गोवर्धनोद्धरणवृत्तान्ते इन्द्रस्थाने पूजितो गिरिः । इन्द्रश्चुक्रोध । क्रुद्धः शिलादिवर्षं संततं ववर्ष । पूजितेन गिरिणा तस्मादनर्थात्त्राणं कर्तव्यम् । पूजितया गिरिदेवतयैव त्राणमकारयद्गोपालो गिरिं स्वहस्तेन धरन् । अधो मध्येऽन्तश्च स्थितो गोपालो गिरिं

छत्रीकृत्य गोकुलं रक्षति । 'यो यो यां यां तनुं भक्तः—' इत्यारभ्य 'लभते च ततः कामान्मयैव विहितान्हितान्' इत्यन्तैः श्लोकैः प्रतिपादितशास्त्रपरमरहस्यं प्रकाशयन्नाराधितगिरेरन्तर्यामी भूत्वा तं धारयन् रक्षणं निरवर्तयत् । गिरिराराधितो गोकुलवासिभिः । तेनैव रक्षणं कार्यम् । तद्द्वारा रक्षति गोपालस्तदन्तर्यन्ता भवन् । इदं च प्रत्यक्षं दृश्यते गोपीभिः । गोपालस्य परत्वं प्रत्यक्षदृष्टं सद्यो विस्मरन्ति । गोपालस्य परत्वाप्राकृतत्वादिनिश्चयाभावे कथं तद्भक्तिः शुद्धा स्यात्? कथं च ताभिः सह रासोऽभ्युपगम्येत धर्मसेतुना गोपालेन । अनेन वस्त्रापहरणवृत्तान्तेनैतदुद्बोधयिषितं गोपालेन । गोपालः परमपुरुषः । नास्य शरीरं प्राकृतम्, किं तु ज्ञानानन्दमयमिति यदि गोप्यो निश्चितं जानीयुः, ताभिः सह रासो न दुष्टः स्यात् । ईश्वरोपनिहिताश्चतुर्दशसाक्षिणो नग्नाः सतीः स्त्रियः पश्यन्ति । रहसि वस्त्रपरिवर्तनादिकाले नग्ना स्यात्स्त्री । आदित्यवायुकालादीनात्मानं नग्नां पश्यतः साऽनुमन्यते । तैर्दर्शने न लज्जते । साक्षिणामपि साक्षी सर्वसाक्षी ईश्वरः । चतुर्दश साक्षिणो नान्तर्यामिणः । अन्तर्यामी कृत्स्नवयवव्यापी ईश्वरो गोपालः । कुन्दवृक्षस्थो गोपालो नग्नतां पश्येदिति गोप्यो बिभ्यति । अन्तःस्थः

च सर्वं प्रत्यक्षेण वेदेति न स्मरन्ति । आकाशादिवत्तस्या-सङ्गस्वरूपताज्ञानाभावे ताभिः संश्लेषं गर्हणीयमेव मन्येत गोपालः । गोपालस्य श्लेषणं कथं परिह्रियेत ? आकाश-वाय्वादिसंश्लेषं न परिजिहीर्षन्ति । नापि दिनकरकरसं-श्लेषम् । गोपालं तु परिजिहीर्षन्ति यावदेतदज्ञानं न निव-र्तेत तावत्तन्मनोरथकाष्ठाभूतरासक्रीडा नाभ्यनुज्ञायेत गोपा-लेन । गोपालवीक्षणस्य तत्संश्लेषस्य चापरिहरणीयत्वं बोध्यते गोपीभ्यो वस्त्रापहरणवृत्तान्तेन । सर्वशरीरी गो-पालः । गोप्योऽपि तस्य शरीरम् । स्वशरीरस्य स्वेन संश्लेषे कथं दोषशङ्का । 'स्वशरीरस्य संश्लेषे रतिर्न स्याद्वरानने' इति पार्वतीं प्रतीश्वरवचनमेतद्विषये उदाहृतम् । विस्तरेणो-पपादितं च श्रीमद्दीक्षितैः 'विमोहने वल्लवगेहिनीनां न ब्रह्मचर्यं विभिदे तदीयम्' इति यादवाभ्युदयश्लोकव्या-ख्याने । महत्यस्माकं कृतज्ञता श्रीमद्दीक्षितेष्वेतद्रहस्योद्घाटन-निमित्तेन ॥

वासो हृत्वा : हरणाभावे न ता दद्युः नवनीतं न दत्तम् । ततस्तज्जिहीर्षितम् । हैयंगवीनं हर्तुं कुम्भे करो विनिहितः, चौर्यसमय एवासादितो मात्रादिना । इदानीं हरणप्रयत्नः सफलो भवति । शेषजनस्य शेषत्वाभ्युपगम-

द्योतकमञ्जलिरचनं शेषिणः फलम् । इतरथा शेषित्वं सिध्येत् ॥

दिनकरसुतासंनिधौ वल्लवीनाम् । रहस्यपहरणमिष्टायैव स्यात् । यमुनासाक्षिकत्वं हरणस्य नानुमन्यते । स्त्र्यन्तरदर्शनादेव लज्जादिजनिः । यमुना च दिनकरस्य सुता । स्वदृष्टं सा पित्रे निवेदयेत् । स च सर्वव्यापी सर्वप्रकाशयिता सर्वत्रैतद्वृत्तान्तं प्रकाशयेत्क्षणकाले । दिनकरतत्सुतोभयसंनिधाविति च । यद्येतद्वासोहरणं रात्रौ दिनकरसांनिध्यभावे स्यात्, न लज्जोदियात् । दिनकरोदयानन्तरं तत्संनिधौ खल्विदं वर्तते ॥

वल्लवीनाम् । स्ववल्लभजनानाम् ॥

लीलास्मेरः । 'तासामाविरभूच्छौरिः स्मयमानमुखाम्बुजः' इत्यत्रेव न प्रेमविलासस्मितम्, किं तु परिहासनर्मस्मितम् । तदुच्यते लीलेति । नर्मलीलास्मितवान् ॥

जयति । जयन्तीसंभवस्येदानीं जयः संवृत्तो गोपीभ्यः स्वपरत्वशिक्षणेन । वल्लभजनस्य शेषत्वस्वरूपस्थापनेन च ॥

ललितामास्थितः कुन्दशाखाम् । यदा गोपालस्पर्शो